B130
6

बी. १३०
६

स्कन्दपुराणे

केदारखण्ड०

Skand purana

॥ अथ स्कंदपुराणस्य केदारखंडः प्रारभ्यते ॥ श्रीशंकरोविजयते ॥

केदार० ॥श्रीगणेशायनमः॥ उमामहेश्वराभ्यांनमः॥ यस्याज्ञयाजगत्स्रष्टाविरिंचिःपालकोहरिः॥ संहर्ताका खंड
लरूपेणनमस्तस्मैपिनाकिने॥ तीर्थानामुत्तमंतीर्थंक्षेत्राणांक्षेत्रमुत्तमं॥ यत्रास्थिताहिऋषयःशौन
१ काद्यास्तपोधनाः॥ २॥ दीर्घसत्रंप्रकुर्वंतिसत्रिणःसमचेतसः॥ तेषांसंदर्शनोत्सुक्यादागतोहिमहातपाः
॥ ३॥ व्यासशिष्योमहाप्राज्ञोलोमशोनामनामतः॥ तत्रागतंतेदद्दृशुर्मुनयोदीर्घसत्रिणः॥ ४॥ उत्तस्थुर्यु
गपत्सर्वेसार्घ्यहस्ताःसमुत्सुकाः॥ दत्वार्घ्यपाद्यंसत्कृत्यमुनयोवीतकल्मषाः॥ ५॥ तंपप्रच्छुर्महाभा
गाःशिवधर्मंसविस्तरं॥ मुनयऊचुः॥ कथयस्वमहाप्राज्ञदेवदेवस्यशूलिनः॥ ६॥ महिमानंमहाभागध्यानार्चन भा
समन्वितं॥ संमार्जनेकिंफलंस्यात्तथारंगावलीषुच॥ ७॥ प्रदानेदर्पणस्याथतथावैचामरस्यच॥ प्रदाने
चवितानस्यतथाधारागृहस्यच॥ ८॥ दीपदानेकिंफलंस्यात्पूजायांकिंफलंभवेत्॥ कानिकानिचपु
ष्पाणिकथ्यतांशिवपूजने॥ ९॥ एककालंद्विकालंवात्रिकालंवापिकथ्यतां॥ प्रासादकरणेचापिभग्नो
द्धारेचयत्फलं॥ १०॥ प्रोक्षणेचशिवस्याग्रेनटनेचैवयत्फलं॥ इतिहासपुराणानिवेदाध्ययनमेवच॥ ११॥
शिवस्याग्रेप्रकुर्वंतिकारयंत्यथवानराः॥ किंफलंचनृणांतेषांकथ्यतांविस्तरेणहि॥ १२॥ शिवाख्यानपरोलो
केत्वत्तोनान्योद्यविद्यते॥ इतिश्रुत्वावचस्तेषांमुनीनामूर्ध्वरेतसां॥ १३॥ उवाचव्यासशिष्योसौशिवमाहा रे १
त्म्यमुत्तमं॥ लोमशउवाच॥ अष्टादशपुराणेषुदशभिर्गीयतेशिवः॥ १४॥ तस्माच्छिवस्यमाहात्म्यंवक्तुं

नालंचतुर्मुखः॥ शिवइत्यक्षरंनामव्याहरिष्यंतियेनराः॥ १५॥ तेषांस्वर्गश्चमोक्षश्चभविष्यतिनसंशयः॥ उदारो
वैमहादेवोदेवानांपतिरीश्वरः॥ १६॥ येनसर्वंप्रदत्तंहितस्माच्छर्वइतिस्मृतः॥ तेधन्यास्तेमहात्मानोयेभजंति
सदाशिवं॥ १७॥ विनायस्तुशिवेनेहसंसारंतर्तुमीहते॥ समूढोहिमहापापःशिवद्वेषीनसंशयः॥ १८॥ भक्षि
तंगरलंयेनदक्षयज्ञोविनाशितः॥ कामस्यदहनंयेनकृतंराज्ञःप्र मोचनं॥ १९॥ मुनयऊचुः॥ यथाचविषंभक्षि
तंचयथायज्ञोविनाशितः॥ दक्षस्यचतथाब्रूहिपरंकौतूहलंहिनः॥ २०॥ ब्रह्मादिपरदेवेनकथंदेवेनशूलिना॥
दक्षयज्ञविनाशोहिकृतस्तद्ब्रूहिलोमश॥ २१॥ लोमशउवाच॥ दाक्षायणीपुरादत्ताशंकरायमहात्मने॥
वचनाद्ब्रह्मणोविप्राः दक्षेणपरमेष्ठिनः॥ २२॥ एकदाहिसदक्षो वैनैमिषारण्यमागतः॥ यदृच्छयासमा
पन्नोऋषिभिःपरिपूजितः॥ २३॥ स्तुतिभिःप्रणिपातैश्चदेवैःसर्वैःसुरासुरैः॥ रुद्रेणानकृतस्तस्यप्रणामश्चतदाभृशं॥ २४
चुकोपरुद्रंचरितस्तदादक्षप्रजापतिः॥ एतेहिसर्वेचसुरासुभृशंनमंतिविप्रप्रवराःसमुत्सुकाः॥ २५॥ कथंह्ययंसो सुरा
दुर्जनवन्महात्माभूताधिपःप्रेतपिशाचयुक्तः॥ श्मशानवासीनिरपत्रपोह्ययंकथंप्रणामंनकरोतिमेधुना॥ २६ न
पाषंडिनस्तदुर्जनाःपापशीलाःविप्रंदृष्ट्वाचोद्धतानिंदकाश्च॥ वध्यास्त्वेताःसद्भिरेवंविधेयास्तस्मादेनं
शापितुंचोद्यतोस्मि॥ इत्येवमुक्त्वासमहातपास्तदारुषान्वितोरुद्रमिदंबभाषे॥ शृण्वंतुचेमेविप्रवराः

केदार दानींवचोहिमे कर्तुमिहार्हयेतत्व ॥२९॥ रुद्रोस्ययंयज्ञबाह्यः कृतोमवर्णातीतोवर्णनिन्द्यायतश्च ॥ नंदीनिशम्यतद्वाक्यं खंड अ०१
शैलादोहिरुषान्वितः ॥ अब्रवीच्छापदानं वैकुर्वंतंतमहाप्रभं ॥ नंद्युवाच ॥ यज्ञबाह्योहिमस्वामीमहेशोयंकृतःकथं
२ २ ॥३०॥ यस्यस्मरणमात्रेणयज्ञाश्चसफलाह्यमी ॥ यज्ञोदानंतपश्चैवतीर्थानिविविधानिच ॥३१॥ यत्राम्नापवि
त्राणिसोयंशप्तोधुनाकथं ॥ वृथातेब्रह्मचापल्याच्छप्तोयंदक्षदुर्मते ॥ येनेदंपालितंविश्वंशैवेणचमहा
त्मना ॥ शप्तोहिसकथंपापरुद्रोयंब्राह्मणाधम ॥३२॥ एवंनिर्भर्त्सितस्तेननंदिनाहिप्रजापतिः ॥ नंदिनंचश
पा शापथदक्षोरोषसमन्वितः ॥३३॥ यूयंसर्वेरुद्रचराःवेदबाह्याश्चवैभृशं ॥ शप्ताहिवेदमार्गाश्चतथात्यक्ता
महर्षिभिः ॥ पाषंडवादसंयुक्ताःशिष्टाचारबहिष्कृताः ॥ कपालिनःपापरतास्तथाश्चापमद्यस्वाद्यमी ॥३६
इतिशप्तास्तदातेनदक्षेणशिवकिंकराः ॥ शापंश्रुत्वातदानंदीमहाक्रोधसमन्वितः ॥३७॥ दक्षप्रजापतिंचैवश
शापसमहाद्युतिः ॥ वृथैवब्रह्मचापल्यादहंशापंददामिते ॥३८॥ वेदवादरताह्येते नान्यदस्तीतिवादिनः ॥ कामात्मा
नःस्वर्गपराःक्रोधलोभसमन्विताः ॥३९॥ वैदिकंचपुरस्कृत्यब्राह्मणाःशूद्रयाजकाः ॥ दरिद्राश्चभविष्यंतिप्र २
तिग्रहरताःसदा ॥४०॥ असत्प्रतिग्रहाश्चैवतथानिरयगामिनः ॥ भविष्यंतितथादक्षकेचिद्वैब्रह्मराक्षसाः ॥४१॥

विप्रास्ते शापितास्तेन नंदिना कोपिना भृशं ॥ तदा कर्ण्येश्वरो वाक्यं नंदिनं प्रहसन्निव ॥४२॥ उवाच वा
क्यं मधुरं बोधयुक्तं सदाशिवः ॥ श्रीमहादेव उवाच ॥ कोपं कर्तुं नार्हसि वै ब्राह्मणान् प्रति सर्वदा ॥४३॥ ब्रा
ह्मणा गुरवो ह्येते वेदवादरताः सदा ॥ वेदो मंत्रमयः साक्षात्तथा सूक्तमयो भृशं ॥४४॥ सूक्ते प्रतिष्ठितो
ह्यात्मा सर्वेषामपि देहिनां ॥ तस्मादात्मविदो नित्यं भव त्वं मा रुषान्वितः ॥४५॥ यज्ञोहं यज्ञकर्माहं यज्ञांगा
नि च सर्वशः ॥ तस्माद्यज्ञरतोहं वै यज्ञबाह्यो निरंतरः ॥४६॥ को यं कस्त्वं कश्चाहं वै कस्मात्प्राप्तोसि वै द्वि
ज ॥ प्रपंचरचनां हित्वा बुधो भव महामते ॥४७॥ तत्वज्ञानेन निर्हृत्य स्वस्थः क्रोधादिवर्जितः ॥ एवं
प्रबोधितस्तेन शंभुना परमेष्ठिना ॥४८॥ विवेकपरमो भूत्वा शैलादो हि महातपाः ॥ शिवेन सह संग
म्य परमानंदसंप्लुतः ॥ दक्षोपि हि रुषाविष्टो ऋषिभिः परिवारितः ॥ ययौ स्थानं स्वकं तत्र प्रविवेश
महातपाः ॥५०॥ रुद्रं तदानीमकृतव्रणामं संस्मरन्स्वदक्षः परुषो रुषान्वितः ॥ श्रद्धां विहाय परमां शि
वपूजकानां निंदापरः स हि बभूव नराधमश्च ॥५१॥ ॥ इति श्रीस्कंदपुराणे केदारखंडे शैवशा
स्त्रे प्रथमोध्यायः ॥१॥ ॥ लोमश उवाच ॥ एकदा तु तदा तेन यज्ञः प्रारंभितो महान् ॥ तत्राहूतास्तदा
सर्वे दीक्षितेन तपस्विना ॥१॥ ऋषयो विविधास्तत्र वसिष्ठाद्याः समागताः ॥ अगस्त्यः कश्यपो
त्रिश्च वामदेवस्तथा भृगुः ॥२॥ दधीचो भगवान् व्यासो भरद्वाजोथ गौतमः ॥ एते चान्ये च बह

केदारखंड वः समाजग्मुर्महर्षयः ॥ ३ ॥ तथा सर्वे सुरगणा लोकपालास्तथापरे ॥ विद्याधराश्च गंधर्वाः अ॰ २
रो किंनराश्चाप्सरोगणाः ॥ ४ ॥ सत्यलोकात्समानीतो ब्रह्मा लोकपितामहः ॥ वैकुंठाच्च तथा विष्णुः
३ समानीतो मखं प्रति ॥ ५ ॥ देवेंद्रो हि समानीत इंद्राण्या सहसुप्रभः ॥ तथा चंद्रो हि रोहिण्या वरुणः
प्रियया सह ॥ ६ ॥ कुबेरः पुष्पकारूढो मृगारूढोथ मारुतः ॥ बस्तारूढः पावकश्च प्रेतारूढो नै श्च
ऋतः ॥ ७ ॥ एवं सर्वे समायाता यज्ञवाटं द्विजन्मनः ॥ ते सर्वे सत्कृतास्तेन दक्षेण च दुरात्मना ॥ दे॥
भवनानि महार्हाणि शुभ्राणि महांति च ॥ त्वष्ट्रा कृतानि दिव्यानि कुशलेन महात्मना ॥ ९ ॥ तेषु सर्वे
षु धिष्ण्येषु यथाजोषं समास्थिताः ॥ वर्तमाने महायज्ञे तीर्थे कनखले तदा ॥ १० ॥ ऋत्विजश्च
वृतास्तेन भृग्वाद्याश्च तपोधनाः ॥ दीक्षायुक्तस्तथा दक्षः कृतकौतुकमंगलः ॥ ११ ॥ भार्यया सहि
तो विप्रैः कृतस्वस्त्ययनो भृशं ॥ रेजे महत्वेन तदा सुहृद्भिः परिवारितः ॥ १२ ॥ एतस्मिन्नंतरे तत्र
दधीचो वाक्यमब्रवीत् ॥ दधीच उवाच ॥ एते सुरेशा ऋषयो महत्तराः सलोकपालाश्च समागता ३
श्च ॥ १३ ॥ तथापि यज्ञस्तु न शोभते भृशं पिनाकिना तेन विना महात्मना ॥ येनैव सर्वाण्यपि मंग
लानि जातानि चांसंति महाविपश्चितः ॥ १४ ॥ सोसौ न दृष्टोत्र पुमान् पुराणो वृषध्वजो नीलग

केदा॰खं॰ द्भिः कर्तव्योयज्ञोमेसफलोमहान् ॥ २९ ॥ एतछ्रुत्वावचस्तस्यदधीचोवाक्यमब्रवीत् ॥ दधीचिरुवाच ॥
सर्वेषांऋषिवर्याणांस्मरणाभावितात्मनां ॥ अनयोयंमहान्जातोविनातेनमहात्मना ॥ ३० ॥ विना
शोपिमहान्सद्योह्यत्रस्थानांभविष्यति ॥ एवमुक्त्वादधीचोसोएकएवविनिर्गतः ॥ ३१ ॥ यज्ञवाटाच्च
४ दक्षस्यत्वरितःस्वाश्रमंययौ ॥ मुनौविनिर्गतेदक्षः प्रहसन्निदमब्रवीत् ॥ ३२ ॥ गतः शिवप्रियोवि दा
प्रोदधीचिर्नामनामतः ॥ आत्मसंभाविताःमंदामिथ्यावादरताःखलाः ॥ ३३ ॥ वेदबाह्यादुराचारा
स्त्याज्यास्तेह्यत्रकर्मणि ॥ वेदवादरतायूयंसर्वेविष्णुपुरोगमाः ॥ ३४ ॥ यज्ञंमेसफलंविप्राःकु
र्वंतुह्यचिरादिव ॥ तदावैदेवयजनंचक्रुःसर्वमहर्षयः ॥ ३५ ॥ अवदानानिसर्वेभ्योदेवेभ्य
श्चददुःस्तदा ॥ एतस्मिन्नंतरेतत्रपर्वतेगंधमादने ॥ ३६ ॥ धारागृहावितेचैवसखीभिःपरि
वारिता ॥ दाक्षायणीमहादेवीचकारविविधास्तदा ॥ ३७ ॥ क्रीडावितानमध्यस्थाकंदुकाद्याः
सहस्रशः ॥ धारागृहवितानेनसखीभिःपरिवारिता ॥ ३८ ॥ दाक्षायण्यानिजस्थानात्संज
ग्मुर्यजनंपितुः ॥ क्रीडासक्तातदादेवीददर्शाथमहासती ॥ ३९ ॥ यज्ञंप्रयांतंसोमंचरोहिण्या ४
सहितंप्रभुं ॥ क्वगमिष्यतिचंद्रोयंविजयेपृछसत्वरं ॥ ४० ॥ तयोक्ताविजयादेवीतंपप्रछय

थोचितं ॥ कथितंतेनतत्सर्वंदक्षस्येवमखादिकं ॥ ४१ ॥ तछ्रुत्वाविजयादेवीत्वरिताजातसंभ्रमा ॥ कथया
मासतत्सर्वंयदुक्तंशशिनाभृशं ॥ ४२ ॥ विमृश्यकारणंदेवीकिमाह्वानंकरोतिन ॥ दक्षः पितामेमाताच
विस्मृतामांयशस्विनी ॥ ४३ ॥ पृछामिशंकरंचात्रकारणंकृतनिश्चया ॥ स्थापयित्वासखीस्तत्रक्रीडा
स्थानेत्वरान्विता ॥ ४४ ॥ यत्रागिरीशोमहेशानःस्वयंतिष्ठतिपुण्यभाक् ॥ तत्रागत्यददर्शैनंसभामध्येह्य
वस्थितं ॥ ४५ ॥ गणैःपरिवृतंसर्वैश्चंडमुंडादिभिस्तथा ॥ बाणोभृंगीतथानंदीशैलादोहिमहात
पाः ॥ ४६ ॥ महाकालोमहामुंडोमहारौद्रोमहाशिराः ॥ नंदीचपार्षदामुख्याअतिकायोतिभीष
णः ॥ ४७ ॥ धूम्रोबभ्रुःश्वेतकेतुःश्वेतबाहुर्बृहच्छिराः ॥ धूम्राक्षोधूमकेतुश्चधूम्रपादस्तथै
वच ॥ ४८ ॥ एतेचान्येचबहवोगणारुद्रानुवर्तिनः ॥ केचिद्व्यंकरारौद्राकबंधाश्चतथापरे ॥ ४९
विलोचनाश्चतत्रैवअन्नहीनास्तथापरे ॥ शुष्कोदराश्चकेचिच्चअंघ्रिहीनास्तथापरे ॥ ५० ॥ कर
हीनाश्चकेचिच्चचक्षुहीनास्तथापरे ॥ एवंभूताश्चशतशःसर्वेतेकृत्तिवाससः ॥ ५१ ॥ जटाक
लापसंवीताःसर्वेरुद्राक्षभूषणाः ॥ जितेंद्रियावीतरागाःसर्वेरुद्रपरायणाः ॥ ५२ ॥ पुरांता
श्चमहात्मानःसर्वेविषयवैरिणः ॥ एभिःसर्वैःपरिवृतःशंकरोलोकशंकरः ॥ ५३ ॥ इ
ष्टस्तदास्रूपनिविष्टोह्यासनेपरमाद्भुते ॥ आक्षिप्तचित्तासहसाजगामशिवसंन्निधिं ॥ ५४

केदारखं॰ शिवेन सह पिता स्वांके प्रीतियुक्तेन वल्लभा ॥ प्रमोदिता वचोभिः सा बहुमानपुरःसरं ॥ ५५ ॥ किमागम अ॰२
नकार्यं ते वद शीघ्रं वरानने ॥ एवमुक्ता तदा तेन उवाचासितलोचना ॥ ५६ ॥ श्रीसत्युवाच ॥ पितुर्मम
५ महायज्ञः कस्मात्त्वं न रोचते ॥ गमनं देवदेवेश ज्ञातं सर्वं कथय प्रभो ॥ ५७ ॥ सुहृदामेष वै धर्मः सु
हृद्भिः सह संगतिं ॥ कुर्वंति ये महादेव सुहृदां प्रीतिवर्धनीं ॥ ५८ ॥ तस्मात्सर्वप्रयत्नेन त्वनाहूतोपि गच्छ
भो ॥ यज्ञवाटं पितुर्मेद्य वचनान्मे सदाशिव ॥ ५९ ॥ तस्यास्तद्वचनं श्रुत्वा बभाषे सूनृतं वचः ॥ त्वयानंदे
न गंतव्यं दक्षस्य यजनं प्रति ॥ ६० ॥ तस्य ये मानिनः सर्वे सुरासुरकिंनराः ॥ ते सर्वे यजनं प्रा
प्ताः पितुस्त्वं न संशयः ॥ ६१ ॥ अनाहूताश्च ये सुभ्रु गच्छंति परमंदिरं ॥ अपमानं प्राप्नुवंति मरणा
दधिकं पुनः ॥ ६२ ॥ परेषां मंदिरं प्राप्त इंद्रोपि लघुतां व्रजेत् ॥ तस्मात्त्वया न गंतव्यं दक्षस्य यजनं प्रति ॥ ६३ ॥
एवमुक्ता सती तेन महेशेन महात्मना ॥ उवाच रोषसंयुक्तं वाक्यं वाक्यविदां वरं ॥ ६४ ॥ यज्ञो हि सफलो
येन स त्वं देववरेश्वर ॥ अनाहूतोसि तेनाद्य पित्रा मे दुष्टचारिणा ॥ ६५ ॥ तत्सर्वं ज्ञातुमिच्छामि भावा
भावं दुरात्मनः ॥ तस्मादद्यैव गच्छामि यज्ञवाटं पितुर्मम ॥ ६६ ॥ अनुज्ञां देहि मे नाथ देवदेव जगत्पते ॥ इत्यु
क्तो भगवान्रुद्रस्तया देव्या शिवः स्वयं ॥ ६७ ॥ विज्ञाताखिलदृग्द्रष्टा भूतभावनभावनः ॥ सतीमुवा ५
च देवेशो महेशः सर्वसिद्धिदः ॥ ६८ ॥ गच्छ देवि त्वरायुक्ता वचनान्मम सुव्रते ॥ एनं नंदिनमारु

लः कपर्दश्च ॥ अमंगलान्यपि च मंगलानि भवंति येनाधिकृतानि दक्ष ॥ १५ ॥ त्र्यंबकेणाप्यपमंगलानि भ
वंति सद्योप्यथ मंगलानि ॥ तस्मात्त्वयैव कर्तव्यमाह्वानं परमेष्ठिना ॥ १६ ॥ त्वरितेनैव शक्रेण विष्णुना च प्रभ
विष्णुना ॥ सर्वैर्भवद्भिर्गंतव्यं यत्र देवो महेश्वरः ॥ १७ ॥ दाक्षायण्या समेतं तं मानयध्वं त्वरान्विताः ॥ तेन स त
र्वं पवित्रं स्याच्छंभुना योगिना सतां ॥ १८ ॥ यस्य स्मरणनामोक्त्या समस्तं सुकृतं भवेत् ॥ तस्मात्स
र्वप्रयत्नेन आनेयो वृषध्वजः ॥ १९ ॥ तस्य तद्वचनं श्रुत्वा दक्षो रोषसमन्वितः ॥ उवाच त्वरितो भूत्वा
प्रहसन्निव दुष्टधीः ॥ २० ॥ मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः ॥ यस्मिन्वेदाश्च यज्ञाश्च कर्मा
णि विविधानि च ॥ २१ ॥ प्रतिष्ठितानि सर्वाणि सोसौ विष्णुरिहागतः ॥ सत्यलोकात्समायातः ब्रह्मा
ष लोकपितामहः ॥ २२ ॥ वेदैः सोपनिषद्भिश्च आगमैर्विविधैः सह ॥ तथा सुरगणैः साकमागतः सु
रराट् स्वयं ॥ २३ ॥ तथा यूयं समायाता ऋषयो वीतकल्मषाः ॥ ये ये यज्ञोचिताः शांताः पात्र
भूताः समागताः ॥ २४ ॥ वेदवेदार्थतत्त्वज्ञाः सर्वे यूयं दृढव्रताः ॥ अत्रैव च किमस्माकं रुद्रेणापि प्रयोज
नं ॥ २५ ॥ कन्या दत्ता मया विप्र ब्रह्मणा नोदितेन हि ॥ अकुलीनो ह्यसौ विप्र नष्टानां च प्रियः सदा ॥ २६
भूतप्रेतपिशाचानां पतिरेको दुरत्ययः ॥ आत्मसंभावितो मूढः स्तब्धो मानी समत्सरः ॥ २७ ॥ कर्मण्य
स्मिन्नयोग्योसौ नानीतो हि मयाधुना ॥ तस्मात्त्वया न वक्तव्यं पुनरेवं वचो द्विज ॥ २८ ॥ सर्वैर्भव

ध्यनानागणैर्विविधैरन्विता ॥ ६९ ॥ गणाः षष्टिंसहस्राणिजग्मूरौद्राः शिवाज्ञया ॥ तैर्गणैः संवृतादेवीज
गामपितृमंदिरं ॥ ७० ॥ निरीक्ष्यतद्बलंसर्वंमहादेवोतिविस्मितः ॥ भूषणानिमहार्हाणितेभ्योदेव्यैपरं
वो तपः ॥ ७१ ॥ प्रेषयामासचाव्यग्रोमहादेवनुपृच्छतः ॥ देव्यागतंवैस्वपितुर्गृहंतदाविस्मयसर्वंभगवान्
महेश्वराः ॥ ७२ ॥ दाक्षायणीपित्रवमानितासतीनोयास्यतीतिस्वगिरिंपुनर्जगौ ॥ ७४ ॥ ॥ इतिश्रीस्कं
दपुराणेकेदारखंडेशैवशास्त्रेद्वितीयोध्यायः ॥ २ ॥ ॥ लोमशउवाच ॥ दाक्षायणीगतातत्रयत्र
यज्ञोमहाप्रभः ॥ तातस्तुभर्वनंदृष्ट्वानानाश्चर्यसमन्वितं ॥ १ ॥ द्वारिस्थितातदादेवीह्यवतीर्य
निजासनात् ॥ नंदिनोत्क्रामहाभागाअवलोकपराभवत् ॥ २ ॥ मातरंपितरंदृष्ट्वास्वसृःसंबं
धिबांधवान् ॥ अभिवाद्यैवपितरंमातरंचमुदान्विता ॥ ३ ॥ बभाषेवचनंसाध्वीप्रस्ताव
सदृशंततः ॥ अनाहूतस्त्वयाकस्माच्छंभुः परमशोभनः ॥ ४ ॥ येनपूतमिदंसर्वंत्रैलोक्यं
सचराचरं ॥ यज्ञोयज्ञविदांश्रेष्ठोयज्ञांगोयज्ञदक्षिणः ॥ ५ ॥ द्रव्यंमंत्रादिकंसर्वंहव्यंकव्यं
चयन्मयं ॥ विनातेनकृतंसर्वंस्त्वपवित्रंभाविष्यति ॥ ६ ॥ शंभुनाहिविनातातकथंयज्ञःप्रव
र्तते ॥ एतेकथंसमायाताब्राह्मणाःसहिताःपितः ॥ ७ ॥ हेमगोत्वंनजानासिहेकश्यपम

केदा॰ खं॰ हामते॥अत्रैवासिष्ठकण्वत्वंशक्रकिंकृतमद्यवै॥८॥विष्णोनत्वंमहादेवंजानासिपरमेश्वरं॥ब्रह्मन्नु
त्वंकिंनजानासिमहादेवस्यविक्रमं॥९॥पुरापंचमुखोभूत्वागर्वितोसिसदाशिवं॥कृतश्चतुर्मुखस्तेन अ॰३
६ विस्मृतोसितदद्भुतं॥१०॥भिक्षाटनंकृतंयेनपुरादारुवनेविभुः॥शक्रायंभिक्षुकोरुद्रोभवद्भिर्ऋषि
भिस्तदा॥११॥शप्तेनापिचरुद्रेणयत्कृतंविस्मृतःकथं॥यस्यावयवमात्रेणपूरितंसचराचरं॥१२॥
लिंगभूतंजगत्सर्वंजातंतत्कालमेवहि॥लयनाल्लिंगमित्याहुःसर्वेदेवाःसवासवाः॥१३॥सर्ववेदा
श्चसंभ्रतायतोदेवाश्चशूलिनः॥सोसौवेदांतगोदेवस्त्वयाज्ञातुंनपार्यते॥१४॥तस्यावचनमाक
र्ण्यदक्षःक्रुद्धोब्रवीद्वचः॥किंत्वयाबहुनोक्तेनकार्यंनास्तीहसांप्रतं॥१५॥गच्छवातिष्ठवाभ
द्रेकस्मात्त्वंहिसमागता॥अमंगल्योहिभर्तातेह्यशिवोसौसकमध्यमे॥१६॥अकुलीनोवेदबाह्योभू
तप्रेतपिशाचराट्॥तस्मान्नाकारितोभद्रेयज्ञार्थेचारुभाषिणि॥१७॥मयादत्तासिसुश्रोणि
पापिनामंदबुद्धिना॥रुद्रायाविदितार्थायउद्धतायदुरात्मने॥१८॥तस्मात्कोपंपरित्यज्य
स्वस्थाभवशुचिस्मिते॥दक्षेणोक्तातदापुत्रीसासतीलोकपूजिता॥१९॥निंदायुक्तंस्वपितरं
विलोक्यरुषिताभृशं॥चिंतयंतीतदादेवीकथंयास्यामिमंदिरं॥२०॥शंकरंद्रष्टुकामाहंकिं ६

केदा०खं० तदाकर्ण्येश्वरोवाक्यंनारदस्यमुखोद्भूतं ॥ चुकोपपरमात्मासौरुद्रोरौद्रपराक्रमः ॥ ३४ ॥ उत्थायच
जटांरुद्रोलोकसंहारकारकः ॥ स्फालयामाससरुषापर्वतस्यशिरोपरि ॥ ३५ ॥ स्फालनाच्चसमु
८ द्भूतोवीरभद्रोमहायशाः ॥ तथाकालीसमुत्पन्नाभूतकोटिभिरावृता ॥ ३६ ॥ कोपान्निश्वासिते
नैवरुद्रस्यचमहात्मनः ॥ जातंज्वराणांचशतंसन्निपातास्त्रयोदश ॥ ३७ ॥ विज्ञप्तोवीरभद्रेण
रुद्रोरौद्रपराक्रमः ॥ किंकार्यंभवतःकार्यंशीघ्रमेववदप्रभो ॥ ३८ ॥ इत्युक्तोभगवानीशःप्रेषयामा
ससत्वरं ॥ गछवीरमहाबाहोदक्षयज्ञंविनाशय ॥ ३९ ॥ शासनंशिरसाधृत्वादेवदेवस्यशूलिनः ॥
कालिकासहितोवीरःसर्वभूतैःसमावृतः ॥ ४० ॥ वीरभद्रोमहातेजाययौदक्षमखंप्रति ॥ तदानी
मेवसहसादुर्निमित्तानिचाभवन् ॥ ४१ ॥ रूक्षोववौतदावायुःशर्कराभिःसमावृतः ॥ असृग्ववर्ष
तिदेवश्चातिमिरेणावृतादिशः ॥ ४२ ॥ उल्कापाताश्चबहवःपेतुरुर्व्यांसहस्रशः ॥ एवंविधान्यनि
ष्टानिदृष्ट्वासर्वविबुधादयः ॥ ४३ ॥ दक्षोविभयमाविष्टोविष्णुंशरणमाययौ ॥ रक्षरक्षमहावि
ष्णोत्वंहिनःपरमोगुरुः ॥ ४४ ॥ यज्ञोसित्वंसुरश्रेष्ठभयान्मांपरिमोचय ॥ दक्षेणप्रार्थ्यमा ८
नोहिजगादमधुसूदनः ॥ ४५ ॥ मयारक्षाविधातव्याभवतोनात्रसंशयः ॥ अवज्ञाहिकृता

दक्षत्वयाधर्ममजानता ॥ ४६ ॥ ईश्वरावज्ञयासर्वंविफलंचभविष्यति ॥ अपूज्यायत्रपूज्यंतेपूजनी
योनपूज्यते ॥ ४७ ॥ त्रीणितत्रप्रवर्तंतेदुर्भिक्षंमरणंभयं ॥ तस्मात्सर्वप्रयत्नेनमाननीयोवृषध्वजः
॥ ४८ ॥ अमानितान्महेशाच्चमहद्भयमुपस्थितं ॥ अधुनैववयंसर्वेप्रभवोनभवामहे ॥ ४९ ॥ भ
वतोदुर्नयेनैवनात्रकार्याविचारणा ॥ विष्णोस्तद्वचनंश्रुत्वादक्षश्चिंतापरोभवत् ॥ ५० ॥ विवर्ण
वदनोभूत्वातूष्णीमासीद्भुविस्थितः ॥ एवंविवदमानानांदेवानांयज्ञमंडपे ॥ ५१ ॥ आजगाम
महातेजाःसैन्येनपरिवारितः ॥ वीरभद्रोमहाबाहुःरुद्रेणेवप्रणोदितः ॥ ५२ ॥ कालीकात्या
यनीशानीचामुंडामुंडमर्दिनी ॥ भद्रकालीतथाभद्रात्वरितावैष्णवीतथा ॥ ५३ ॥ नवदुर्गासमायुक्तो
भूतानांचगणोमहान् ॥ शाकिनीडाकिनीचैवभूतप्रमथगुह्यकाः ॥ ५४ ॥ कूष्मांडाःकर्पटाश्चैवच
टकाब्रह्मराक्षसाः ॥ भैरवाःक्षेत्रपालाश्चरक्षोयक्षविनायकाः ॥ ५५ ॥ तथैवयोगिनीचक्रंचतुः
षष्ट्यासमन्वितं ॥ निर्जग्मुस्तत्रसहसायज्ञवाटंमहाप्रभं ॥ ५६ ॥ वीरभद्रसमेताश्चगणाःशत
सहस्रशः ॥ पार्षदाःशंकरस्यैतेसर्वेरुद्रस्वरूपिणः ॥ ५७ ॥ पंचवक्त्रानीलकंठाःसर्वेतेदश
बाहवः ॥ त्रिनेत्राजटिलाःसर्वेसर्वेरुद्राक्षभूषणाः ॥ ५८ ॥ अर्धचंद्रधराःसर्वेसर्वेपाशुपता
स्त्रिणः ॥ भुजंगभूषणाःसर्वेसर्वेतेधूलिधूसराः ॥ ५९ ॥ प्रसंन्नवदनाःसर्वेसर्वेतेत्रिपुरांत

केदा० खं० ८ अ०३ ८

काः॥ सर्वे ते वृषभारूढाः सर्वे ते शस्त्रपाणयः॥६०॥ छत्रचामरसंवीताः सर्वे हरपराक्रमाः॥ एभिः समेतो हित
दा महात्मा स वीरभद्रो हरवेषभूषणः॥६१॥ सहस्रबाहुर्भुजगाधिपैर्वृतस्त्रिलोचनो भीमबलो भयान्वहः॥ नवा
नां च सहस्रे द्वे प्रमाणं स्यंदनस्य यत्॥६२॥ सिंहानां प्रयुतेनैव वाह्यमानं तुलस्य तत्॥ तथैव दंशिताः सिंहाः ब
हवः पार्श्वरक्षकाः॥६३॥ शार्दूला मकरा मत्स्या गजाश्चैव सहस्रशः॥ छत्राणि विविधान्येव चामराणि तथै
व च॥६४॥ तन्मूर्ध्नि ध्रियमाणानि सर्वतोग्राणि सर्वशः॥ तथा भेरीमहानादाः शंखाश्च विविधस्वनाः॥
॥६५॥ पटहा गोमुखाश्चैव शृंगाणि विविधानि च॥ ततानि विततान्येव घनानि सुषिराणि च॥६६॥ कलगानपराः
सर्वे सर्वे मृदंगवादिनः॥ अनेकतालसंयुक्ता वीरभद्राग्रतो भवन्॥६७॥ रणवादित्रनिर्घोषैर्जगर्जुरमितौ
जसः॥ तेन नादेन महता नादितं भुवनत्रयं॥६८॥ एवं सर्वे समायाता गणा रुद्रप्रणोदिताः॥ यज्ञवाटं च द
क्षस्य विनाशार्थं प्रहारिणः॥६९॥ रजसा चावृतं व्योम तमसा चावृता दिशः॥ सप्तद्वीपवती पृथ्वी चचा
ल गिरिकानना॥७०॥ तं दृष्ट्वा महदाश्चर्यं लोकक्षयकरं तदा॥ उत्तस्थुर्युगपत्सर्वे देवदैत्यनिशाचराः
॥७१॥ ते वै ददृशुरायांतीं रुद्रसेनां भयानकां॥ पृथ्व्यां केचित्समायाता गगने केचिदागताः॥७२
दिशश्च प्रदिशश्चैव समावृत्य तथापरे॥ अनंताख्यक्षयाः शूराः सर्वे रुद्रसमा युधि॥७३॥ ए
वंभूतं च तत्सैन्यं रुद्रैश्च परिवारितं॥ दृष्ट्वा चुर्विस्मिताः सर्वे चोत्थिताः शस्त्रपाणयः॥७४॥ इंद्रो

वस्येतेन रक्षिता॥ योनिंदति महादेवं निंद्यमानं शृणोति यः॥२१॥ तावुभौ नरकं यातः यावच्चंद्रदि
वाकरौ॥ तस्मात्त्यक्ष्याम्यहं देहं प्रवेक्ष्यामि हुताशनं॥२२॥ एवं चिंतयमाना सा शिवरुद्रेति
भाषिणी॥ अपमानाभिभूता सा प्रविवेश हुताशनं॥२३॥ यदा हुताशनं प्राप्ता सती सा शिवव
ल्लभा॥ द्वारस्थिता गणाः सर्वे हाहाकारपरा भवन्॥२४॥ हाहाकारेण महता व्याप्तमासीद्दि
गंतरं॥ सर्वे ते मंचमारूढाः शस्त्रैर्व्याप्तं दिगंतरं॥२५॥ शस्त्रैः स्वैर्जघ्नुरात्मानं स्वानि देहानि चिच्छि
दुः॥ केचित्करतलेग्रस्वाशिरांसि स्वानि चोत्कृकाः॥२६॥ नीराजयंत स्वरितं भस्मीभूतां तदा स
ती॥ एनं दक्षं कथं हन्मो ब्राह्मणं ब्रह्मवादिनं॥२७॥ अस्माभिस्तत्र गंतव्यं यत्र सा जननी गता
एवमुक्त्वा तदा सर्वे जगर्जुरतिभीषणं॥२८॥ शस्त्रप्रहारैः स्वांगानि चिच्छिदुरतिभीषणाः॥ तेन तथा विलयं प्रा
प्ता दाक्षायण्या समं तदा॥२९॥ गतास्तत्रायुते द्वे च तदद्भुतमिवाभवत्॥ ते सर्वे ऋषयो देवाः सेंद्राद्याः
समरुद्गणाः॥३०॥ विश्वेश्विनौ लोकपालास्तूष्णींभूतास्तदाभवन्॥ विष्णुं वरेण्यं केचिच्च प्रार्थयंतः
समंततः॥३१॥ एवंभूतस्तदा यज्ञो जातस्तस्य दुरात्मनः॥ दक्षस्य ब्रह्मबंधोश्च ऋषयो भय
मागताः॥३२॥ एतस्मिन्नंतरे विप्राः नारदेन महात्मना॥ कथितं सर्वमेवैतद्दक्षस्य च विचेष्टितं॥३३॥

हिगजमारूढः मृगारूढः सचंद्रमाः॥ यमोमहिषमारूढः स्वेनदंडेनसंयुतः॥ ७५॥ कुबेरः पुष्पकारूढः
पाशीमकरमेवच॥ अग्निर्बस्तंसमारूढो नैर्ऋतः प्रेतमेवच॥ ७६॥ तथान्येस्कुरसंघाश्चयक्षचारणगुह्य
काः॥ आरूढवाहनान्येवंस्वानिस्वानिध्रुतापिनः॥ ७७॥ तेषामुद्योगमालोक्यदक्षश्चाश्रुमुखस्तदा॥
दंडवत्पतितोभूमौसकलत्रोभ्यभाषत॥ ७८॥ युष्मद्बलेनैवमयायज्ञःप्रारंभितोमहान्॥ सत्कर्म
सिध्ययेयूयंप्रमाणंस्युर्महाप्रभाः॥ ७९॥ विष्णोत्वंकर्मणःसाक्षीयज्ञानांपरिपालकः॥ धर्मस्यवेदगर्भस्यब्र
ह्मण्यस्त्वंहिमाधव॥ ८०॥ तस्माद्दक्षाविघातव्यायज्ञस्यास्यममप्रभो॥ दक्षस्यवचनंश्रुत्वाप्रोवाचमधुसू
दनः॥ ८१॥ मयादक्षाविधातव्यंधर्मस्यपरिपालनं॥ तत्सत्यंचत्वयोक्तंहिकिंतुतस्यव्यतिक्रमः॥ ८२॥
जातस्त्वद्येवयज्ञस्ययत्त्वयोक्तंसदाशिवं॥ नैमिषेनिमिषक्षेत्रेतदाकिंनस्मृतंत्वया॥ ८३॥ योयंरुद्रो
महातेजायज्ञरूपस्सदाशिवः॥ यज्ञबाह्यःकृतोमूढतत्रदुर्मंत्रितंतव॥ ८४॥ रुद्रकोपात्त्वकोप्य
त्रसमर्थोरक्षणेतव॥ नपश्यामिचतंविप्रलांकुकर्मरतंतदा॥ ८५॥ किंकर्मकिमकर्मेतित
न्नपश्यसिदुर्मते॥ समर्थंकेवलंकर्मनभविष्यतिसर्वदा॥ ८६॥ सेश्वरंकर्मविध्येतत्समर्थत्वे
नजायते॥ नह्यन्यःकर्मणोदाताईश्वरेणविनाभवेत्॥ ८७॥ ईश्वरस्यचयेभक्ताःशांतास्तद्गतमानसाः
कर्मणोहिफलंतेषांप्रयच्छतिसईश्वरः॥ ८८॥ केवलंकर्मचाश्रित्यह्यनीश्वरपराजनाः॥ निरयंतेचगच्छं
ति॥ पुनःकर्ममयैःपाशैःबध्याजन्मनिजन्मनि॥ निरयेषुप्रपच्यंतेकेवलंकर्मरूपिणः॥ ९०॥ ॥
कल्पकोटिशतैरपि॥ ८९॥

केदारखं० इतिश्रीपद्मपुराणेकेदारखंडेशैवशास्त्रेतृतीयोध्यायः ॥३॥ लोमशउवाच ॥ विष्णुनोक्तंवचः श्रुत्वादक्षो अ०४
वचनमब्रवीत् ॥ वेदनामप्रमाणंचकृतंतेमधुसूदन ॥१॥ वैदिकंकर्मचोत्सृज्यकथंसेश्वरतांव्रजेत् ॥ त
९ दुच्यतांमहाविष्णोयेनधर्मः प्रतिष्ठितः ॥२॥ दक्षेणोक्तोमहाविष्णुःस्वाचपारिसांत्वयन् ॥ त्रैगुण्य
विषयावेदाः संभवंतिनचान्यथा ॥३॥ ईश्वरेणविनाकर्तुंकिंचित्कर्मनपार्यते ॥ वेदशास्त्राणिसर्वाणि
अन्यानिचबहूनिच ॥४॥ विष्णोज्ञातानितान्येवईश्वरेणविनाकथं ॥ सफलानिभविष्यंतिविफलान्येव
तानितु ॥५॥ तस्मात्सर्वप्रयत्नेनईश्वरंशरणंव्रज ॥ एवंब्रुवतिगोविंदेआगतः सैन्यसागरः ॥६॥ वीरभद्रे
णसहितोरुद्रस्तुस्तेस्सुरासुराः ॥ इंद्रोपिप्रहसन्विष्णुमात्मवादरतंतदा ॥७॥ वज्रपाणिः सुरैः सार्धंयो
द्धुकामोभवत्तदा ॥ भृगुणाचोदितः शीघ्रमुच्चाटनपरेणहि ॥८॥ तदागणाः सुरैः सार्धंयुयुधुस्तेमहा
बलाः ॥ प्रासतोमरनाराचैर्जघ्नुस्तेचपरस्परं ॥९॥ नेदुः शंखाश्चभेर्यश्चतस्मिन्रणमहोत्सवे ॥ तथा
दुंदुभयोनेदुः पटहाडिंडिमादयः ॥१०॥ तेनशब्देनमहताश्लाघ्यमानास्तदासुराः ॥ लोकपालैश्चसहि
ताजघ्नुस्तान्शिवकिंकरान् ॥११॥ खड्गैश्चापिहताः केचिद्गदाभिर्विनिपोथिताः ॥ देवैः पराजिताः स ९
र्वेगणाः शतसहस्रशः ॥१२॥ इंद्राद्यैर्लोकपालैश्चगणास्तेचपराङ्मुखाः ॥ कृताश्चतत्क्षणादेवभृ

केदारखं० कुपिताश्चमहाभागाः सानुरोषंप्रकुर्वते ॥ २८ ॥ एवंबृहस्पतेर्वाक्यंश्रुत्वातेपिदिवौकसः ॥ चिंतामापेदिरेसर्वे
परि लोकपालाःसवासवाः ॥ २९ ॥ ततोब्रवीद्वीरभद्रोगणैर्वृतोभ्रशं ॥ सर्वेयूयंबालिशत्वादवदानार्थमागताः ॥ ३० ॥ अ
१० वदानंप्रयछामित्यागछध्वंममांतिकं ॥ हेइंद्रहेसरवेभानोहेशशिनहेधनाधिप ॥ ३१ ॥ हेपाशपाणेहेमरुत्ो एहित्वंय
मुनाग्रज ॥ अवदानानिदास्यामितृप्त्यर्थंभवतामहं ॥ ३२ ॥ एवमुक्त्वासितैर्बाणैर्जघानाथरुषान्वितः ॥ तैर्बाणैर्नि
हताःसर्वेजग्मुस्तेचदिशोदश ॥ ३३ ॥ गतेषुलोकपालेषुविद्रुतेषुसुरेषुच ॥ यज्ञवाटंसमायातोवीरभद्रोगणान्वि
तः ॥ ३४ ॥ तदातेऋषयःसर्वेविष्णुंसर्वेश्वरेश्वरं ॥ विज्ञप्तुकामाःसहसाऊचुःसर्वेनताभृशं ॥ ३५ ॥ रक्षयज्ञंहि
दक्षस्ययज्ञोसित्वंनसंशयः ॥ एतच्छ्रुत्वातुवचनंऋषीणांवैजनार्दनः ॥ ३६ ॥ योद्धुकामःस्थितोविष्णुःवीरभद्रं
सं महाबलं ॥ योगिनीचक्रसंयुक्तंतथाप्रमथैर्युतं ॥ ३७ ॥ छत्रेश्चचामरैश्चैवसंवृतंचमहद्भुतं ॥ केचिद्गणावृषारूढाःसिंहारू
ढास्तथापरे ॥ ३८ ॥ अपरेखरखगारूढाःशार्दूलोपरिसंस्थिताः ॥ एभिःसर्वैस्तदादृष्टोविष्णूरध्यात्मदीपकः ॥
३९ ॥ वीरभद्रोमहाबाहुःकेशवंवाक्यमब्रवीत् ॥ अत्रत्वमागतःकस्मात्तन्नविद्महेवयं ॥ ४० ॥ दक्षस्यपक्ष
पातीत्वंकथंजातोसिमाधव ॥ दाक्षायण्याकृतंयच्चनदृष्टंकिंत्वयानघ ॥ ४१ ॥ त्वंचापियज्ञेदक्षस्यअ
वदानार्थमागतः ॥ अवदानंप्रयछामितवचापिमहाभुज ॥ ४२ ॥ एवमुक्त्वाप्रणम्यादौविष्णुंरुद्रस्वरूपिणं ॥ १०
वीरभद्रोग्रतोभूत्वानत्वावाक्यमथाब्रवीत् ॥ ४३ ॥ यथाशंभुस्तथात्वंहिममनास्त्यत्रसंशयः ॥ तस्य

तथात्वंहिमाहाबाहोयोद्धुकामोग्रतःस्थितः ॥ ४४ ॥ नेष्याम्यपुनरावृत्तिंयदितिष्ठेस्त्वमात्मना ॥ तस्यतद्वचनं
श्रुत्वावीरभद्रस्यधीमतः ॥ ४५ ॥ उवाचप्रहसन्देवोविष्णुःसर्वेश्वरेश्वरः ॥ विष्णुरुवाच ॥ रुद्रतेजःप्रसू
तोसिपवित्रोसिमहामते ॥ ४६ ॥ अनेनप्रार्थितःपूर्वंयज्ञार्थंतुपुनःपुनः ॥ दक्षेणाविदितार्थेनकर्मनिष्ठेनचैव
हि ॥ ४७ ॥ अहंभक्तपराधीनस्तथात्वमपिमहेश्वरः ॥ अनेनकारणेनात्रदक्षस्ययजनंप्रति ॥ ४८ ॥ आगतो
हंवीरभद्ररुद्रकोपसमुद्भव ॥ अहंनिवारयामित्वांत्वंचमांवानिवारय ॥ ४९ ॥ इत्युक्तवतिगोविंदेप्रहस्य
सनहाभुजः ॥ प्रश्रयावनतोभूत्वाइदमाहजनार्दनं ॥ ५० ॥ यथाशिवस्तथात्वंहियथात्वंचतथाशिवः ॥ से
वकाश्चवयंसर्वेतववाशंकरस्यच ॥ ५१ ॥ तच्छ्रुत्वावचनंतस्यवीरभद्रस्यधीमतः ॥ प्रहस्यचइदंवाक्यंजगा
दपरमेश्वरः ॥ ५२ ॥ युद्धंकुरुमहाबाहोमयासार्धमशंकितः ॥ तवास्त्रैःपूर्यमाणोहंगछामिभवनंस्वकं
॥ ५४ ॥ तथेत्युक्त्वातुवीरोसौवीरभद्रोमहाबलः ॥ गृहीत्वापरमास्त्राणिसिंहनादैर्जगर्जहि ॥ ५५ ॥ विष्णु
श्चापिमहाघोषंशंखंदध्मौप्रतापवान् ॥ तच्छ्रुत्वायेगतादेवाःरणंहित्वाययुःपुनः ॥ ५६ ॥ युद्धंचक्रुस्तदास
र्वेलोकपालाःसवासवाः ॥ तदेंद्रेणाहतोनंदीवज्रेणशतपर्वणा ॥ ५७ ॥ नंदिनाचाहतःशक्रस्त्रिशूलेन
स्तनांतरे ॥ वायुनाचाहतोभृंगीभृंगिणावायुराहतः ॥ ५८ ॥ शूलेनशितधारेणतथासावश्मनाहतः ॥

हा

केदारखंड · यमेनसहसंग्रामेमैकालोबलान्वितः॥५९॥कुबेरेणचसंगम्यकूष्मांडानांपतिःस्वयं॥वरुणेनसमंयुद्धमुंड
श्चैवमहाबलः॥६०॥युयुधेपरयाशक्त्यात्रैलोक्यंविस्मयन्निव॥नैर्ऋतेनसमागम्यचंडश्चबलवत्तरः॥६१ अ०४
११ युयुधेपरमास्त्रेणनैर्ऋतंचविडंबयन्॥योगिनीचक्रसंयुक्तोभैरवोनायकोमहान्॥६२॥विदार्यदेवानखिला
न्नृपपौतेषांचशोणितं॥क्षेत्रपालस्तथाचान्येभूतप्रमथगुह्यकाः॥६३॥शाकिनीडाकिनीरौद्रानवदुर्गास्त
थैवच॥योगिन्योयातुधानाश्चतथाकूष्मांडकादयः॥६४॥नेदुःपपौशोणितंचबुभुजुःपिशितंबहु॥भक्ष्य
माणंतदासैन्यंविलोक्यसुरराट्स्वयं॥६५॥विहायनंदिनंपश्चाद्वीरभद्रंसमाक्षिपत्॥वीरभद्रोविहाये
वविष्णुंदेवेंद्रमास्थितः॥६६॥तयोर्युद्धमभूद्घोरंबुधांगारकयोरिव॥वीरभद्रेयदाशक्रोहंतुकामस्त्वरान्वितः॥६७
तावच्छक्रंगजस्थंहिपूरयामासमार्गणैः॥वीरभद्रो रुषाविष्टोदुर्निवार्योमहाबलः॥६८॥तदेंद्रेणहतःशीघ्रं
वज्रेणशतपर्वणा॥सगजंसकजंचवासवंग्रस्तुमुद्यतः॥६९॥हाहाकारोमहानासीद्भूतानांतत्रपश्यतां॥
वीरभद्रंतथाभूतंहंतुकामंपुरंदरं॥७०॥त्वरमाणस्तदाविष्णुर्वीरभद्राग्रतोभवत्॥शार्ङ्गंचपृष्ठतःकृत्वायोधैमा
स्त्वैतदा॥७१॥वीरभद्रस्यविष्णोश्चयुद्धंपरमभूत्तदा॥शस्त्रास्त्रैर्विविधाकारैर्योधयामासतुस्तदा॥७२॥ या
पुनर्नंदिनमालोक्यशक्रोयुद्धविशारदः॥द्वंद्वयुद्धंतुमुलंदेवानांप्रमथैःसह॥७३॥प्रमथामथितादे ११

गोर्मंत्रबलेनहि॥उच्चाटनंकृतंतेषांभृगुणायज्वनातदा॥यजनार्थंचदेवानांतुष्ट्यर्थंदीतैस्यच॥७४॥तेनैवदेवा
जयिनोजातास्तत्क्षणमेवहि॥तेषांपराजयंदृष्ट्वावीरभद्रोरुषान्वितः॥७५॥भूतान्प्रेतान्पिशाचांश्चकृत्वा श्रि
तानेवपृष्ठतः॥वृषभस्तीनूपुरस्कंधस्यस्वयंचैवमहाबलः॥७६॥तीक्ष्णंत्रिशूलमादायपातयामासतान्रु
ले॥देवान्यक्षान्पिशाचांश्चयुयुधेकान्राक्षसांस्तथा॥७७॥शूलघातैश्चतेसर्वेगणादेवान्प्रजघ्निरे॥
केचिद्द्विधाकृताःखड्गैःमुद्गरैश्चापिपोथिताः॥७८॥परश्वधैःखंडशश्चकृताःकेचिद्रणाजिरे॥शूलै
र्भिन्नाश्चशरैःकेचित्तेशकलीकृताः॥७९॥एवंपराजिताःसर्वेपलायनपरायणाः॥परस्परं
रिसज्यगतास्तेपित्रिविष्टपं॥८०॥केवलंलोकपालास्तेइंद्राद्यास्तस्थुरुत्सुकाः॥बृहस्पतिंपृच्छमानाः
कुतोस्माकंजयोभवत्॥८१॥बृहस्पतिरुवाचेदंमहेंद्रंत्वरितेनहि॥यदुक्तंविष्णुनापूर्वंतत्सत्यंजातम
द्यवै॥८२॥आस्तिवेदीश्वरःकश्चित्फलरूपस्यकर्मणः॥कर्तारंभजतेसोपिनस्वकर्तुंप्रभुर्हिसः॥८३॥न
मंत्रौषधयःसर्वेनाभिचारानलौकिकाः॥नकर्माणिनवेदाश्चनमीमांसाद्वयंतथा॥८४॥ज्ञातुमीशंसंभ
वंतिभक्त्यालभ्यस्त्वनन्यथा॥शांत्याचपरयातुष्ट्याज्ञातव्योहिसदाशिवः॥८५॥तेनसर्वंसंभवतिसुख
दुःखात्मकंजगत्॥परंतुसंवदिष्यामिकार्याकार्यविचक्षण॥८६॥त्वमिंद्रबालिशोभूत्वालोकपालैः
सहाद्यवै॥आगतोलोलुपोभूत्वाइदानींकिंकरिष्यसि॥८७॥एतेरुद्रसहायाश्चगणाःपरमशोभनाः॥

यैःसर्वेतेविमुखीकृताः॥विमुखान्प्रमथान्दृष्ट्वासर्वेतेव्याधयोभ्रत्रां॥७४॥रुद्रकोपात्समुद्भूताःदेवां
श्चापिप्रदुद्रुवुः॥ज्वरैःस्म्पीडितांन्देवान्दृष्ट्वाविष्णुर्हसन्निव॥७५॥जीवग्राहेणजग्राहज्वरांस्तां
श्चपृथक्पृथक्॥देवोश्विनौसमाहूयव्याधीन्सर्वांस्तथाभ्रत्रां॥७६॥दत्वाताभ्यांप्रयत्नेनगणयित्वा
सबुधिमान्॥ज्वरांश्चसन्निपातांश्चअन्यान्भ्रतद्रुहस्तथा॥७७॥तान्सर्वान्संगृहीत्वाथअश्विनौचमुदा
न्वितौ॥विज्वरानथदेवांश्चकृत्वामुमुदतुश्चिरं॥७८॥तेर्जितंयोगिनीचक्रंभैरवाव्याकुलीकृताः॥ती
क्ष्णाग्रैःपातयामासुःशरैर्भूतगणानपि॥७९॥एवंविद्रावितंसैन्यंविलोक्यपतितंभुवि॥वीरभ
द्रोरुषाविष्टोविष्णुंवचनमब्रवीत्॥८०॥त्वंशूरोसिमहाबाहोदेवानांपालकोह्यसि॥युध्यस्वमां
प्रयत्नेनयदितेमतिरीदृशी॥८१॥इत्युक्त्वातंसमासाद्यविष्णुंसर्वेश्वरेश्वरं॥ववर्षनिशितैर्बा
णैर्वीरभद्रोमहाबलः॥८२॥तदाचक्रेणभगवान्वीरभद्रंजघानह॥आगतंचक्रमालोक्य
ग्रसितंतत्क्षणाच्चतत्॥८३॥ग्रसितंचक्रमालोक्यविष्णुःपरपुरंजयः॥मुखंतस्यपरामृश्यविष्णु ज
नोद्गीलितंपुनः॥८४॥स्वचक्रमादायमहानुभावोदिवंगतोसौभुवनैकभर्त्ता॥ज्ञात्वाथतत्सर्वमिदं
चविष्णुःसतीकृतंदुःप्रसहंपरेषां॥८५॥इतिस्कंदपुराणेकेदारखंडेरौवरास्त्रेचतुर्थोध्यायः॥४॥

 लोमशउवाच॥ विष्णोगतेतदासर्वेदेवाश्चऋषिभिःसह॥ निर्जिताश्चगणैःसर्वेयेन्येयज्ञोपजीविनः॥ अ०५
१॥ भृगुंचपातयित्वाथश्मश्रूणांलुंठनंकृतं॥ द्विजांश्चोत्पाटयामासकःपूष्णोविकृतविक्रियान्॥ २॥ बद
नाश्पाटयामासगणाःप्रकुपिताभृशं॥ विडंबितास्वधातत्रस्वाहाचैवविडंबिता॥ ३॥ वसुषुस्तेपुरीषे
१२ णवितानाग्निंरुषान्विताः॥ अनिर्वाच्यंतदाचक्रुर्गणास्तेक्रोधमूर्छिताः॥ ४॥ अंतर्वेद्यंतंगतोदक्षोवैभ र
हृतोभयात्॥ तन्निमित्तंसमाज्ञा य आनिनायरुषान्वितः॥ ५॥ कपालेषुगृहीत्वातंखड्गेनोपहृतं
शिरः॥ अवध्यंतच्छिरोमत्वावीरभद्रःप्रतापवान्॥ ६॥ स्कंधोपद्भ्यांमाक्रम्यकंधरेपीडितंतदा॥ कं स
धरात्पीड्यमानाच्चशिरश्छिन्नंदुरात्मनः॥ ७॥ दक्षस्यचतदातेनवीरभद्रेणधीमता॥ तच्छिरःसंहुतंकुं
डेज्वलितंतत्क्षणादिव॥ ८॥ येन्येचऋषयोदेवाःपितरोयक्षराक्षसाः॥ गणैरुपद्रुताःसर्वेपलायनपराय
युः॥ ९॥ चंद्रादित्यगणाःसर्वेग्रहनक्षत्रतारकाः॥ सर्वेविस्खलिताह्यासन्गणैस्तेपिह्युपद्रुताः॥ १०॥ स
त्यलोकंगतोब्रह्मापुत्रशोकेनपीडितः॥ चिंतयामासचाव्यग्रःकिंकार्यंकार्यमद्यवै॥ ११॥ मनसाद्यूय १२
मानेनशर्मलेभेपितामहः॥ ज्ञात्वासर्वंप्रयत्नेनदुःखितस्यैस्तैःपापिनः॥ १२॥ गमनायमतिंचक्रेकैलासंपर्वतंप्र
ति॥ हंसारूढोमहातेजाःसर्वदेवैःसमन्वितः॥ १३॥ प्रविष्टःपर्वतश्रेष्ठंसददर्शसदाशिवं॥ एकांतवासिनंरुद्रं

न्येबहवस्तत्रयक्षगंधर्वकिन्नराः॥२९॥त्रोटितालुंठिताश्चैवमृताःकेचिद्रणाजिरे॥शंभुंसमागतंदृष्ट्वावीरभ
द्रोगणैःसह॥३०॥दंडप्रणामंकृत्वातुतस्थावग्रेसदाशिवः॥दृष्ट्वापुरःस्थितंरुद्रोवीरभद्रंमहाबलं॥३१॥उ
 वाचप्रहसन्वाक्यंकिंकृतंचत्वयाधुना॥दक्षमानयशीघ्रंभोयेनेदंकृतमीदृशं॥३२॥यज्ञंवित्तक्षणं
तातयेनेदंफलमीदृशं॥एवमुक्तःशंकरेणवीरभद्रस्त्वरान्वितः॥३३॥कबंधमानयित्वाथशंभोरग्रेतथा
क्षिपत्॥तथोक्तःशंकरेणैववीरभद्रोमहामनाः॥३४॥शिरःकेनापिनीतंचदक्षस्यचदुरात्मनः॥दास्या
मिजीवितंवीरकुटिलस्यापिचाधुना॥३५॥एवमुक्तःशंकरेणवीरभद्रोब्रवीत्पुनः॥मयाहुतंशिरश्चास्य
तदानीमेवशंकर॥३६॥इतिज्ञात्वाततोरुद्रःकबंधस्योपरिक्षिपत्॥शिरःपशोश्चाविकृतंकूर्चयु
क्तंभयावहं॥३७॥सदक्षोजीवितंलेभेप्रसादाच्छंकरस्यच॥दृष्ट्वाग्रेतंतदारुद्रंदक्षोलज्जासमन्वितः॥३८
तुष्टावप्रणतोभूत्वाशंकरंलोकशंकरं॥दक्षउवाच॥नमामिदेवंवरदंवरेण्यंनमामिदेवंप्रवरंसनातनं
॥३९॥नमामिदेवाधिपमीश्वरंहरंनमामिशंभुंजगदेकबंधुं॥नमामिविश्वेश्वरविश्वरूपंसनातनं
ब्रह्मनिजात्मरूपं॥४०॥नमामिशर्वंनिजभावभावंवरंवरेण्यंवरदंनतोस्मि॥दक्षेणरुद्रःसंतुष्टोब
भाषेप्रहसन्हरः॥४१॥चतुर्विधाभजंतेमांजनाःसुकृतिनःसदा॥आर्तोजिज्ञासुरर्थार्थीज्ञा
निनश्चैवदुर्लभाः॥४२॥तस्मान्मेज्ञानिनःसर्वेप्रियाःस्युर्नात्रसंशयः॥विनाज्ञानेनमांप्राप्तुंश

क्यंभोद्विजोत्तम॥४३॥केवलंकर्मणात्वंहिसंसारंतर्तुमिच्छसि॥नवेदैश्चनयज्ञैश्चनदानैस्तपसाक्वचित्॥
४४॥नराःकुर्वंतिमांप्राप्तुंमूढाःकर्मवशानराः॥तस्माज्ज्ञानपरोभूत्वाकुरुकर्मसमाहितः॥४५॥सु
खदुःखसमोभूत्वासुखीभवनिरंतरं॥उपदिष्टस्तदातेनशंभुनापरमेष्ठिना॥४६॥दक्षंतत्रैवसंस्थाप्यययौ
रुद्रःस्वपर्वतं॥ब्रह्मणापितथासर्वेभृग्वाद्याश्चमहर्षयः॥४७॥आश्वासिताबोधिताश्चज्ञानिनश्चाभवन्
क्षणात्॥४८॥गतःपितामहोब्रह्मागतःशक्रःसदनंस्वकं॥दक्षोपिशिववाक्याद्वैपरंबोधमुपागतः॥ ता
४९॥शिवध्यानपरोभूत्वातपस्तेपेमहामनाः॥तस्मात्सर्वप्रयत्नेनसंसेव्योभगवान्भवः॥५०॥संमा
र्जनंचकुर्वंतिनरायेचशिवांगणे॥तेवैशिवपुरंप्राप्यजगद्वंद्याभवंतिच॥५१॥येशिवायप्रयच्छंति
दर्पणंतेमहाप्रभाः॥भविष्यंतिशिवस्याग्रेपार्षदत्वेनतेनराः॥५२॥चामरंयेप्रयच्छंतिदेवदेव
स्यशूलिनः॥चामरैर्वीज्यमानास्तेभविष्यंतिजगत्त्रये॥५३॥दीपप्रदानंकुर्वंतिमहादेवालये
नराः॥तेजस्विनोभविष्यंतिचोद्धरंतिकुलद्वयं॥५४॥उपहारंप्रयच्छंतिभक्त्यापरमयायुताः
सिक्थेसिक्थेक्रतुफलंप्राप्नुवंतिहितेनराः॥५५॥भग्नंशिवालयंयेचसमुद्धरंतिनरोत्तमाः॥
प्राप्नुवंतिफलंतेवैद्विगुणंनात्रसंशयः॥५६॥नूतनंयेप्रकुर्वंतिइष्टकैश्चाश्मनापिवा॥स्वर्गे

केदारखंड॰ हितेषमोदंतेयावच्चंद्रदिवाकरौ॥५७॥कारयंतिचयेविप्राः प्रासादंबकुभमिकं॥शिवस्याथमहाप्राज्ञाः अ.५
प्राप्नुवंतिपरांगतिं॥५८॥सुधाधवलितंयेहिकुर्वंतिशिवमंदिरं॥स्वीयंपरकृतंवापिप्रयांतिपरमांग
तिं॥५९॥रंगवल्लीःप्रकुर्वंतियेनराश्चशिवांगणे॥तद्रूपेणभविष्यंतिशिवलोकंपरंगताः॥६०॥विता
३४ नंयेप्रयच्छंतिनराःसुकृतिनोपिहि॥आरभेतकुलंकृत्स्नंशिवलोकेनसंशयः॥६१॥येचनादमयींघं
टांबध्नंतिशिवमंदिरे॥तेजस्विनःकीर्तिमंतोभविष्यंतिजगत्त्रये॥६२॥एककालंद्विकालंवात्रिकालंवापि
पश्यति॥आढ्योवापिदरिद्रोवासर्वदुःखात्प्रमुच्यते॥६३॥श्रद्धावान्भजतेयोवैशिवंहैमवतीपतिं
कुलकोटिंसमुध्धृत्यशिवेनसहमोदते॥६४॥अत्रैवोदाहरंतीममितिहासंपुरातनं॥इंद्रद्युम्नस्यसं
वादंयमस्यचमहात्मनः॥६५॥पुराकृतयुगेह्यासीदिंद्रद्युम्नोनराधिपः॥प्रतिष्ठाधिपतिर्वीरोमृगया
रसिकःसदा॥६६॥अब्रह्मण्यःसदाक्रूरःकेवलाकृतपोमहान्॥परप्राणैर्निजप्राणान्पुष्णातिसख नि
लःसदा॥६७॥परस्त्रीलंपटोसंतंपरद्रव्येषुलोलुपः॥ब्राह्मणाघातितायेनसुरापश्चनिरंतरं॥६८॥गुरु
तल्पगतोर्थंसदासौवर्णतस्करः॥तस्यानुगास्तथाभृताराज्ञस्तस्यदुरात्मनः॥६९॥एवंबहुलि १४
थंराज्यंचकारसदुरात्मवान्॥ततःकालेनमहतापंचत्वंप्राप्तदुर्मतिः॥७०॥तदाग्रेषश्चनीतोसौ या

शैलादेनसमन्वितं॥१४॥कपर्दिनांश्रियायुक्तंवेदवेदांगदुर्लभं॥तथाविधंसमालोक्यब्रह्माक्षोभपरोभवत्॥
१५॥दंडवत्पतितोभूमौक्षमापयितुमुद्यतः॥संस्पृशंस्तत्पदाब्जंचचतुर्मुकुटकोटिभिः॥१६॥स्तुतिंकर्तुं
समारेभेरुद्रस्यपरमात्मनः॥ब्रह्मोवाच॥नमोस्तुरुद्रायशांतायब्रह्मणेपरमात्मने॥१७॥कपर्दिनेमहेशाय
ज्योत्स्नायमहतेनमः॥त्वंहिविश्वस्रजांस्रष्टाधातात्वंप्रपितामहः॥१८॥नमोरुद्रायमहतेनीलकंठायवे
धसे॥विश्वायविश्वबीजायविश्वावयवसाक्षिणे॥१९॥महेशायनमस्तुभ्यंजगदानंदहेतवे॥ॐकार
स्त्वंवषट्कारःसर्वारंभप्रवर्तकः॥२०॥यज्ञोसियज्ञकर्तासियज्ञानांचप्रवर्तकः॥त्वयाकथंयज्ञभंगःकृ
तोदेववरप्रभो॥२१॥अब्रह्मण्योसिभवान्देवसर्वेषांप्राणिनांप्रभो॥ब्रह्मण्योसिमहादेवपुत्रशोकेन
पीडितं॥२३॥×कथंदक्षस्त्वयाहतः॥गवांचब्राह्मणानांचरुद्रत्वंपरिपालकः॥२२॥शरण्योसिमहादेव
रक्षरक्षमहादेवदक्षंजीवयसत्वरं॥ईश्वरउवाच॥शृणुष्वावहितोभूत्वाममवाक्यंपितामह॥२४॥दक्षस्य
यज्ञभंगोयंनकृतश्चमयाक्वचित्॥स्वीयेनकर्मणादक्षोहतोब्रह्मन्नसंशयः॥२५॥परेषांक्लेशदं
कर्मनकार्यंतुकदाचन॥परस्यमन्यतेयोयदात्मनस्तद्भविष्यति॥२६॥एवमुक्त्वातदारुद्रोब्रह्मणा
सहितैःसुरैः॥ययौकनखलेतीर्थेयज्ञवाटंप्रजापतेः॥२७॥रुद्रस्तदाददर्शाथवीरभद्रेणयत्कृतं॥
स्वाहास्वधातथापूषाभृगुर्मतिमतांवरः॥२८॥तथान्येऋषयःसर्वेपितरश्चतथाविधाः॥येचा

इंद्रद्युम्नोदुरात्मवान्॥ यमांतिकमनुप्राप्यधर्मस्थानमनुत्तमं॥ ७१॥ यमेनदृष्टस्तत्रासौइंद्रद्युम्नोगतःस्थितः॥
अभ्युत्थानपरोभूत्वाननामशिरसास्वयं॥ ७२॥ दूतान्संभर्त्सयामासयमोधर्मभृतांवरः॥ पाद्यार्घ्यंचेंद्रद्यु
म्नंमुक्त्वाप्रोवाचधर्मराट्॥ ७३॥ गच्छपुण्यकृतांल्लोकान्भुंक्ष्वराजन्यसत्तम॥ यावदिंद्रश्चसोमश्चयावत्सू
र्योनभस्तले॥ ७४॥ पंचभूतानियावच्चतावत्त्वंचसुखीभव॥ सुकृतीत्वंमहाराजशिवभक्तोसिनित्यदा॥ ७५
यमस्यवचनंश्रुत्वाइंद्रद्युम्नोभ्यभाषत॥ अहंशिवंनजानामिनोमृगयारसिकोयम॥ ७६॥ तच्छ्रुत्वावचनंत
स्ययमोवाक्यमथाब्रवीत्॥ आहरस्वेतिप्रहरउत्वंचेदंसदात्वया॥ ७७॥ तेनकर्मविपाकेनसदापूतोसि
मानद॥ तस्मात्त्वंगच्छकैलासंपर्वतंशंकरप्रियं॥ ७८॥ एवंसंभाषमाणस्ययमस्यचमहात्मनः॥ आया
ताःशिवभक्तास्तेवृषारूढाःमहाप्रभाः॥ ७९॥ नीलकंठादशभुजापंचवक्त्रास्त्रिलोचनाः॥ कपर्दिनःकुंड
लिनःचंद्रांकांकितमौलयः॥ ८०॥ तान्दृष्ट्वासहसोत्थाययमोधर्मभृतांवरः॥ पूजयामासतान्सर्वान्
महेशप्रतिमांस्तदा॥ ८१॥ ब्ररितेनैवतेसर्वेऊचुर्वैवैस्वतंयमं॥ अत्रागतोमहाभागइंद्रद्युम्नोमितद्युतिः॥
८२॥ नाम्नाप्रवर्तकोनित्यंरुद्रस्यचमहात्मनः॥ श्रुत्वातुवचनंतेषांयमेनचपुरस्कृतः॥ ८३॥ इंद्रद्युम्नो
विमानस्थःप्रेषितोहिशिवालयं॥ आनीतोयंतदातैश्चपार्षदप्रवरोत्तमैः॥ ८४॥ शंभुनाहितदादृष्टस्त्वं

महेशान्नापरो देवो दृश्यते भुवनत्रये ॥ तस्मात्सर्वप्रयत्नेन पूजनीयो हि शंकरः ॥८४॥ ५

केदारखंड- द्युम्नो महाद्युतिः ॥ अभ्युत्थाय गतो रुद्रः परिष्वज्य तदा नृपं ॥८५॥ अर्धासनगतं कृत्वा इंद्रद्युम्नं वचोऽब्रवीत् ॥ अ०५
श्रे किं सत्कृत्यं नृपश्रेष्ठ प्रयच्छामि तवेप्सितं ॥८६॥ इति श्रुत्वा वचस्तस्य महेशस्य तदा नृपः ॥ आनंदाश्रुकणान्मुंचन्प्रेम्णा
नोवाच किंचन ॥८७॥ तदाकृतो महेशेन पार्षदो हि महात्मना ॥ चंडो नाम्नेति विख्यातो मुंडस्य च सखा प्रियः ॥
१५ ८८ ॥ आहर प्रहरस्वेति नाम्ना शंभोर्महात्मनः ॥ निरयार्हः क्षितिमापदिंद्रद्युम्नो नराधिपः ॥ नामोच्चारणमात्रे
ण रुद्रस्य परमात्मनः ॥ रक्षिता बहवो मर्त्याः शिवेन परमात्मना ॥९०॥ पत्रैः पुष्पैः फलैर्वापि जलैर्वा विमलैः
शुभैः ॥ करवीरैः पूज्यमानः शंकरो वरदो भवेत् ॥ ९१॥ करवीराद्दशगुणमर्कपुष्पं विशिष्यते ॥ अर्कपुष्पा
द्दशगुणं बृहतीपुष्पमुच्यते ॥९२॥ बृहत्या दशगुणं पुष्पे धत्तूरस्य विशिष्यते ॥ चंपकं नागपुष्पं च कल्हारं च वि
शिष्यते ॥९३॥ नीलोत्पलं च कल्हारं सहस्रेण विशिष्यते ॥ एतानि पुष्पाणि महार्हणानि शिवप्रियाण्येव
शिवार्चनार्थे ॥९४॥ दिवा च रात्रौ त्वथ मध्यकाले भवंति पुष्पाण्यथ शोभनानि ॥ विभूत्या हि युतं सर्वं जग
देतच्चराचरं ॥९५॥ शिवस्यांगप्रसूता यत्तस्मात्तां पूजयेत्सदा ॥ त्रिपुंड्रेण च यत्पुण्यं तच्छृणुष्व द्विजोत्त
माः ॥९६॥ तस्करोपि महापापो घातितो राजदूतकैः ॥ तं खादयितुमायातो श्वा शिरस्कपरिस्थितः ॥ ९७
नखांतरालसंलग्ना रक्षा तस्यैव पापिनः ॥ ललाटे पतिता सद्यः त्रिपुंड्रांतिकमुद्रया ॥९८॥ चैतन्येन १५
विना तस्य देहमात्रे कलग्नया ॥ कैलासं तस्करो नीतो रुद्रदूतैस्ततस्तदा ॥९९॥ विभूतेर्महिमानं च

 तस्माच्छिवमयंसर्वंज्ञातव्यंचविशेषतः॥वेदैःशास्त्रैःपुराणैश्चतथोपनिषदैरपि॥१६॥आगमैर्विविधैःशंभुर्ज्ञात
व्योनात्रसंशयः॥निष्कामैश्चसकामैश्चपूजनीयःसदाशिवः॥१७॥कथयामिपुरावृत्तमितिहासंपुरातनं॥नंदि
नामापुरावैश्यःअवंतिपुरमावसत्॥१८॥शिवभक्तियुतोभूत्वाशिवपूजांचकारसः॥नित्यंतपोवनस्थंहिलिंग
१६ मेकंसदार्चयत्॥१९॥उषस्युषसिचोत्थायप्रत्यहंशिववल्लभः॥नंदीलिंगार्चनरतोबभूवातिशयेनहि॥२०॥
लिंगंपंचामृतेनैवयथोक्तेनाभ्यषेचयत्॥विप्रैःसमावृतोनित्यंवेदवेदांगपारगैः॥२१॥यथाशास्त्रेणवि
धिनापुष्पार्चनपरोभवत्॥मुक्ताफलैरिंद्रनीलैःपाविकैःस्मामरक्तकैः॥२२॥विद्रुमैःपद्मरागैश्चगोमेदै
श्चनिरंतरं॥वैडूर्यैःश्वेतनीलैश्चमाणिक्यैश्चतथार्चयत्॥२३॥एवंनंदीमहाभागोबहूनब्दानथार्चयत्॥विजन
स्थंतथालिंगंनानाभोगसमन्वितं॥२४॥एकदामृगयासक्तःकिरातोभूतहिंसकः॥पापीपापसमाचारोविं च
ध्यगिरिकंदरे॥२५॥अनेकश्वापदाकीर्णेहनमानइतस्ततः॥यदृच्छयागतस्तत्रयत्रलिंगंसुपूजितं॥२६॥उद
कंवीक्षमाणोसौतृष्णयापीडितोभृशं॥तपोवनेसरस्तत्रदृष्ट्वातोयंसमाविशत्॥२७॥गंडूषोछादनंकृत्वापी
त्वातोयंविनिर्गतः॥शिवालयंददर्शाग्रेअनेकाश्चर्यमंडितं॥२८॥दृष्ट्वंसुपूजितंलिंगंनानात्लैःपृथक्पृथक्
तथालिंगंसमालक्ष्यपदापूजांसमाहनत्॥२९॥रत्नानितानिसर्वाणिविधूतानिइतस्ततः॥स्नपनंतस्य र
लिंगस्यकृतंगंडूषवारिणा॥३०॥करेणैकेनपूजार्थंबिल्वपत्राणिसोर्पयत्॥द्वितीयेनकरेणैवमृग १६

मांसंतथार्पयत्॥३१॥दंडप्रणामसंयुक्तंसंकल्प्यंमनसाकरोत्॥अद्यप्रभृतिपूजांवैकरिष्यामिप्रयत्नतः॥३२॥त्वं
मेस्वामीचभक्तोहंमद्यप्रभृतिशंकर॥एवंनियमकोभूत्वाकिरातोगृहमागमत्॥३३॥तथाप्रभातसमयेदेवा
यतनमागतः॥नंदीददर्शतत्सर्वंकिरातेनचयत्कृतं॥३४॥अव्यवस्थंचतद्दृष्ट्वाअमेध्यंशिवसंनिधौ॥विधू
तानिचरत्नानिहिंसकेनइतस्ततः॥३५॥चिंतायुक्तोभवन्नंदीजातंकिंछिद्रमद्यवै॥युक्ताश्चयेचविघ्नाश्चशि
जाप वपूरस्यच॥३६॥उपातिष्ठंश्चतेनैवममभाग्यविपर्ययात्॥एवंविमृश्यसुचिरंप्रक्षाल्यशिवमंदिरं॥३७
यथागतेनमार्गेणनंदीस्वगृहमागमत्॥ततोनंदिनमालोक्यपुरोधाःखिन्नमानसं॥३८॥अब्रवीद्
वचनंतंतुकस्मात्वंखिन्नमानसः॥पुरोहितंप्रतितदानंदीवचनमब्रवीत्॥३९॥अद्यदृष्टंमयाविप्रअमेध्यं
ना शिवसंनिधौ॥केनेदंकारितंतत्रनजानेभिमहीसुर॥४०॥ततःपुरोधावचनंनंदिनंचाब्रवीत्तदा॥येनविस्तालि
तंतत्ररत्नादीनांप्रपूजनं॥४१॥प्रपूजनेसोपिमूढःकार्याकार्येषुमंदधीः॥तस्माच्चिंतानकर्तव्यात्वयात्र
पुरपिप्रभो॥४२॥प्रभातेचमयासार्धंगम्यतांतच्छिवालयं॥निरीक्षणार्थंदुष्टस्यतस्यशुद्धिंकरोम्यहं॥४३
एतच्छ्रुत्वातुवचनंनंदीक्षितस्यपुरोधसः॥आस्थितःस्वगृहेनक्तंदूयमानेनचेतसा॥४४॥तस्यांरात्र्यां
व्यतीतायांआहूयचपुरोधसं॥गतःशिवालयंनंदीसमंतेनमहात्मना॥४५॥ततोदृष्टंपूर्वदिनेकृ
तंतेनदुरात्मना॥कालरूपोमहारौद्रोधनुःपाणिःप्रतापवान्॥४६॥तंदृष्ट्वाभयसंत्रस्तोनंदी

केदारखंड- नेत्रेनिमील्यच ॥ पुरोधाश्चैवसहसाभयभीतस्तदाभवत् ॥ ४७ ॥ किरातेनकृतंतत्रयथापूर्वमविस्खलत् ॥ तां अ॰ ५
पूजांचपदाहत्वाबिल्वपत्रंसमर्पयत् ॥ ४८ ॥ नैवेद्यंफलंशंभोः किरातश्चार्पयत्तदा ॥ दंडवत्पतितोभूमौउत्था
१७ यस्वगृहंगतः ॥ ४९ ॥ तंदृष्ट्वामहदाश्चर्यंचिंतयामासवैचिरं ॥ पुरोधसासहतदानंदीव्याकुलचेतसा ॥ ५० ॥ ते
नवाकारयिताविप्राः बहवोवेदवादिनः ॥ निवेदितंपुतत्सर्वंकिरातेनचयत्कृतं ॥ ५१ ॥ किंकार्यमद्यभोविप्राः क
थ्यतांचयथातथा ॥ संप्रधार्यततः सर्वेधर्मशास्त्रंविलोक्यच ॥ ५२ ॥ ऊचुःसर्वेतदाविप्राः नंदिनंजातशंकिनं ॥
दुःखोविघ्नंसमुत्पन्नंदुःखनिर्वार्यंसुरैरपि ॥ ५३ ॥ तस्मादानयलिंगंत्वंस्वगृहंवैश्यसत्तम ॥ तथेतिमत्वासौनंदीशि
गृ वस्यासाटनंतदा ॥ कृत्वास्वेगृहमानीयप्रातिष्ठापययथाविधि ॥ स्वर्णपीठिकांकृत्वानवरत्नस्कृशोभितां ॥ ५५ ॥
उपचारैरनेकैश्चपूजयामासवैतदा ॥ अथापरेद्युरायातःकिरातःशिवमंदिरं ॥ ५६ ॥ यावद्विलोकयामासलिं
गमैशंनदृष्टवान् ॥ मौनंविहायसहसासाक्रोशमिदमब्रवीत् ॥ ५७ ॥ हेशंभोक्वगतोसित्वंदर्शयात्मानमद्य
वै ॥ नदृष्टोसिमयात्वंहित्यक्ष्याम्यद्यकलेवरं ॥ ५८ ॥ हेशंभोहेजगन्नाथत्रिपुरांतकरप्रभो ॥ हेरुद्रहेमहा
देवदर्शयात्मानमात्मनः ॥ ५९ ॥ एवंसाक्षेपमधुरैर्वाक्यैःक्षिप्तःसदाशिवः ॥ किरातेनततोरंगेवीरोसौज
ठरंस्वकं ॥ ६० ॥ बिभेदशूलतोबाहुमास्फोट्यैवपुरोब्रवीत् ॥ हेशंभोदर्शयात्मानंकुतोमांसंत्यजयास्य १७
सि ॥ ६१ ॥ इतिक्षिप्त्वाततोंत्राणिमांसमुत्कृत्यसर्वतः ॥ तस्मिन्गर्तेकरेणैवकिरातःसहसाक्षिपत् ॥ ६२

कोविशेषितुमर्हति ॥ विभूत्यामंडितांगानांनराणांपुण्यकर्मणां ॥ १०० ॥ मुखेपंचाक्षरंयेषांरुद्रास्तेनात्रसं
शयः ॥ जटाकलापिनोयेचयेचरुद्राक्षभूषणाः ॥ १ ॥ तेवैमनुष्यरूपेणरुद्रानात्रसंशयः ॥ तस्मात्सदा
ध्या पूजनीयोवंदनीयोहिनित्यशः ॥ २ ॥ प्रातर्मध्यंदिनेकालेचसायंकालेविशेषतः ॥ प्रातस्तुदर्शनाच्छंभोर्नैशमेनो
विनश्यति ॥ ३ ॥ मध्याह्नदर्शनाच्छंभोःसप्तजन्मार्जितंनृणां ॥ पापंप्रणाशमायातिनिशायांनैवगण्यते ॥ ४ ॥
शिवइत्यक्षरंनाममहापापप्रणाशनं ॥ एषांमुखेऽ[illegible]तन्नृणांतैरिदंधार्यतेजगत् ॥ ५ ॥ शिवांगणेतुयाभेरीस्थापि
तापुण्यकर्मभिः ॥ तस्यानादेनभूतानियेचपापरतात्मनाः ॥ ६ ॥ पाषंडिनोप्यसद्वादास्तेपियांतिपरांगतिं ॥ प
शोर्यस्यचसंबधाचर्मणाचशिवालये ॥ ७ ॥ नभिर्यास्थापिताभेरीमृदंगोमुरजादिच ॥ सपशुःशिवसान्निध्य
माप्नोत्यत्रनसंशयः ॥ ८ ॥ तस्मात्ततंचविततंघनंसुषिरमेवच ॥ चामराणिमहार्हाणिमंचकाःशयनानिच ॥ ९ ॥
दर्पणानिवितानानिभूषणानितथैवच ॥ प्रेक्षणानिविचित्राणिपुराणपठनानिच ॥ १० ॥ गाथाश्चइतिहासाश्चगाय
नंचयथाविधि ॥ बहुरूपादिकंशंभोःप्रियाण्येतानिकल्पयेत् ॥ ११ ॥ कल्पयित्वाचगच्छंतिशिवलोकंहिपापिनः ॥
येतुज्ञानमहास्नानःशैवशास्त्रविशारदाः ॥ १२ ॥ गुरुभक्ताश्चयेविप्राःशिवपूजारताश्चये ॥ शिवभावेनयेविश्वं
पश्यंतिकृतनिश्चयाः ॥ १३ ॥ सम्यग्बुधाःसदाचाराःवर्णाश्रमयुतानराः ॥ ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चा
न्येतथानराः ॥ १४ ॥ श्वपचोपिवरिष्ठस्तुयोभक्त्याशंभुमर्चति ॥ शंभुनाधिष्ठितंचैतज्जगदेतच्चराचरं ॥ १५ ॥

२ स्वछंचहृदयंकत्वासस्नोतस्सौसिध्रुवं॥तथैवजलमानीयाबिल्वपत्रंस्वरान्वितः॥६३॥पूजयित्वायथा
न्यायंदंडवत्सतितोभुवि॥ध्यानस्थितश्चतत्रस्थः किरातःशिवसंनिधौ॥६४॥प्रादुर्भूतस्ततःरुद्रःप्रमथैःपरि
वारितः॥कर्पूरगौरद्युतिमान्कपर्दैश्चंद्रशेखरः॥६५॥तंगृहीत्वाकरेरुद्रउवाचपरिसांत्वयन्॥भोभोवीरम
हाप्राज्ञभक्तोसिमहामते॥६६॥वरंवर्णीष्वभद्रंतेयत्तेभिलषितंमहत्॥एवमुक्तःसरुद्रेणमहाकालोमुदा
न्वितः॥६७॥पपातदंडवद्भूमौभक्त्यापरमयायुतः॥ततोरुद्रंबभाषेदंनवरंप्रार्थयाम्यहं॥६८॥अहंदा
सोस्मितेरुद्रत्वंमेस्वामीनसंशयः॥एतत्श्लाघ्यतमंलोकेदेहिजन्मनिजन्मनि॥६९॥त्वंमातात्वंपितात्वंहित्वं
बंधुश्चसखाचमे॥त्वंगुरुस्त्वंमंत्रमयस्त्वंवेद्योसिसदाशिव॥७०॥तस्मात्त्वदपरंकिंचित्रिपुलोकेषुविद्य
ते॥निष्कामवाक्यमाकर्ण्यकिरातस्यतदाभवः॥७१॥ददौपार्षदमुख्यंत्वंद्वारपालत्वमेवच॥तदाडमरुना
देननादितंभुवनत्रयं॥७२॥भेरीझांकरशब्देनशंखानांनिनदेनच॥तदादुंदुभयोनेदुःपटहाश्चसहस्र
शः॥७३॥नंदीतन्नादमाकर्ण्यविस्मयात्त्वरितंययौ॥येपापिनोनश्रृण्वंतिशिववार्ताकदाचन॥७४॥
दिव्यान्नादान्नश्रृण्वंतितेवैसंसारवासिनः॥नादंपरमवाद्यानांश्रुत्वावायंतदाययौ॥७५॥तपोवनं
तत्रशिवःस्थितःप्रमथसंयुतः॥किरातोहित्ततोदृष्टोनंदिनाचतदाश्चर्यं॥७६॥उवाचप्राश्रितो

केदारखंड. वाक्यंसनंदीविस्मयान्वितः॥ किरातंस्तोतुकामोसौपरमेणसमाधिना॥ ७७॥ इहानीतस्त्वयाशंभुस्त्वंभक्तोसिपरं
तप॥ त्वंभक्तोहमिहप्राप्तोमांनिवेदयशंकरे॥ ७८॥ तच्छ्रुत्वावचनंतस्याकिरातस्त्वरयान्वितः॥ अ॰ ५
१९ नंदिनंचकरेरुत्वाशंकरंसमुपानयत्॥ ७९॥ प्रहस्यभगवान्रुद्रः किरातंवाक्यमब्रवीत्॥ कोयंत्वयासमानी
तोगणानामिहसंनिधौ॥ ८०॥ विज्ञप्तोसौकिरातेनशंकरोलोकशंकरः॥ त्वद्भक्तश्चसदाचासोभवदाज्ञाकरःप्र
भो॥ ८१॥ प्रत्यहंरत्नमाणिक्यैःपुष्पैश्चोच्चावचैरपि॥ जीवितेनधनेनापिपूजितोसिनसंशयः॥ ८२॥ तस्मा
ज्जानीहिभोस्वामिन्नंदिनंभक्तवत्सल॥ श्रीरुद्रउवाच॥ नजानामिमहाभागनंदिनंवैश्यवर्तनं॥ ८३॥ त्वंभक्तस्त्वंसखा
चेतिमहाकालमहामते॥ उपाधिरहितायेच येचैवचमनस्विनः॥ ८४॥ तेप्रियातीवमेभक्तावरिष्ठास्तेनरोत्तमाः॥ तव
भक्तोह्ययंतातस्त्वंचमेप्रियवत्तरः॥ ८४॥ तावुभौस्वकृतौतेनपार्षदत्वेनशंभुना॥ ततोविमानानिबहूनितत्रसमा
गतान्येवमहाप्रभाणि॥ ८५॥ किरातवर्येणसवैश्यवर्यः श्रुद्धांतरस्तेनमहाप्रभेण॥ कैलासंपर्वतंप्राप्तोविमानैर्वेग
वत्तरैः॥ ८६॥ सारूप्यमेवसंप्राप्तोईश्वरस्यमहात्मनः॥ नीराजितौगिरिजयाशिवेनसहतौतदा॥ ८७॥ उवा
चेदंततोदेवीप्रहस्यगजगामिनी॥ यथात्वंहिमहादेवत्तैर्वैमौनसंशयः॥ ८८॥ स्वरूपेणगत्याचहास्यभावैः था
स्वपूजितैः॥ मयात्वमेकएवासिसेवितोविश्वरूपधृक्॥ ८९॥ देव्यास्तद्वचनंश्रुत्वाकिरातोवैश्यएवच॥ सद्यः १९
पराङ्मुखौभूत्वाशंकरस्यचपश्यतः॥ ९०॥ ऊचतुस्त्वरयायुक्तौगणौरुद्रस्यधीमतः॥ उभावप्यनुकंपयोब

केदारखंड- तोमहीयान्महानुभावोभुवनाधिपोमहान् ॥ ३॥ सईश्वरोभिक्षुरूपीमहात्माभिक्षाटनंदारुवनेचचार
॥तदर्नीभिवस्मर्गास्ताऋषिभार्याःसमागताः ॥ ४॥ विलोकयंत्यःशंभुंताश्चतेचोचुःपरस्परं ॥ कोसौभिक्षुक श्री
१९ रूपोयमागतोपूर्वदर्शितः ॥ ५॥ तस्मैभिक्षांप्रयच्छामःसर्वाभिःसहितावयं ॥ तथेतिमत्वाताःसर्वाःगृहे
भ्यश्चानयन्मुदा ॥ ६॥ भिक्षान्नंविविधंस्निग्धंसोपचारंचशक्तितः ॥ प्रदत्तंभक्षितंतेनदेवदेवेनशूलिना
७॥ काचिच्छ्रियतरंशंभुंबभाषेविस्मयान्विता ॥ कोसित्वंभिक्षुकोनूनंआगतोत्रमहामते ॥ ८॥ ऋषीणामाश्र
मंशुद्धंकिमर्थंनोनिवेद्यतां ॥ तयोक्तोथतदाशंभुर्बभाषेप्रहसन्निव ॥ ९॥ ईश्वरोहंस्मृकेस्थंतेपावनः
प्राप्तवानहं ॥ ईश्वरस्यवचःश्रुत्वाऋषिभार्याउवाचतं ॥ १०॥ ईश्वरोसिमहाभागकैलासपतिरेवच ॥
एकाकीचमहादेवभिक्षार्थमटनंतव ॥ ११॥ एवमुक्तस्तयाशंभुःपुनस्तामब्रवीद्वचः ॥ दाक्षायण्याविरहितो
विचरामिदिगंबरः ॥ १२॥ भिक्षाटनार्थंसुश्रोणिसंकल्परहितःसदा ॥ तयासत्याविनाकिंचित्स्त्रीमात्रंम
मभामिनि ॥ १३॥ नरोचतेविशालाक्षिसत्यंप्रतिवदामिते ॥ तेनोक्तंवचनंश्रुत्वाउवाचकमलेक्षणा ॥ १४॥
स्त्रियोहिस्वसंस्पर्शाःपुरुषस्यनसंशयः ॥ तास्त्रियोवर्जिताःशंभोत्वयापरमज्ञानिना ॥ १५॥ इतिताः
प्रमदाःसर्वामिलितायत्रशंकरः ॥ भिक्षापात्रंचतच्छंभोःपूरितंचमहागुणैः ॥ १६॥ अन्नैश्चतुर्विधैःष १९
ड्रीरसैश्चैवप्रपूरितं ॥ यदाशंभुर्गंतुकामःकैलासंपर्वतंप्रति ॥ १७॥ तदासर्वानिप्रपत्न्योह्यन्वगच्छन्मु

दान्विताः ॥ गताश्चताश्चसर्वाश्चपत्नीषुऋषिसत्तमाः ॥ १८॥ यावत्स्वाश्रममध्येस्तावधून्यंव्यलोकयन् ॥
परस्परमथोचुस्तेपत्न्यःसर्वाःकुतोगताः ॥ १९॥ नविंदामोध्रुवंवैसवैकेनदुष्टेनवाहृताः ॥ एवंविमृश्यमाना
स्तेविचिन्वंतइतस्ततः ॥ २०॥ समपश्यन्ततःसर्वाःशिवस्यानुगताश्चताः ॥ शिवंदृष्ट्वाभृशंप्राप्ताऋषयो
विरूपान्विताः ॥ २१॥ शिवस्याग्रगताभूत्वाऊचुःसर्वेत्वरान्विताः ॥ किंकृतंहित्वयाशंभोविरक्तेनमहात्म=
ना ॥ २२॥ परदारापहर्तासित्वमृषीणांनसंशयः ॥ एवंक्षिप्तःशिवोमौनीगच्छमानोपिपर्वतं ॥ २३॥ तदाचऋषि
भिःशप्तोमहादेवोव्ययस्तथा ॥ यस्मात्कलत्रहर्तायंतस्मात्षंढोभवत्वयं ॥ २४॥ एवंशप्तस्यमुनिभिर्लिं
गंतस्यापतद्भुवि ॥ भूमिंप्राप्तंचतल्लिंगंववृधेतरसामहत् ॥ २५॥ आवृत्यसप्तपातालान्क्षणाल्लिंगमथो
र्ध्वतः ॥ व्याप्यपृथ्वींसमग्रांचअंतरिक्षंसमावृणोत् ॥ २६॥ स्वर्गाःसमावृताःसर्वेस्वर्गातीतमथाभवत् ॥
नमहीनचदिक्चक्रंनतोयंनचपावकः ॥ २७॥ नचवायुर्नचाकाशोनाहंकारोनवामहान् ॥ नचाव्यक्तंन
कालश्चनमहान्प्रकृतिस्तथा ॥ २८॥ द्वैताद्वैतविभागंचसर्वंलीनंचतत्क्षणात् ॥ यस्माल्लीनंजगत्सर्वं
तस्मिन्लिंगेमहात्मनः ॥ २९॥ लयनाल्लिंगमित्येवंप्रवदंतिविपश्चितः ॥ तथाभूतंवर्धमानंतेपिदृष्ट्वोरर्ष स्क
यः ॥ ३०॥ ब्रह्मेंद्रविष्णुवाय्वग्निलोकपालाःसपन्नगाः ॥ विस्मयाविष्टमनसःपरस्परमथाब्रुवन् ॥ ३१

 किमायातंचविस्तारंकथांतःक्वचपीठिका ॥ इतिचिंतान्विताविष्णुभूत्वुः सर्वेप्ययंतदा ॥ ३२ ॥ अस्यमूलंस्य
याविष्णोपद्मोद्भवस्यमस्तकं ॥ युवाभ्यांचविलोक्यंस्यात्स्थानेस्मखरिपालको ॥ ३३ ॥ श्रुत्वातोतुमहाभागो
२० वैकुंठकमलोद्भवो ॥ विष्णुर्गतोहिपातालंब्रह्मास्वर्गंजगामह ॥ ३४ ॥ स्वर्गंगतस्तदाब्रह्माह्यवलोकनत
त्परः ॥ नापश्यत्तस्यलिंगस्यमस्तकंसविचक्षणः ॥ ३५ ॥ यथागतेनमार्गेणप्रयातःसाब्जसंभवः ॥ मेरुपृ
ष्ठमनुप्राप्तःस्करभ्यालक्षितस्तदा ॥ ३६ ॥ स्थितयाकेतकीछायामुवाचमधुरंवचः ॥ क्वगतोसिमहाप्राज्ञपि
तामहनमोस्तुते ॥ ३७ ॥ कुतआगम्यतेब्रह्मन् किंकार्यंकरवाणिते ॥ तस्यावचनमाकर्ण्यसर्वलोकपि
तामहः ॥ ३८ ॥ उवाचप्रहसन्वाक्यंलोकेस्त्यास्करभीप्रति ॥ लिंगंमहाद्भुतंदृष्टंयेनव्याप्तंजत्रयं ॥ ३९
ना दर्शार्थंचतस्यांतंदेवैःसंप्रेषितोस्म्यहं ॥ नदृष्टंमस्तकंतस्यव्यापकस्यमहात्मनः ॥ ४० ॥ किंवक्ष्येहंचदेवा
ग्रेइतिचिंताकुलोस्म्यहं ॥ लिंगस्यमस्तकंदृष्टंदेवानांचमृषावदे ॥ ४१ ॥ तेसर्वेपादिवस्यंतिइंद्राद्यादेव
तागणाः ॥ त्वंवास्तिसाक्षीकोवात्रअस्मिन्नर्थेवदस्वरन् ॥ ४२ ॥ अर्थेस्मिन्नवसाक्षित्वंकेतक्यासहस्क
ब्रते ॥ तद्वचःशिरसाग्रह्यब्रह्मणःपरमेष्ठिनः ॥ ४३ ॥ केतकीसहितातत्रस्करभिस्तत्समानयत् ॥ एवं २०
ससमयंकृत्वादेवान्प्रतिसमागतः ॥ ४४ ॥ ब्रह्मोवाचलिंगस्यमस्तकंदृष्टवानहं ॥ मयार्चितंस

भवताहित्रिलोचन ॥ ९१ ॥ तवद्वारिस्थितौनित्यंभवेतांचनसंशयः ॥ तयोर्भावंसभगवान्विदित्वाप्रहसन्भवः ॥ ९२
उवाचपरयाभक्त्याभवतोरस्तुवांछितं ॥ तदाप्रभृतितावेतौद्वारपालौबभूवतुः ॥ ९३ ॥ शिवद्वारिस्थितौविप्रामध्या
न्हेशिवदर्शिनो ॥ एकोनंदीमहाकालोद्वावेतौशिवल्लभौ ॥ ९४ ॥ ऊचतुस्समुदायुक्तौएकएवसदाशिवः ॥ एकांगुली
समुध्दृत्यमहाकालोभ्यभाषत ॥ ९५ ॥ तथानंदीह्युवाचेदमुध्दृत्यस्वांगुलीद्वयं ॥ एकोदेवोमहादेवोद्वितीयोस्तिमहा
पि मते ॥ ९६ ॥ महाकालनमस्तेस्तुह्युध्दृतंचांगुलीद्वयं ॥ एवंविज्ञौतौद्वारितिष्ठंतौचमहात्मनः ॥ ९७ ॥ शंकरस्यमहाभागाः
श्रृण्वंतुऋषयोह्यमी ॥ शैलादिनपुराप्रोक्तंशिवधर्मंअनंतकं ॥ ९८ ॥ प्राणिनांकृपयायुक्तःसर्वेषांदुष्कृतात्मनां ॥ ये
पापिनोप्यधर्मिष्ठाअंधाम्कश्वपंगवः ॥ ९९ ॥ कुलहीनाहुरात्मानःश्वपचाश्चैवमानवाः ॥ यादृशास्तादृशा
श्चाप्येशिवभक्तिसमन्विताः ॥ १०० ॥ तेपिगच्छंतिसान्निध्यंदेवदेवस्यशूलिनः ॥ लिंगंशिवमयंयेपिपूजयं
वि तिपश्चितः ॥ १ ॥ तेरुद्रलोकंगच्छंतिनात्रकार्याविचारणा ॥ इतिश्रीस्कंदपुराणेकेदारखंडेशैवशास्त्रेपं
चमोध्यायः ॥ ५ ॥ ऋषयऊचुः ॥ लिंगप्रतिष्ठाचकथंशिवंहिसाप्रवर्तिता ॥ तत्कथ्यतांमहाभागपरंरह
स्यतांपुनः ॥ १ ॥ लोमशउवाच ॥ पुरादारुवनेशंभुर्भिक्षार्थेप्रचरन्सुः ॥ दिगंबरोमुक्तजटाकलापोवे
दांतवेद्योभुवनैकभर्ता ॥ २ ॥ सईश्वरोब्रह्मकपालधारीयोगीश्वराणांपरमःपरश्च ॥ अणोरणीयान्महतो

मीचीनंकेतकीदलसंयुतं ॥ विशालंविमलंश्लक्ष्णंप्रसन्नकरमद्भुतं ॥ रम्यंचरमणीयंचदर्शनीयंमहाप्र
भं ॥ ४६ ॥ एतादृशंमयादृष्टंनदृष्टंमद्भिनाकचित् ॥ ब्रह्मणोहिवचःश्रुत्वास्मराविस्मयमायपुः ॥ ४७ ॥
एवंस्मेवियपूर्णास्तेइंद्राद्यादेवतागणाः ॥ तिष्ठंतितावत्सर्वेशोविष्णुरध्यात्मदीपकः ॥ ४८ ॥ पाताला
दागतःसद्यःसर्वानप्यवदत्स्फुरान् ॥ अस्याप्यंतंनदृष्टोहमवलोकनतत्परः ॥ ४९ ॥ आगतोविस्मयो
पेतःपातालात्सरतश्चरन् ॥ अतलंसुतलंचापिवितलंचरसातलं ॥ ५० ॥ तथागर्भस्थितंचैवपातालं
चततःपरं ॥ तस्मात्तलमितान्येवंशून्यंयावद्धितोक्ष्यते ॥ ५१ ॥ शून्यादपिचशून्यंचततःसर्वंसंनिरीक्षि
तं ॥ नमूलंनचमध्यंचनचांतोप्यस्यविद्यते ॥ ५२ ॥ लिंगरूपीमहादेवोयेनेदंधार्यतेजगत् ॥ यस्यप्रसा
दादुसन्नाप्रूयंचऋषिभिःसह ॥ ५३ ॥ स्थावरंजंगमंचैवजगत्स्थास्नुचरिष्णुच ॥ येनेदंकारितंसर्वंय
त्रसर्वंप्रतिष्ठितं ॥ ५४ ॥ यस्मिंश्चविलयंप्राप्नंतल्लिंगंत्वीश्वरस्यतु ॥ केशवस्यवचःश्रुत्वाब्रह्मालोक
पितामहः ॥ ५५ ॥ उवाचऋषिभिःसाकंवेदवादरतस्तदा ॥ देवानामग्रमोह्यग्निस्त्वंविष्णुःपरमोत्तमः ॥ ५६
लदंतरेणदेवाश्चइतिवेदानुशासनं ॥ त्वंकस्माद्धिस्मयाविष्टःसर्वेषांवक्तुमर्हसि ॥ ५७ ॥ त्वयानदृष्टंमू
लंचअस्यलिंगस्यचाधुना ॥ एतावत्किंप्रमाणंस्याद्वचनात्तवसुव्रत ॥ ५८ ॥ अस्यांतोहिमयादृष्टो

 नात्रकार्याविचारणा।।त्रहस्यचतदाविष्णुरुवाचकमलेक्षणः।।५९।।मयानदृष्टंमूलंचमस्तकंच
त्वयाकथं।।दृष्टंनभसिभोब्रह्मन्कारणंकथ्यतांचमे।।६०।।तदाभगुरुवाचेदंविष्णुंसर्वेश्वरेश्वरं।।त
 स्मात्पितामहोज्ञातासर्वेषामपितत्वतः।।६१।।तथासर्वेविऋषयस्तस्यवाक्यमपूजयन्।।तदावि
ष्णुरुवाचेदंब्रह्माणंप्रहसन्निव।।६२।।दृष्टंहिचेत्त्वयाब्रह्मन्मस्तकंपरमार्थतः।।साक्षिणःकेत्व
यातत्रअस्मिन्नर्थेप्रकल्पिताः।।६३।।आकर्ण्यवचनंविष्णोर्ब्रह्मालोकपितामहः।।उवाचत्वरि
तेनैवकेतकीसुरभीतिच।।६४।।तेदेवममसाक्षित्वेजानीहिपरमार्थतः।।ब्रह्मणोहिवचःश्रुत्वास
र्वेदेवास्त्वरान्विताः।।६५।।आह्वानंचाक्रिरेदेवाःसुरभिंचतयासह।।आगतासुरभिस्तत्रकार्या
र्थंतत्क्षणात्तदा।।६६।।इंद्राद्यैश्चतदादेवैरुक्ताचसुरभिस्तदा।।उवाचसार्धंकेतक्यादृष्टंवैब्र
णापुरा।।६७।।लिंगस्यमस्तकंनूनंनात्रकार्याविचारणा।।पयसाचमदीयेनस्नपनंतस्यमूर्ध
नि।।६८।।प्रत्यहंक्रियतेविष्णोकेतकीदलपूजनं।।तदानभोगतावाणीसर्वेषांश्रृण्वतामभूत्।।६९
सुरभ्यापह्नवःप्रोक्तःकेतक्याचतथासुराः।।मृषोक्तंतत्त्वजानीध्वंनदृष्टंह्यस्यमस्तकं।।७०।।त

केदारखंड· नांस्त्वंह्यात्वंहिदेवोजगत्पतिः॥कर्ताचभुवनस्यत्वंहर्तात्वंपुरुषःपरः॥६॥पाह्यस्मांश्रमं देवदेवदेवनमो अ.८
स्तुते॥एवंस्तुतोब्रह्मणावैलिंगरूपीमहेश्वरः॥७॥ऋषयःस्तोतुकामाश्चमहेश्वरमकल्मषाः॥ऋषय हा
२२ ऊचुः॥अज्ञानिनोवयंकामान्नविद्मोस्यसंस्थितिं॥८॥त्वंहिब्रह्मपरंज्योतिःज्योतिषामपियन्महः॥सत्वं
वेदांतवेद्योसिलिंगरूपिन्नमोस्तुते॥९॥त्वंशान्तोसिचदेवेशअस्माभिस्तुच्छकारिभिः॥क्षुद्राशयावयंसर्वे
नविद्मःपरंपदं॥१०॥त्वंह्यात्मापरमात्माचप्रकृतिस्त्वंविभाविनी॥त्वमेवमाताचपितात्वमेवत्वमेवबंधुश्च
सखात्वमेव॥११॥त्वमीश्वरोवेदविदेकरूपीमहानुभावैःपरिचिंत्यमानः॥त्वमात्मासर्वभूतानामेकज्यो
तिरिवैधसां॥१२॥सर्वंभवतियस्माच्चतस्माच्छर्वोसिनित्यदा॥यस्माच्चशंभवत्येवतस्माच्छंभुरितिस्मृ
तः॥१३॥त्वत्प्रसादपंकजंप्राप्ताःवयंसर्वेसुरासुराः॥ऋषयोदेवगंधर्वाःविद्याधरमहोरगाः॥१४॥
तस्माच्चकृपयाशंभोपाह्यस्मान्जगतःप्रभो॥श्रीरुद्रउवाच॥शृणुध्वंवचनोमेद्यक्रियातांचत्वरान्वि
तैः॥१५॥विष्णुंसर्वेनमस्कृत्यईडिरेचतथासुराः॥देवाऊचुः॥विद्याधराःसुरणाऋषयश्चसर्वेत्रा २२
तास्त्वयाद्यसकलंजगदेकबंधो॥१६॥सर्वास्तथैवपरिपाल्यदेवदेवत्रैलो-क्यनाथोसिजग

न्निवास॥ब्रह्मस्यभगवान्विष्णुःउवाचेदंवचस्तदा॥१७॥दैत्यप्रपीडितायूयंरक्षिताश्चपुरामया॥अद्यैवभय
मुत्पन्नंलिंगादस्माच्चिरंतनात्॥१८॥नशक्यतेमयात्रातुमस्माल्लिंगात्सुरोत्तमाः॥अच्युतेनैवमुक्तास्ते
देवाश्चिंतासमन्विताः॥१९॥तदानभोगतावाणीनारायणमुवाचह॥एतल्लिंगंसंवणुष्वपूजनायजना
र्दन॥२०॥पिंडीभूत्वाममहाबाहोसंरक्षस्वचराचरं॥तथेतिमत्वाभगवान्पिंडीभूतोद्यधारयत्॥२१॥तल्लिं
गंभगवांश्चैववीरभद्रोभ्यपूजयत्॥ब्रह्मादिभिःसुरगणैःस्वगणैस्तदानींसंपूजितःशिवविधानरतो
महात्मा॥२२॥सवीरभद्रःशशिशेखरोसौशिवप्रियोरुद्रसमस्त्रिलोचनः॥लिंगस्यार्चनसंयुक्तो
वीरभद्रोभवत्तदा॥२३॥तद्रूपस्यचलिंगस्ययेनसर्वमिदंजगत्॥उत्पत्तिंस्थितिमाप्नोतितथाविल
यमेवच॥२४॥तल्लिंगमभिसाकुर्लयनात्तत्ववित्तमाः॥ब्रह्मांडगोलकंव्याप्तंयथारुद्राक्षभूषितं॥२५॥
तथालिंगंमहज्जातंसर्वेषांदुरतिक्रमं॥तदासर्वेथविबुधाःऋषयोवैमहाप्रभाः॥२६॥तुष्टुवुश्चम
हालिंगंवेदवादैःपृथक्पृथक्॥अणोरणीयांस्त्वंदेवतथापिमहतोमहान्॥२७॥तस्मात्त्वयावि
धातव्यंसर्वेषांरक्षणंविभो॥तदानीमेवशर्वेणतल्लिंगंबहुधाःकृतं॥२८॥सत्येब्रह्मेश्वरंलिंगंवै

 कुंठेचसदाशिवं॥अमरावत्यांसमुत्प्रतिष्ठममरेश्वरसंज्ञितं॥२९॥कालेश्वरंचवारुण्यांयाम्यायांवरुणेश्वरं॥
नैर्ऋतेशंचनैर्ऋत्यांवायव्यायांवनेश्वरं॥३०॥कौबेश्वरंचकौबेर्यामैशान्यांचमहेश्वरं॥ओंकारंनर्मदायां
 चमहाकालंतथैवच॥३१॥काश्यांविश्वेश्वरंलिंगंप्रयागेललितेश्वरं॥त्र्यंबकंचब्रह्मगिरौकल्लौभद्रे
श्वरंतथा॥३२॥द्राक्षारामेश्वरंदेवंगंगासागरसंगमे॥सौराष्ट्रेचतथालिंगंसोमेश्वरमितिश्रुतं॥३३॥
तथासर्वेश्वरंविंध्येश्रीशैलेशिखरेश्वरं॥कांच्यांमल्लिकनाथंचसिंहनाथंचसिंहले॥३४॥विरूपाक्षं
तथालिंगंकोटिशंकरमेवच॥त्रिपुरांतकंचभीमेशंडामरेश्वरमेवच॥३५॥एवमादीन्यनेकानिलिंगानिभु
वनत्रये॥स्थापितानितथादेवैर्विश्वोपकृतिहेतवे॥३६॥लिंगांश्चैवतथासर्वैःपूर्णमासीजगत्त्रयं॥तथा
चवीरभद्रांशाःपूजार्थममरैःकृताः॥३७॥चत्वारिंशच्चसंस्कारास्तेषामत्राधिकाभवन्॥कथिताःशं
करेणैवलिंगस्यार्चनसूचकाः॥३८॥साक्षाद्रुद्रेणकथिताःशिवधर्माःसनातनाः॥वीरभद्रोयथारु
द्रस्तथान्येगुरवस्स्मृताः॥३९॥गुरोर्जाताश्चगुरवोविख्याताश्चजगत्त्रये॥लिंगस्यमहिमानंचनं
दीजानातितत्त्वतः॥४०॥तथास्कंदोहिभगवान्अन्येयेनामधारकाः॥यथोक्ताःशिवधर्माहिनंदि

थासर्वेथविबुधाःसेंद्रावैविष्णुनासह॥शेषुश्चसुरभिरोषाऋषावादनतत्पराः॥७१॥मुखेनोक्तंत्वयावै
वमन्तंयस्त्वयाकृते॥अपवित्रंमुखंतेस्तुसर्वधर्मबहिष्कृतं॥७२॥सुगंधिः..केतकीचापिअ
योग्याचशिवार्चने॥भविष्यतिनसंदेहःअनृताच्चैवभामिनी॥७३॥तदानभोगतावाणीब्रह्माणंचशा
च शापवै॥मृषोक्तंत्वयामंदमदर्थेबालिशेनवै॥७४॥भृगुणाऋषिभिःसार्कंतथैवचपुरोधसा॥तस्मा
द्यूयमपूज्याश्चभवेयुःक्लेशभागिनः॥७५॥विवादनिरतामूढाअलस्वज्ञाःसमत्सराः॥यावकाश्चान्या वदा
श्चनिस्वंस्वज्ञातिघातकाः॥७६॥आत्मसंमानितानित्यंपरस्परविनिंदकाः॥एवंशप्ताश्चमुनयोब्रह्मा
घादेवतास्तथा॥७७॥शिवेनशप्तास्तेसर्वेलिंगंशरणमाययुः॥इतिश्रीस्कंदपुराणेकेदारखंडेषष्ठो
ध्यायः॥६॥लोमशउवाच॥तदाचतेसुराःसर्वेऋषयोपिभयान्विताः॥ईडिरेलिंगमेशंचब्रह्माद्याज्ञा
नविह्वलाः॥१॥ब्रह्मोवाच॥त्वंलिंगरूपीसुमहाप्रभावोवेदांतवेद्योसिसदात्मरूपी॥येनैवसर्वंजगदात्म
भूतंकृतंसदानंदपरेणनित्यं॥२॥त्वंसाक्षीसर्वलोकानांहर्ताखंचविचक्षणः॥रक्षकोसिमहादेवभैरवो
सिजगत्पते॥३॥त्वयालिंगस्वरूपेणव्याप्तमस्तिजगत्त्रयं॥क्षुद्राश्चैववयंनाथमायामोहितचेतसः॥४
अहंसुरासुराःसर्वेयक्षगंधर्वराक्षसाः॥पन्नगाश्चपिशाचाश्चतथाविद्याधराश्चमी॥५॥त्वंहिविश्वसृ ध

नापरिकीर्तिताः॥ ४१॥ शैलादेनमहाभागविचित्रालिंगधारकाः॥ प्राणस्योपरिलिंगंच धार्यते हिपुरात
नैः॥ ४२॥ लिंगेनसहपंचत्वंलिंगेनसहजीवितं॥ एतेधर्माःसुरश्रेष्ठशैलादेनप्रतिष्ठिताः॥ ४३॥ धर्मं
पाशुपतंश्रेष्ठंस्कंदेनप्रतिपादितं॥ रुद्राक्षापंचाक्षरीविद्याप्रासादस्यचदीपिका॥ ४४॥ स्कंदात्सर्वमनुप्रा
प्तमगस्त्येनमहात्मना॥ पश्चादाचार्यभेदेनआगमाबहवोभवन्॥ ४५॥ किंपुनर्बहुनोक्तेनशिवइत्यक्षरद्वयं॥
उच्चारयंतियेनित्यंतेरुद्रानात्रसंशयः॥ ४६॥ सतांमार्गंपुरस्कृत्ययेसर्वेतेपुरांतकाः॥ वीरमाहेश्वराज्ञेयाः
पापक्षयकरान्नृणां॥ ४७॥ प्रसंगेनानुषंगेनअथचैवंयदृच्छया॥ शिवेभक्तिंप्रकुर्वंतिपशवोयांतिसद्गतिं
४८॥ शृणुध्वंकथयिष्यामिइतिहासंपुरातनं॥ कुलंशिवालयेयत्रपतंग्यामार्जनंपुरा॥ ४९॥ आगता
भक्षणार्थंचनैवेद्यंकेनचार्पितं॥ मार्जनंरजसस्तस्याःपक्षाभ्यामभवत्तदा॥ ५०॥ तेनकर्मविपाकेनउ
त्तमंस्वर्गमागता॥ भुक्त्वास्वर्गसुखंचोग्रंततःसंसारमागता॥ ५१॥ काशीराजसुताजातासुंदरीनामवि
श्रुता॥ पूर्वाभ्यासाच्चकल्याणीबभूवपरमासती॥ ५२॥ उपस्थिताय तन्वंगीशिवद्वारगताभवत्॥ संमा
र्जनंचकुरुतेभक्त्यापरमयायुता॥ ५३॥ स्वयमेवतदादेवीसुंदरीराजकन्यका॥ तथाभूतांचतांदृष्ट्वामुनि

 रुद्दालकोऽब्रवीत् ॥ सुकुमारासती बाले स्वयमेव कथं शुभे ॥ संमार्जनं च कुरुषे कन्यके त्वं शुचिस्मिते ॥
॥५५॥ दास्यो दासाश्च बहवः संति देवि तवागतः ॥ तवाज्ञया करिष्यंति सर्वे संमार्जनादिकं ॥५६॥ ऋ
 षेस्तद्वचनं श्रुत्वा प्रहस्येदमुवाच ह ॥ शिवसेवां प्रकुर्वाणः शिवभक्तिपुरस्कृताः ॥५७॥ येन राश्री
वनार्यश्च शिवलोकं व्रजंति ते ॥ संमार्जनं च पाणिभ्यां पद्भ्यां यानं शिवालयं ॥५८॥ दर्शनं चैव चक्षुर्भ्यां
स्मरणं मनसा सदा ॥ शिरः प्रणामसंयुक्तं येषां ते पुण्यभागिनः ॥ ५९॥ तस्मान्मया चाक्रियते संमार्ज
नमतंद्रितं ॥ अन्यत्किंचिन्न जानामि एकं समार्जनं विना ॥ ६०॥ ऋषिस्तद्वचनं श्रुत्वा मनसा च विमर्षयेत् ॥
अनया किं कृतं पूर्वं केयं कस्य प्रसादतः ॥ ६१॥ तदा ज्ञातं च ऋषिणा तत्सर्वं ज्ञानचक्षुषा ॥ विस्मयेन स
माविष्टस्तूष्णीभूतोऽभवत्तदा ॥ ६२॥ स विस्मयो भयदर्थतद्धिदिखाउद्दालको ज्ञानविदां वरिष्ठः ॥ शिवप्रसा
दं मनसा विचिंत्य परात्परं बोधमयं प्रशांतं ॥ ६३॥ इति श्रीस्कंदपुराणे केदारखंडे शैवशास्त्रे सप्तमोऽध्या
यः ॥७॥ लोमश उवाच ॥ तस्करोऽपि पुरा ब्रह्मन् सर्वधर्मबहिष्कृतः ॥ ब्रह्मघ्नोऽसौ सुरापश्च स्वस्तवर्णस्य
च तस्करः ॥१॥ लंपटो हि महापापः उत्तमस्त्रीषु सर्वदा ॥ द्यूतकारी सदा मंदः कितवैः सह संगतः ॥२॥

स्तर्कपरास्तथामीमांसकाश्चये ॥ १६॥ अन्योन्यवादिनश्चान्येतथान्येचात्मचिंतकाः॥ एकवाक्यं अ० ८
नकुर्वंतिशिवार्चनबहिष्कृताः॥ १७॥ तर्कोपिक्रियतेयेश्चतैःसर्वैःकिंशिवंविना॥ तथाकिंबहुनो
२५ क्तेनयेसर्वेस्थिरजंगमाः॥ १८॥ प्राणिनोपिहिजायंतेकेवलंलिंगधारिणः॥ पिंडीयुक्तंयथालिं
गंस्थापितंतुयथाभवेत्॥ १९॥ तथानरालिंगयुक्ताःपिंडीयुक्तास्तथास्त्रियः॥ शिवशक्तियुतं
सर्वंजगदेतच्चराचरं॥ २०॥ तंशिवंदूरतःकृत्वामूढाश्चान्यंभजंतिये॥ धर्मेनोसादितंतैस्तुनश्वरंक्ष
णभंगुरं॥ २१॥ तस्माल्लिंगार्चनंश्रेष्ठंसर्वेषामपिवैद्विजाः॥ इंद्रनीलमयंलिंगंविष्णुनापूज्यतेसदा॥ २२॥
ब्रह्मामणिमयंलिंगंपूजयत्सनिशंविभुः॥ रौक्मंलिंगंकुबेरश्चपाशीआरक्तमेवच॥ २३॥ यमोनील
मयंलिंगंराजतंनिर्ऋतिस्तथा॥ काश्मीरंपवनोलिंगमर्चयत्सनिशंविभुः॥ २४॥ एवंतेलैंगिकाःसर्वेलोक
पालाःसवासवाः॥ तथासर्वेपिपातालेगंधर्वाःकिंनरैःसह॥ २५॥ देत्यानांवैष्णवाःकेचित्प्रह्ला
दप्रमुखाद्विजाः॥ तथाहिराक्षसानांचबिभीषणपुरोगमाः॥ २६॥ बलिश्चनमुचिश्चैवहिरण्यक २५
शिपुस्तथावृषपर्वावृषश्चैवसंह्रादीनामकस्तथा॥ २७॥ एतेचान्येचबहवःशिष्याःशुक्रधीम स्य

तः॥ एतेशिवार्चनरताःसर्वेतेदैत्यनायकाः॥ २८॥ राक्षसाश्चैवतेसर्वेशिवपूजापरायणाः॥ हेतिःप्रहे
तिःसंयातिःप्रयातिःप्रघुतिस्तथा॥ २९॥ विद्युज्जिह्वस्तीक्ष्णदंष्ट्रोधूम्राक्षोभीमविक्रमः॥ माली
चैवसुमालीचमाल्यवानतिभीषणः॥ ३०॥ विद्युत्केशस्तडिज्जिह्वोरावणश्चमहाबलः॥ कुंभ
कर्णोदुराधर्षोवेगदर्शीप्रतापवान्॥ ३१॥ एतेहिराक्षसश्रेष्ठाःशिवागमपरायणाः॥ लिंगंसमभ्य
र्च्यसदासिद्धिंप्राप्ताःपरांतुते॥ ३२॥ रावणेनतपस्तप्तंसर्वेषामपिदुःसहं॥ तपःप्रियोमहादेवः
स्तुतिप्रियःसदाशंकरो॥ ३३॥ वरानयच्छतदासर्वेषांदुर्लभानपि॥ ज्ञानंविज्ञानसहितंल
ब्धंतेनसदाशिवात्॥ ३४॥ अजेयत्वंचसंग्रामेद्विगुण्यंशिरसांतथा॥ पंचवक्त्रोमहादेवो
दशवक्त्रोथरावणः॥ ३५॥ देवानृषीन्पितॄंश्चैवनिर्जित्यतपसाविभुः॥ महेशस्यप्रसा
दाच्चसर्वेषामधिकोभवत्॥ ३६॥ राजात्रिकूटाधिपतिर्महेशेनकृतोमहान्॥ सर्वेषांराक्षसेंद्राणां
परमासनमास्थितः॥ ३७॥ तपस्विनांपरीक्षार्थंयदृषीणांविहिंसनं॥ कृतंतेनतदाविप्राःरावणे
नतपस्विना॥ ३८॥ अजेयोहिमहान्जातःरावणोलोकरावणः॥ स्वस्यांतरंकृतंतेनप्रसादा

के॰ खंड॰ छंकरस्यतु ॥ ३९ ॥ लोकपालाजितास्तेनप्रतापेनतपस्विना ॥ ब्रह्मापिविजितोयेनवेदवादरतेनहि ॥ ४० ॥ सूर्यो अ॰ ६
पिविजितोयेनतेजसापरमेणहि ॥ अमृतांशुमयोभूत्वाजितोयेनेंदुरीद्विजाः ॥ ४१ ॥ दाहकत्वाज्जितोवन्हिः
२६ स्तथादंडाज्जितोयमः ॥ बलाधिक्याज्जितोवायुरीशः कैलाससभंजनात् ॥ ४२ ॥ ऐश्वर्येणाजितश्चेंद्रोविष्णुः रा
सर्वगतस्तथा ॥ लिंगार्चनप्रसादेनत्रैलोक्यंचवशीकृतं ॥ ४३ ॥ तदासर्वेमुनिगणाब्रह्मविष्णुपुरोगमाः
मेरुपृष्ठंसमासाद्यसमंत्रंचक्रिरेतदा ॥ ४४ ॥ पीडितास्मोरावणेनतपसामहताभृशं ॥ किंकुर्मेअधु
नाविष्णोवयंसर्वेपराजिताः ॥ ४५ ॥ तपस्विनांभक्तिमतांज्ञानिनांचविशेषतः ॥ अधिकोसौवैश्रवणा
सर्वलोकमहेश्वरः ॥ ४६ ॥ कथंजेयोभवेदद्यतत्सर्वंकथ्यतांप्रभो ॥ विष्णुरुवाच ॥ लिंगार्चनरताः सर्वे
पूर्यनास्यत्रसंशयः ॥ ४७ ॥ समाधिकरणेनैवलिंगमात्रप्रपूजकाः ॥ रावणेनकृतंयच्चतपः परमदुष्क
रं ॥ ४८ ॥ गोकर्णाख्येमहाक्षेत्रेश्रूयतांपरमाद्भुतं ॥ साक्षाल्लिंगार्चनंयेनकृतमास्तिमहात्मना ॥ ४९ ॥ ज्ञा
नंज्ञेयंज्ञानगम्यंयत्तपः परमाद्भुतं ॥ यत्कृतंरावणेनैवअन्येषांचैवदुर्लभं ॥ ५० ॥ वैराग्यंपरमास्थायऔ
दार्यंचतथाधिकं ॥ तेनैवममतात्यक्ता रावणेनबलीयसा ॥ ५१ ॥ संवत्सरसहस्राच्चस्वशिरोहिमहाभु
जः ॥ छित्त्वाकरेणलिंगस्यपूजनार्थंसमर्पयत् ॥ ५२ ॥ रावणस्यकबंधंचमहालिंगसमीपतः ॥ योगधा २६

एकदाक्रीडतातेनहारितंद्यूतमुत्तमं ॥ कितवैर्बध्यमानोहितदानोवाचकिंचन ॥ ३ ॥ पीडितोप्यभवत्तूष्णीं
तैरुक्तः पापकृत्ततः ॥ द्यूतेत्वयाहारितंचतद्द्रव्यंकिंनयच्छसि ॥ ४ ॥ नोवातत्कथ्यतांशीघ्रंयाथातथ्येनदुर्म
ते ॥ यद्धारितंप्रयच्छामिरात्रावित्यब्रवीच्चसः ॥ ५ ॥ तैर्मुक्तस्तेनवाक्येनगतास्तेकितवादयः ॥ तदानिशी
थसमयेगतोसौशिवमंदिरं ॥ ६ ॥ वितानंहर्तुकामोसौशिवमस्तकमारुहत् ॥ वितानंस्रजसंबध्यंयाव
न्मोचयतीश्वरः ॥ ७ ॥ सतुतोषमहादेवस्तावत्तस्यतुशंकरः ॥ अनेनकृतमद्यैवस्वदेहेनप्रपूजनं ॥
८ ॥ केचिन्नेत्रंप्रयच्छंतिजिह्वांकेचित्तथापरे ॥ शिरांसिकेचिद्यच्छंतिएतन्मेपूजनंमहत् ॥ ९ ॥ अ
नेनयत्कृतंचाद्यसर्वेषामाधिकंभुवि ॥ सर्वेषामेवभक्तानांवरिष्ठोयंवरप्रियः ॥ १० ॥ इतिमत्वानयामा
सवीरभद्रादिभिर्गणैः ॥ तेसर्वेत्वरिताजग्मुः कैलासाच्छिववल्लभाः ॥ ११ ॥ सर्वैर्डमरुनादेननादितंभु
नृ वनत्रयं ॥ तान्दृष्ट्वासहसोत्थायतस्करोसौदुरात्मवान् ॥ १२ ॥ लिंगस्यमस्तकात्सद्यः पलायनपरो
भवत् ॥ पलायमानंतंदृष्ट्वावीरभद्रः समानयत् ॥ १३ ॥ कस्माद्बिभेषिभोमंद देवदेवोमहेश्वरः ॥
प्रसन्नस्तवजातोद्यउदारचरितोह्यसौ ॥ १४ ॥ पार्श्वदोहिकृतस्तेनतस्करः परमेष्ठिना ॥ तस्मात्का
र्याशिवेभक्तिः सर्वेषामपिदेहिनां ॥ १५ ॥ पशवोपिहिपूज्यास्युः किंपुनर्मानवाभुवि ॥ येतार्किका

के॰खं॰ वलोकमुपाव्रजन्॥६५॥द्वारिस्थितःकिंकरवत्तदानंदीउवाचतान्॥शैलादोहिमहातेजागणानांवान अ॰९
२७ च राननः॥६६॥शिवप्रियोरुद्ररूपीमहात्माउवाचसर्वानथचेंद्रमुख्यान्॥कस्माद्यूयंगताःसंभ्रमाच्चए मा
तत्सर्वंकथ्यतांविस्तरेण॥६७॥नंदिनाचतदासर्वेपृष्टाःप्रोचुस्त्वरान्विताः॥रावणेनवयंसर्वेनिर्जि
तामुनिभिःसह॥६८॥प्रसादयितुमायाताःशिवंलोकेश्वरेश्वरं॥प्रहस्यभगवान्नंदीब्रह्माणंतमुवा
चह॥६९॥क्वयूयंक्वशिवःशंभुःतपसापरमेणहि॥द्रष्टव्योमानसस्थश्चसोथद्रष्टुंनपार्यते॥७०
यावद्भाव्याअनेकाश्चइंद्रियार्थारतस्तथैवच॥यावच्चममताभावस्तावदीशोहिदुर्लभः॥७१॥जितेंद्रिया
णांशांतानांतन्निष्ठानांमहात्मनां॥सुलभोलिंगरूपीस्याद्भवतांदुर्लभःसदा॥७२॥ब्रह्माद्योहिये द
देवाऋषयोपिविपश्चितः॥प्रणम्यनंदिनंप्राहुःकस्मात्त्वंवानराननः॥७३॥तत्सर्वंकथ्यतांसर्वेरावण
स्यतपोबलं॥नंदीउवाच॥कुबेरोधिकृतोयेनरावणेनपुरास्मराः॥७४॥एकादशोहिरुद्राणामस्मि
न्कैलासपर्वते॥स्थापितोदेवदेवेनशंभुनापरमेष्ठिना॥७५॥यावत्स्थितोहंकैलासेकुबरश्चाग २७
तस्ततः॥रावणोप्यगमत्तूर्णंआरुह्यवरवाहनं॥७६॥तंदृष्ट्वाचाब्रवीत्क्रुधःकुबेरोह्यत्रचागतः॥

त्वयादृष्टेनदृष्टेवाकथ्यतामविलंबितं॥७७॥किंकार्यंधनदेनाद्यतत्सर्वंवदसुव्रत॥तदोवाचमहातेजारा
वणोलोकरावणः॥७८॥मेध्यःश्रद्धान्वितोभक्त्याविषयासक्तदुर्लभः॥शिक्षापयितुमारब्धःमैवंकार्य
मितिप्रभो॥७९॥यथाहंचश्रियायुक्तआढ्योहंबलवानहं॥तथात्वंभवरेमूढमामोद्यंसमुपार्जय
॥८०॥अहंमूढीकृतस्तेनकुबेरेणमहात्मना॥ततस्तेचमाहात्म्यमवलोकितुमागतः॥८१॥ततःपरशि स्य
वंध्यात्वाआगतोह्यलकांप्रति॥ममदर्शनमात्रेणगतास्तेसर्वगुह्यकाः॥८२॥कुबेरसहितान्नंदिन्आग
तस्तवमंदिरं॥दीयतांचकुबेरोद्यनात्रकार्याविचारणा॥८३॥रावणस्यवचःश्रुत्वाअवोचंतत्वतोप्य
हं॥लिंगकोसिमहाभागत्वमहंचतथाविधः॥८४॥उभयोःसमतांज्ञात्वावृथाजल्पसिदुर्मते॥तथोक्तःस
न्नवादीन्मांवदनार्थेबलोद्धतः॥८५॥यथाभवद्भिःपृष्टोहंवदनार्थंमहात्मभिः॥पुरावृत्तंमयाप्रोक्तंशिव
पूजाविधेःफलं॥८६॥शिवेनदत्तंसारूप्यंनगृहीतंमयातदा॥याचितंहिमयाशंभोर्वदनंवानरस्यच॥८७
शिवेनकृपयादत्तंममकारुण्यशालिना॥निरहंकारिणोयेचनिस्तंभानिष्परिग्रहाः॥८८॥शंभोःप्रियास्तेविज्ञे
यायेन्येशिवबहिष्कृताः॥तथावदन्मयासार्धंरावणोपियथातथा॥८९॥मयापियाचितान्येवदशाव
क्त्राणिधीमता॥बहुभिर्वदनैःकार्यंशिवस्तवनमद्भुतं॥९०॥त्वदीयेनमुखेनैवकपीनांविधृतेनकिं॥

केदारखंड. वथावाकथितःशंभुस्त्वयादुर्मतिनाहि॥९१॥उपहासकरंवाक्यंपौलस्त्यस्यश्रुतंचतत्॥तदाभयाद्धिशंभोसौ अ.६
रावणोलोकरावणः॥९२॥ईदृशान्येववक्रोणिसंभविष्यंतियेध्रुवे॥तेःसमेतोयदाकोपिनरश्चर्यमहातपाः॥
२९ मांपुरस्कृत्यसहस्राहनिष्यतिनसंशयः॥एवंशप्तोमयाब्रह्मन्रावणोलोकरावणः॥९४॥अर्चितंकेवलंलिंगंप
प रमेणसमाधिना॥पीठिकारूपसंस्थेनविष्णुनाचविनास्कराः॥९५॥विष्णुःसहिमहाभागास्तस्मात्सर्वेविधास्य
ति॥देवदेवोमहादेवोविष्णुरूपीमहेश्वरः॥९६॥सर्वेयूयंप्रार्थयंतुविष्णुंसर्वगुहाश्रयं॥अहंहिसर्वदेवानां
पुरोवर्तीभवाम्यथ॥९७॥तेसर्वेनंदिनोवाक्यंश्रुत्वावाक्यंत्वरान्विताः॥वैकुंठमागतागीर्भिर्विष्णुंस्तोतुं
प्रचक्रिरे॥९८॥देवाऊचुः॥नमोभगवतेतुभ्यंदेवदेवजगत्पते॥त्वदाधारमिदंसर्वंजगदेतच्चराचरं॥
॥९९॥एवंलिंगंत्वयाविष्णोधृतंवैपीठरूपिणा॥अवताराःकृताःपूर्वंअस्मदर्थेत्वयाप्रभो॥१००॥
मत्स्योभूत्वात्वयावेदाःस्थापिताब्रह्मणोमुखे॥हयग्रीवस्वरूपेणघातितोमधुकैटभौ॥१॥तथाक
मठरूपेणधृतोवैमंदराचलः॥वराहरूपमास्थायहिरण्याक्षोहतस्त्वया॥२॥हिरण्यकशि २९
पुर्दैत्योहतोनृसिंहरूपिणा॥तथाचैवबलिर्बद्धोदेवोवामनरूपिणा॥२॥श्रीशंकर

रणयायुक्तंपरमेणसमाधिना॥५३॥लिंगेलयंसमाधायकंचाविकलमास्थितं॥ओंछरोप्यवाप्येवतेना न्य
पिशिवपूजनं॥५४॥कृतंतेनैवशिरसातथाचैवापरेणहि॥एवंशिवंशिरांस्येवबहूनितेनसमर्पिता
न्येवशिवार्चनार्थे॥५५॥भूत्वाकबंधोहिपुनःपुनश्चसदाशिवोसौवरदोबभूव॥मयाविनास्करा
स्तत्रपिंडीभूतेनवैपुरा॥५६॥वरान्वरयपौलस्त्ययथेष्टंसौददाम्यहं॥रावणेनतथाचोक्तःशिवःप न्
रमसंगलः॥५७॥यदिप्रसन्नोभगवान्ममैवस्कररस्त्तम॥नकामयेन्यंचवरंआश्रयेत्वत्पदांबुजं॥५८
यथातथाप्रदातव्यंयद्यदस्तिकृपामयि॥तदातदाशिवेनोक्तोरावणोलोकरावणः॥५९॥मत्प्रसादाच्च
सर्वंत्वंयथेष्टंप्राप्यसिध्रुवं॥एवंप्राप्तंशिवात्सर्वंरावणेनतपस्विना॥६०॥तस्मात्सर्वैर्भवद्भिश्चतप
सापरमेणहि॥विजेतव्योरावणोयमितिमेमनसिस्थितं॥६१॥अच्युतस्यवचःश्रुत्वाब्रह्माद्यादेवताग
णाः॥चिंतामापेदिरेसर्वेचिरंतेविषयात्मकाः॥६२॥ब्रह्मापिचेंद्रियग्रस्तःकृतांयभितुमुद्यतः॥इं
द्रोपिजारभावश्चचंद्रोपिगुरुतल्पगः॥६३॥यमःकदर्यभावाच्चचंचलत्वात्सदागतिः॥पावकःसर्वभ
क्षित्वात्तथान्येदेवतागणाः॥६४॥अशक्तारावणंजेतुंतपसाचविजृंभितं॥चिंतयित्वाचतेसर्वेशि

न्कमहाकपिः ॥ अवतीर्णः सहायार्थं विष्णोरमिततेजसः ॥ १४ ॥ मैंदाद्यो हि कथ्यन्ते सर्वे सुरसत्तमाः ॥ एवं सर्वे सुरगणा अव
२९ तेरुर्यथा तथा ॥ १५ ॥ तथैव विष्णुरुत्पन्नः कौसल्यानंदवर्धनः ॥ विश्वस्य रममाणात्त्व रामइत्युच्यते बुधैः ॥ १६ ॥ शेषोपि
भक्त्या विष्णोश्च जातो लक्ष्मण नामतः ॥ दोर्दंडादपि विष्णोश्च अवतीर्णौ प्रतापिनौ ॥ १७ ॥ शत्रुघ्नभरतारव्यौ च विख्यातौ
भुवनत्रये । मिथिलाधिपतेः कन्या योक्ता वेदब्रह्मवादिभिः ॥ १८ ॥ सा ब्रह्मविद्यावतरत्सुराणां कार्यसिद्धये ॥ सीता जा
ता लांगलात्त्वयज्ञभूमिं विकर्षतः ॥ १९ ॥ तस्मात्सीतेति विख्याता विद्या सान्वीक्षिकी तदा ॥ मिथिलायां स
मुत्पन्ना मैथिलीत्यभिधीयते ॥ २० ॥ जनकस्य कुले जाता विश्रुता जनकात्मजा ॥ ख्याता वेदवती पूर्वं ब्र
ह्मविद्या मनस्विनी ॥ २१ ॥ सा दत्ता जनकेनैव विष्णवे परमात्मने ॥ तया थ विद्यया सार्धं देवदेवो जगत्पतिः ॥ २२ ॥ उग्रे
तपसि लीनोसौ विष्णुः परममंगलः ॥ रावणं जेतुकामोसौ रामो राजीवलोचनः ॥ २३ ॥ अरण्यवासमकरोद्देवानां का
र्यसिद्धये ॥ शेषावतारोपि महान्तपः परम दुष्करं ॥ २४ ॥ ततापपरया भक्त्या देवानां कार्यसिद्धये ॥ शत्रुघ्नो भरतश्चै
व तपतुः परमं तपः ॥ ततोसौ तपसा युक्तः सार्धं तैर्देवतागणैः ॥ सगणं रावणं रामः षड्भिर्मासैरजीघनत् ॥ २६ ॥ विष्णुनाघा २९
तितः शस्त्रैः शिवसायुज्यमाप्तवान् ॥ सगणः सकृतः सद्यो बंधुभिः सहसक्रतः ॥ २७ ॥ शिवप्रसादात्सकलं भूतादे

तमवाप ह ॥ द्वैताद्वैतविवेकार्थं ऋषयोप्यत्र मोहिताः ॥ २८ ॥ ते सर्वे प्राप्नुवंतीह शिवार्चनपरावराः ॥ येर्चयंति शिवं नित्यं लिंगरू
पिणमव्ययं ॥ २९ ॥ स्त्रियो वाप्यथवा शूद्राः श्वपचा ह्यंत्यवासिनः ॥ ते सर्वे प्राप्नुवंत्येव सर्वदुःखप्रणाशनं ॥ ३० ॥ पशवोपि परं याताः
किंपुनर्मानुषादयः ॥ ये द्विजा ब्रह्मचर्येण तपः परममास्थिताः ॥ ३१ ॥ यज्ञैरनेकैरिष्ट्वाथ स्वर्गं गच्छंति मानवाः ॥ ज्योतिष्टोमावा
जपेयाद्य तिरात्रादयो ह्यमी ॥ यज्ञाः स्वर्गं प्रयच्छंति यज्वनानात्र संशयः ॥ तस्मिन् स्वर्गे सुखं भुक्त्वा पुण्यक्षयकरं महत् ॥ ३३ ॥ पुण्य
क्षये तु यज्वानो मर्त्यलोके पतंति वै ॥ पतितानां च संसारे देवाद्दधिः प्रजायते ॥ ३४ ॥ गुणत्रयमयो विप्रास्तासु तास्विह यो
निषु ॥ यथा सत्वं संभवति सत्वयुक्तश्च भवेन्नरः ॥ ३५ ॥ राजसाश्च तथा ज्ञेयास्तामसाश्चैव तद्विधाः ॥ एवं संसारचक्रेस्मि
न्भ्रामिता बहवो जनाः ॥ ३६ ॥ यदृच्छया दैवगत्या सेवते चाशिवं नरः ॥ शिवध्यानपरायां च नरा यांयतचेतसां ॥ ३७ ॥ मा
यानिरसनं सद्यो भवतीति न चान्यथा ॥ मायानिरसनात्सुखं सोन त्यक्ते च गुणत्रयं ॥ ३८ ॥ यदा गुणत्रयातीतो भवती
ह स मुक्तिभाक् ॥ तस्माल्लिंगार्चनं कार्यं सर्वैरपि च देहिभिः ॥ ३९ ॥ लिंगरूपी शिवो भूत्वा त्रायते सचराचरं ॥ पुरा भवद्भिः
पृष्टोहं लिंगरूपी कथं शिवः ॥ ४० ॥ तत्सर्वं कथितं विप्रा यथातथ्येन संप्रति ॥ तस्माद्दूरं भक्षितवान् शिवलोके महेश्व

स्कं० केदार० २: ॥१४३॥ तत्सर्वं श्रूयतां विप्रा यथावत्कथयामि च ॥ इति श्रीस्कंदपुराणे केदारखंडे अष्टमोऽध्यायः ॥ श्री ॥ लोमश उवाच ॥ ए अ० ९
कदा तु सभामध्ये आस्थितो देवराट् स्वयं ॥ लोकपालैः परिवृतो देवैश्च ऋषिभिस्तथा ॥१॥ अप्सरोगणसंवीतो गंधर्वैश्च पु
३० रस्कृतः ॥ उपगीयमानविजयः सिद्धविद्याधरैरपि ॥२॥ तदा शिष्यैः परिवृतः सर्वैर्बुद्धिमतां वरः ॥ आगतोसौ महाभागो बृह
स्पतिरुदारधीः ॥३॥ तं दृष्ट्वा चोत्थिता देवाः प्रणेमुः प्रणयान्विताः ॥ इंद्रोपि दृष्ट्वा नाग्रे गुरुं वाचस्पतिं तदा ॥४॥ नो
त वाच किंचिद्दुर्मेधा वचो मानपुरःसरं ॥ नाह्वानं नासनं तस्य न विसर्जनमेव च ॥५॥ शक्रं प्रमत्तं ज्ञात्वा च मदाढ्य
स्य दुर्मतिं ॥ तिरोधानमनुप्राप्तो वाचस्पतिरुदारधीः ॥६॥ गते देवगुरौ तस्मिंश्चिनेमेस्का भवन्सुराः ॥ य
क्षा नागाः सगंधर्वा ऋषयो विनयाद्द्विजाः ॥७॥ गर्वस्य चावसाने तु लब्धसंज्ञो हरिः सुरान् ॥ पप्रच्छ तान्हि तेने
वक्क गतोस्ति महातपाः ॥८॥ तदैव नारदेनोक्तः शक्रो देवाधिप स्तदा ॥ त्वया कृता ह्यवज्ञा तु गुरोर्नास्त्यत्र शं सं
यः ॥ गुरोरवज्ञया राज्यं गतं ते बलिसूदन ॥ तस्मात्क्षमापनीयोसौ सर्वभावेन हि त्वया ॥१०॥ एतच्छ्रुत्वा वचस्तस्य
नारदस्य सवासवः ॥ आसनात्सहसोत्थाय तैः सर्वैः परिवारितः ॥११॥ आगच्छत्त्वरया युक्तो गुरोर्गेहं ततो द्विजः ॥ पप्र ३०
च्छ तारां शक्रोसौ क्व गतो मतिमान् प्रभुः ॥१२॥ न जानामीत्युवाचेदं तारा शक्रं निरीक्षती ॥ तदा चिंतान्वितो भूत्वा हे

भृगूणामन्वये भूत्वा कृतवीर्यात्मजो महान् ॥ हतो येन त्वया विष्णो तथैव परिपालय ॥३॥ रावणस्य भयाद
स्मांस्त्रातुं भूयो हि सि च रन् ॥ एवं संप्रार्थितो देवैर्भगवान्भूतभावनः ॥४॥ उवाचाथ सुरान्सर्वान्नूपासु देवो
जगन्मयः ॥ हे देवाः श्रूयतां वाक्यं प्रस्तावसदृशं महत् ॥५॥ शैलादं च पुरस्कृत्य सर्वे देवास्त्वरान्विताः ॥ संभ
विष्यामस्ययोध्यायां गृहे दशरथस्य च ॥६॥ ब्रह्मविद्यासहायो हि भवतां कार्यसिद्धये ॥ जनकस्य गृहे सा
क्षात् ब्रह्मविद्या जनिष्यति ॥७॥ भक्तो हि रावणः साक्षाच्छिव [illegible] ध्यानपरायणः ॥ तपसा महता यु
क्तो ब्रह्मविद्यां यदीच्छति ॥८॥ तथा तद्भयभ्रष्टो रक्षो भवति तत्क्षणात् ॥ न तापसो न भक्तः स्यान्न सो
रान्वेषणतत्परः ॥९॥ अदत्तां ब्रह्मविद्यां यो बलात्सेवितुमिच्छति ॥ तदा स साध्यो भवति पुरुषो धर्मनिर्जि
तः ॥१०॥ एवं संभाष्य भगवान्विष्णुः परममंगलः ॥ समाश्वास्य सुरान्सर्वान्स्वधाम परमं ययौ ॥११॥ त
तः सर्वे सुरगणा अवतारपरा भवन् ॥ वाली चेंद्रांशसंभूतः सुग्रीवोंशुमतः स्मृतः ॥१२॥ तथा ब्रह्मांशसंभू
तो जांबवान्कपिकुंजरः ॥ शिलादतनयो नंदी शिवस्यानुचरः प्रियः ॥१३॥ योसौ चैकादशो रुद्रो हनुमा

शक्रःस्वगृहमाव्रजत्॥१३॥एतस्मिन्नंतरेतत्र अनिष्टान्यद्भुतानिच॥अभवन्सर्वदुर्वार्तंशक्रस्यैवदुरात्मनः॥१४॥
पातालस्थेनबलिनाश्रुतंशक्रस्यचेष्टितं॥ययौदैत्यैःपरिवृतःपातालादमरावतीं॥१५॥तदायुद्धमतीवासीद्दे
वदैत्यैःसमाकुलं॥देवाःपराजितादैत्यैःराज्यंशक्रस्यतत्क्षणात्॥१६॥ससांगंसकलंतस्यमूढस्यचदु
रात्मनः॥नीतंसर्वप्रयत्नेनपातालंत्वरितंगतः॥१७॥शुक्रप्रसादात्तेसर्वेतथाविजयिनोभवन्॥शक्रोपि
हृतश्रीर्जातोदैवैस्त्यक्तस्ततोभ्रमन्॥ना [illegible]तिरोधानगताबभूवकमलेक्षणा॥ऐरावतोमहानागस्तथै
वोच्चैःश्रवाहयः॥१९॥एवमादीनिरत्नानिअनेकानिबहून्यपि॥नीतानियानिस्वर्गाच्चदैत्यैर्लोभादसा
धुभिः॥२०॥पुण्यभांजितुलान्येवपतितानिचसागरे॥तदाचविस्मयाविष्टोबलिरूचेगुरुंप्रति॥२१॥
देवान्निर्जित्यचास्माभिरानीतानिबहूनिच॥रत्नानितुसमुद्रेथपतितानितदद्भुतं॥२२॥बलेस्तद्वचनंश्रुत्वा
उशनाप्रत्युवाचतं॥अश्वमेधशतेनैवसुरराज्यंभविष्यति॥२३॥दीक्षितस्यनसंदेहस्माद्योक्तासएवच॥अश्व स्त
मेधैर्विनाकिंचित्स्वर्गंभोक्तुंनपार्यते॥२४॥गुरोर्वचनमाकर्ण्यतूष्णींभूतोबलिस्तदा॥अकरोच्चबलिर्यज्ञान्
गुरुणोशनसातदा॥२५॥इंद्रोपिश्रीच्युततांप्राप्तोजगामपरमेष्ठिनं॥विज्ञापयामासतदासर्वराज्यभयादि
कं॥२६॥शक्रस्यवचनंश्रुत्वापरमेष्ठीप्युवाचतं॥सुरानाहूयसर्वांश्चलयासहमहामते॥२७॥आराधनार्थं

 गछामोविस्णुंसर्वेश्वरेश्वरं॥तथेतिमत्वातेसर्वेशक्राद्यालोकपालकाः॥२८॥ब्रह्माणंचपुरस्कृत्यतटंक्षीरार्णवस्यच॥आयो
पवेशनंकृत्वाहरिंस्तोतुंप्रचक्रिरे॥२९॥ब्रह्मादयऊचुः॥देवदेवजगन्नाथसुरासुरनमस्कृत॥पुण्यश्लोकाव्यया
 नंतपरमात्मन्नमोस्तुते॥३०॥यज्ञोसियज्ञरूपोसियज्ञांगोसिरमापते॥तदद्यकृपयाविष्णोदेवानांवरदोभव॥
॥३१॥गुरोरवज्ञयाचाद्यभ्रष्टराज्यःशतक्रतुः॥जातश्चऋषिभिःसाकंतस्मादेनंसमुद्धर॥३२॥श्रीभगवानुवाच॥
गुरोरवज्ञयासर्वंनश्यतीतिकिमद्भुतं॥येपापिनोह्यधर्मिष्ठाःकेवलंविषयात्मकाः॥३३॥पितरोनिंदितोयैश्चनि
र्दैवास्तेनसंशयः॥अनेनयत्कृतंब्रह्मन्नसद्यस्तत्फलमागतं॥३४॥कर्मणैतस्यचाक्रस्यफलंसर्वंनिरीक्ष्यतां॥
विपरीतोयदाकालःपुरुषस्यभवेत्तदा॥३५॥मृतमैत्रींप्रकुर्वीतसर्वकार्यार्थसिद्धये॥तेनैवकारणेनमदीय नैव
वचनंकुरु॥३६॥कार्यहेतोस्त्वयाकार्योदैत्यैःसहसमागमः॥एवंभगवतादिष्टःशक्रःपरमबुद्धिमान्॥अम
रावतींययौ तत्रविस्णुंहित्वासुरैःसह॥इंद्रंसमागतंश्रुत्वाइंद्रसेनोरुषान्वितः॥बभूवसैन्येनसहहंतुका
मःपुरंदरं॥नारदेनतदादैत्योबलिश्चबलिनांवरः॥निवारितस्तद्वधाच्चवाक्यैरुच्चावचैःसतु॥नारदस्यैव
वचनात्त्यक्तमन्युर्बलिस्तदा॥४०॥बभूवसहसैन्येनआगतोहिशतक्रतुं॥इंद्रसेनेनदृष्टोसोलोकपालैः
समावृतः॥४१॥निश्रीकोनिःप्रभोमंदोगततेजाविमत्सरः॥निरहंकारिणंदृष्ट्वाकृपयापरयायुतः॥उवा

कृतो ॥ वत्सरा बहवो ध्यासन्नतदा बुध्धिमकल्पयत् ॥ ५८ ॥ संस्मृत्य वचनं विष्णोर्विमृश्य च पुनः पुनः ॥ एकदा तु सभाम
ध्ये आसीनो देवराट् स्वयं ॥ ५९ ॥ उवाच प्रश्रितं वाक्यं तदानीतिमतां वरः ॥ प्राप्तव्यानि त्वया वीर अस्माकं च यथा बले
पुरा ॥ ६० ॥ गजादीनि बहून्येव रत्नानि विविधानि च ॥ प्रयत्नः खलु कर्तव्यो ह्यस्माभिस्त्वरयान्वितैः ॥ ६१ ॥ तेषां चो
धरणे दैत्य रत्नानामिह सागरात् ॥ तर्हि निर्मथनं कार्यं सर्वेषां कार्यसिध्धये ॥ ६२ ॥ बलिः प्रवर्तितस्तेन शक्रेण सू
रसूदनः ॥ उवाच शक्रं त्वरितः केनेदं मथनं भवेत् ॥ ६३ ॥ तदा नभोगता वाणी मेघगंभीरनिस्वना ॥ उवाच देवदैत्यां
श्च मंथध्वं क्षीरसागरं ॥ ६४ ॥ भवतां बलवृध्धिर्हि भविष्यति न संशयः ॥ मंदरं चैव मंथानं रज्जुं कुरुत वासुकिं ॥
॥ ६५ ॥ पश्चाद्देवाश्च दैत्याश्च संमिलित्वा च मथ्यतां ॥ नभोगतां च तां वाणीं निशम्याथ तदासुराः ॥ ६६ ॥ दैत्यैः सा
र्धं तदा सर्वे उद्यमं चक्रुरोजसा ॥ पातालान्निर्गताः सर्वे तदा ते हि सुरासुराः ॥ ६७ ॥ गृहीतुकामास्तत्रैव मंदरं
पर्वतोत्तमं ॥ दैत्याः शतकोटिसंख्याकास्तथा देवा न संशयः ॥ ६८ ॥ उद्युक्ताः सहसा प्राप्तुं मंदरं कनकप्रभं ॥
सरलं वर्तुलाकारं अतुलं च महाप्रभं ॥ ६९ ॥ अनेकरत्नसंवीतं नानाद्रुमनिषेवितं ॥ चंदनैः पारिजातैश्च
नागपुंनागचंपकैः ॥ ७० ॥ नानामणिगणाकीर्णं सिंहशार्दूलसेवितं ॥ यक्षकिन्नरगंधर्वैः सेवितं च म
नोहरं ॥ ७१ ॥ एवंविधं महाशैलं दृष्ट्वा ते सुरसत्तमाः ॥ ऊचुः प्रांजलयः सर्वे तदा सानुनयं वचः ॥ ७२ ॥

देवा ऊचुः ॥ त्वदाश्रितो वयं सर्वे विज्ञप्तुमिह चागताः ॥ तच्छृणुष्व महाशैल परेषामुपकारकं ॥ ७३ ॥ एवमुक्तस्तदा शै
लो देवदैत्यैः स मंदरः ॥ उवाच प्रश्रितो भूत्वा परं विग्रहवान्ध्रुवं ॥ ७४ ॥ तेन रूपेण रूपी सः सर्वदो मंदराचलः ॥ कि
मर्थमागताः सर्वे मत्समीपं तदुच्यतां ॥ ७५ ॥ तदा वज्रिरुवाचेदं प्रस्तावसदृशं वचः ॥ इंद्रोपि त्वरया युक्तो बभाषे
सूक्तं वचः ॥ ७६ ॥ अस्माभिः सह कार्यार्थे भव त्वं मंदराचल ॥ अमृतोत्पादनस्यार्थे त्वं मंथा भव सुव्रत ॥ ७७ ॥
तथेति मत्वा तद्वाक्यं देवानां कार्यसिध्धये ॥ तदा देवासुराः सर्वे श्रुत्वा नम्य महाचलं ॥ ७८ ॥ उत्पाटयन्मृदुतलं मंद
रं च ततोद्भुतं ॥ क्षीरार्णवं नेतुकामा ह्यशक्तास्ते तदाभवन् ॥ ७९ ॥ पर्वतः पतितस्तः सद्यो देवदैत्योपरि ध्रुवं ॥ केचिद्भग्ना
मताः [illegible] केचित्केचिन्मूर्छापराभवन् ॥ ८० ॥ परिवादरताः केचित्केचित्क्लेशत्वमागताः ॥ एवं भग्नोद्यमा
जातास्मरासुरदानवाः ॥ ८१ ॥ चेतनां परमां प्राप्य तुष्टुवुर्जगदीश्वरं ॥ रक्ष रक्ष महाविष्णो शरणागतवत्सल ॥ ८२ ॥
त्वया ततमिदं विश्वं जंगमाजंगमं महत् ॥ देवानां कार्यसिध्यर्थं प्रादुर्भूतो हरिस्तदा ॥ ८३ ॥ तं दृष्ट्वा सहसा विष्णुः ग
रुडोपरि संस्थितः ॥ लीलया पर्वतश्रेष्ठमुन्नम्यारोप्य तत्क्षणात् ॥ ८४ ॥ गरुत्मति तदा देवः सर्वेषामभयं ददौ ॥ सं
स्थाप्य च तदा सर्वान्क्षीरोदस्योत्तरे तटे ॥ ८५ ॥ नीत्वा तं पर्वतं त्वब्धौ निक्षिप्याशु ततो ययौ ॥ तदा सर्वे सुरगणा आग
त्याथो स्मरैः सह ॥ ८६ ॥ वासुकिं च समाहूय चक्रिरे समयं च तं ॥ मंथानं मंदरं चैव वासुकिं रज्जुमेव च ॥ ८७ ॥ कृत्वा सुरा
सुराः सर्वे ममंथुः क्षीरसागरं ॥ क्षीराब्धेर्मथ्यमानस्य पर्वतो हि रसातलं ॥ ८८ ॥ गतस्तत्क्षणाद्देवः कूर्मो भूत्वा रमापतिः ॥

स्कं० केदार० उद्धृत्यपृष्ठभागेनतदद्भुतमिवाकरोत्॥८९॥भ्राम्यमाणस्तथाशैलोनोदितःसुरदानवैः॥भ्रममाणोनिराधारोबोधश्चैवचकुरुंवि अ० ६
ना॥९०॥यस्मात्मातदाविष्णुराधारोमंदरस्यच॥जातोभूत्तत्क्षणादेवसुराणांकार्यसिद्धये॥९१॥दोर्भिश्चतुर्भिःसंगृह्यमथनार्थं
३३ क्रखवावहं॥तदासुरासुराःसर्वेममंथुःक्षीरसागरं॥९२॥एकीभूताबलेनैवमतिमात्रमदोत्कटाः॥पृष्ठंकठोरंज्ञात्वाचकूर्म
ठस्यमहात्मनः॥तथासौपर्वतश्रेष्ठोवज्रसारमयोदृढः॥उभयोर्घर्षणाच्चैववडवाग्निःसमुत्थितः॥९४॥हालाहलंचसंजातंत
दृष्टंनारदेनहि॥तदादेवानुवाचेदंदेवर्षिरमितद्युतिः॥९५॥नकार्यंमथनंचाब्धेर्मेवह्निरधुनानघैः॥शिवंप्रार्थयतक्षिप्रंस
र्वेपिद्रुघनाशनं॥९६॥मांगल्यंमंगलानांचदेवंपशुपतिंशुभं॥तद्विस्मृतंसुराःसर्वेपुरावृत्तंमहात्मनः॥९७॥दक्षस्ययज्ञनेजा
तंवीरभद्रेणयत्कृतं॥तस्माच्छिवःस्मर्यतामाशुदेवःपरंपराणामपियस्परंच॥९८॥परात्परंपरमानंदरूपंयोगिध्येयंनिःप्र
पंचैकरूपं॥तेमथ्यमानास्त्वरितादेवर्षेःस्वार्थसाधकाः॥९९॥अभिक्रोधपराःसर्वेनश्रृण्वंतिवचस्तदा॥नारदस्यमुखो
द्गीतंदेवर्षेर्भावितात्मनः॥३००॥येमूढाःपापिनोह्यज्ञास्तथादुष्कृतिनोजडाः॥उपदेशोस्यविद्वद्भिर्नोपदेश्याकदाचन
॥१॥तेरागद्वेषसंवीताःसर्वेशिवपराङ्मुखाः॥केवलोद्यमसंवीताममंथुःक्षीरसागरं॥२॥अतिनिर्मथनाज्जा
तंक्षीराब्धेश्चहालाहलं॥त्रैलोक्यदहनेप्रौढंप्राक्कृतंतुदिवौकसां॥३॥अंतर्ऊर्ध्वंदिशःसर्वाव्याप्यकृत्स्नंनभस्थ
लं॥ग्रसितुंसर्वभूतानिकालकूटंसमारभत्॥४॥दृष्ट्वाग्रस्तंह्योजसासर्वलोकंतंसापरोधंसहपर्वतेन॥तत्रैवहि ३३
त्वाथसुरास्तदानींपलायमानाह्यसुरैःसमेताः॥५॥तथैवसर्वेऋषयोपित्वाद्यायेसहस्रशः॥दक्षस्ययज्ञनेयेषां
यथाजातंतथैवतत्॥६॥तदासुरासुराःसर्वेभृगुणानोदिताभृशं॥वेदवाक्यैश्चविविधैःकालकूटंप्रशाम्यति॥७॥

चबलिरितेनैवप्रहसन्निवदैत्यराट्॥कस्मादिहागतःशक्रस्तत्वंप्रतिकथ्यतां॥४३॥तस्यैवंतद्वचःश्रुत्वास्मयमान
उवाचतं॥वयंकश्यपदायादायूयंसर्वेतथैवच॥४४॥यथावयंतथायूयंविग्रहोहिनिरर्थकः॥ममराज्यंक्षणेनैव
वनीतंदैवयशात्वया॥४५॥तथाहृतानितान्येवरत्नानितुबहूनिच॥गतानितत्क्षणादेवमत्रत्यानिचतत्रवै॥तस्मा
द्विमर्शःकर्तव्यःपुरुषेणविपश्चिता॥विमर्शाज्जायतेज्ञानंज्ञानान्मोक्षोभविष्यति॥४७॥किंतुमेबहुयुक्तेनज्ञा
नेनचतवाग्रतः॥शरणार्थीत्वहंप्राप्तःसुरैःसहतवांतिकं॥४८॥एतच्छ्रुत्वातुशक्रस्यवाक्यंवाक्यविदांवरः॥त्वमागतोसि
देवेंद्रकिमर्थंतन्नविद्महे॥४९॥शक्रोपितद्वचःश्रुत्वाअश्रुपूर्णाकुलेक्षणः॥किंचिन्नोवाचसतदानारदोवाक्यम
ब्रवीत्॥५०॥बलेत्वंनविजानासिकार्याकार्यविशारद॥धर्मोहिमहतामेषःशरणागतपालनं॥५१॥शरणागतं
चविप्रंचरोगिणंरक्षमेवच॥यएतान्नाचरक्षंतितेवैब्रह्महणःस्मृताः॥५२॥शरणागतशब्देनआगतस्तवसंनि
धिं॥संरक्षणीयःपोष्यश्चत्वयानात्रसंशयः॥५३॥एवमुक्तोनारदेनतदादैत्यपतिःस्वयं॥विमृश्यपरया
बुध्याकार्याकार्यविचक्षणः॥५४॥शक्रंसंपूजयामासबहुमानपुरःसरं॥लोकपालैःसमेतंचअन्यैःसुरगणैःसह
॥५५॥प्रत्ययार्थमनेकानिशपथानिकृतानिवै॥बलिप्रत्ययभूतानिसचकारपुरंदरः॥५६॥एवंससमयंकृ
त्वाशक्रःस्वार्थपरायणः॥बलिनासहचावासीदर्थशास्त्रपरोमहान्॥५७॥एवंनिवसतस्तस्यसुतलेपिरात

विप्रानास्त्यत्रसंदेहः सत्यंसत्यंवदामिवः॥ भृगुणोक्तं चतेश्रुत्वाकालकूटभयार्दिताः॥८ ॥सत्यलोकंचसंप्राप्ताह्य
सुरादानवाःस्फुराः॥ तावत्तेषामग्रतः कालकूटंतत्रस्थितंसत्यलोकंसमग्रं॥ ९॥ सब्रह्माणंदाहयंतंतदानींजाज्व
ल्यमानंप्रभयाद्भुतंच॥ ज्वलितास्सत्यलोकाच्चनिर्गतश्चतुराननः॥१०॥ हंसंत्यक्त्वास्वचरणैः पलायनपरोभवत्॥
तदातेब्रह्मणाद्दृष्टाः धर्मज्ञाश्चसुरासुराः॥११ ॥तान्सर्वानपिकुमारैश्चनारदेननिवारितः॥ ब्रह्मोवाच॥ अकार्यंकिं
कृतंदेवास्तस्मात्क्षोभोयमागतः॥१२॥ ईश्वरस्यहिजातोयंनान्यथाममभाषितं॥ ततोदेवैःपरिवृतोदत्तोपनि
षदैःसह॥१३॥ नानाभेदैःसंपरीतःकालकूटभयाद्धयो॥ ततःचिंतान्वितादेवाइदमूचुःपरस्परं॥१४॥ अधि
घाजालसंवीताःकुर्यानःशरणंचकः॥ ब्रह्माणंचपुरस्कृत्यतदादेवास्त्वरान्विताः॥१५॥ वैकुंठमाव्रजंतूसर्वे
कालकूटभयार्दिताः ब्रह्मादयोकृषिगणाश्चतदापरेशंविष्णुंपुराणपुरुषंप्रभविष्णुमीशं॥ वैकुंठमाश्रित
मधोक्षजमच्युतंचसर्वेसुरासुरगणाःशरणंप्रयाताः॥१६॥ तावज्ज्वलंतंस्कमहतत्कालकूटंसमभ्यगात्॥ दग्ध्वाचब्र
ह्मणोलोकंवैकुंठंचददाहवै॥१७॥ कालकूटाग्निनादग्धोविष्णुःसर्वगुहाशयः॥ पार्षदैःसहितःसद्यस्तमालसदृश
छविः॥१८॥ वैकुंठंचसुनीलंचसर्वलोकैःसमावृतं॥ ज्वालाकुलेनसंवीताःसर्वेलोकास्तदाभवंन्॥१९॥ अ
ष्टावरणसंवीतंब्रह्मांडंब्रह्मणासह॥ भस्मीभूतंचकारासुज्वलकल्मषमद्भुतं॥२०॥ नोभूमिर्नजलंनाग्निर्नोवा
न युर्नभस्तथा॥ नाहंकारोनचमहन्मुलविद्यातथैवच॥२१॥ शिवस्यकोपात्संजातंतदाभस्माकुलंजगत्॥२२॥

स्कं०केदारखं इतिश्रीस्कंदपुराणेकेदारखंडेशैवशास्त्रेनवमोध्यायः॥मुनयऊचुः॥यत्वयाकथितंसर्वंब्रह्मांडंसचराचरं॥भस्मी डेअ०९
भूतंरुद्रकोपात्कालकूटाग्निनायदा॥ १ ॥ब्रह्मांडात्परतः किंतुरुद्रंमन्यामहेवयं॥यदाचराचरंनष्टंब्रह्मविष्णु
२४ पुरोगमं॥ २ ॥महाक्षयोहिसंजातःकथंसृष्टिःप्रवर्तिता॥कुत्रब्रह्माचविष्णुश्चकुतश्चेंद्रोपिदेवराट्॥ ३ ॥ये
न्येसुरासुराःकुत्रभस्मीभूतालयंगताः॥अतऊर्ध्वंकिमभवत्तत्सर्वंवक्तुमर्हसि॥ ४ ॥व्यासप्रसादात्सकलंवे
त्थत्वंनापरोहितत्॥तस्माज्ज्ञानमयंशास्त्रंत्वंजानासिनचापरः॥ ५ ॥इतिपृष्टस्तदासर्वैर्मुनिभिर्भावितात्मभिः
॥ततोव्यासंनमस्कृत्यवाक्यंचेदमुवाचह॥ ६ ॥लोमशउवाच॥यदाब्रह्मांडमध्यस्थादग्धाह्यब्धेर्विषाग्निना
॥हरिब्रह्मादयोह्येतेलोकपालास्तथैवच॥ ७ ॥तदाविज्ञापितःशर्वोहेरंबेणमहात्मना॥हेरंबउवाच॥हेरु
द्रहेमहादेवहेस्थाणोजगतःपते॥ ८ ॥मयाविनोदेनकृतोविघ्नस्तेषांसुदुर्जयः॥येनमंत्रेणमोहाच्चनार्चयंति
चमामपि॥ ९ ॥उद्योगंयेप्रकुर्वंतितेषांकोप्याधिकोभवेत्॥एतेकटाहमध्यस्थादग्धाःखेनसहैवच॥ १० ॥
संजीवयमहादेवत्वंत्रातात्रिपुरांतक॥एवमभ्यर्थितस्तेनपिनाकीवृषभध्वजः॥ ११ ॥विघ्नांधकारसूर्येण
गणाधिपतिनातदा॥लिंगरूपोब्रवीच्छंभुर्निराकारोनिरामयः॥ १२ ॥निरंजनोव्योमकेशःकपर्दीनीललो २४
हितः॥महेश्वरउवाच॥हेरंबशृणुमेवाक्यंश्रद्धयापरयायुतः॥ १३ ॥अहंकारात्मकंसर्वंजगदेतच्चराचरं
॥सृष्टिंस्थितिंचप्रलयमहंकारःकरोतिहि॥ १४ ॥विघ्नमांत्वंगणपतेकेवलज्ञप्तिरूपिणं॥मायाविरहितं

दृष्ट्वा ह्यजेयत्वं गजारूढस्य तत्तदा ॥ ३३ ॥ त्रिशूलेनावधीच्छंभुः स गजं तं प्रतापवान् ॥ तदा स्तुतो महादेवः परश
त्या परंतपः ॥ परां शक्तिं मुवाचेदं वरं वरय शोभने ॥ न दास्यतो महादेवः परमेण वरेण हि ॥ योयं त्वया हतो देव
पुत्रो मम न संशयः ॥ त्वां न जानात्ययं मूढः प्रकृत्यंशसमुद्भवः ॥ ३४ ॥ तस्मात्पुत्रं जीवयस्व मम तुष्ट्यर्थमेव च ॥
प्रहस्य भगवान् रुद्रो मायापुत्रमजीवयत् ॥ सिंदूरवर्णेनेव मुखवत्राङ्ग्जत त्वतः ॥ तदा गजाननो जातः प्रसा
दाच्छंकरस्य च ॥ ३६ ॥ मायापुत्रोपि निर्मायो ज्ञानवान् स बभूव ह ॥ आत्मज्ञानामृतेनैव नित्यतृप्तो निराम
यः ॥ ३७ ॥ समाधिसंस्थितो रौद्रः कालव्यालांतकोभवत् ॥ करेण गृह्य सोध्यक्षः शब्दब्रह्मातिवर्तते ॥ ३८ ॥
ऋद्धिसिद्धिद्वयेनैव कलत्रेण विराजितः ॥ ततो गणाश्च विघ्नाश्च ये चान्ये ह्यधिका भुवि ॥ ३९ ॥ तेषाम
धिपतिश्चैव कृतो सो शंभुना तदा ॥ तस्माद्धि लोकिताते न प्रकृतिर्विश्वरूपिणी ॥ ४० ॥ स्वयं कुक्षिस्थिता यतो
ज्ञानाल्लिंगे प्रकृतिमेव च ॥ ददर्श विमलं लिंगं प्रकृतौ स्वप्रभावतः ॥ ४१ ॥ आत्मानं च गणेशः सार्धं तथैव
च जगत्त्रयं ॥ लीनं लिंगं समस्तं च हेरंबो ज्ञानवानपि ॥ ४२ ॥ मुमोह च पुनः संज्ञां प्रतिलभ्य प्रयत्नतः ॥ ननाम
शिरसा ताभ्यामीशाभ्यां स गणेश्वरः ॥ ४३ ॥ तदा ददर्श तत्रैव लोकसंहारकारकान् ॥ ब्रह्माणं चैव रुद्रं
च विष्णुं चैव सदाशिवं ॥ ४४ ॥ लीयंते च विलीयंते महेशे लिंगरूपे प्रकृत्यंतर्गते लिंगे लिंगस्यांतर्गता च
ददर्श प्रेततुल्यानि लिंगशक्त्याश्रयाणि च ॥ ब्रह्मांडगोलकानां च कोटयः परमाणुवत् ॥ ४५ ॥

सा ॥ ४६ ॥ शक्त्या लिंगं च संछन्नं दृश्यते हि न दृश्यते ॥ लिंगेन शक्तिः संछन्ना परस्परमवर्तताम् ॥ ४७ ॥ शिवाभ्यां संश्रि
तं लोकं जगदेतच्चराचरं ॥ गणेशेनापि तद्दृष्टं तमपरे च तथावदन् ॥ ४८ ॥ तदोवाच महातेजा गणाध्यक्षो गणेशः स
ह ॥ सशक्तिकं स्तूयमानः स्तुत्या च परया मुदा ॥ ४९ ॥ श्रीगणपतिरुवाच ॥ नमामि देवेशवरं शरण्यं शक्त्यान्वि
तं ज्ञानरूपं प्रशांतं ॥ ज्ञानात्परं परमं ज्योतिरूपं परात्परं परमं तत्त्वरूपं ॥ ५० ॥ तत्त्वात्परं परमं मंगलायनं यदा तदा
त्वं निष्कलं निर्विवादं ॥ धूमेन ह्याच्छतो वह्निर्धूमवत्प्रतिभासते ॥ ५१ ॥ प्रकृतेः परतस्त्वं हि लक्ष्यसे ज्ञानसं
भवः ॥ प्रकृत्यंतर्गतिस्त्वं हि मायावृत्तिभिरीड्यसे ॥ ५२ ॥ एवंविधस्त्वं भगवन् स्वमायया सृजस्यथो लुंपसि
पासि विश्वं ॥ अस्माद्भयात्सर्वमिदं प्रनष्टं सब्रह्मविष्ण्विंद्रयुतं चराचरं ॥ ५३ ॥ यथा पुरासीद्भगवान्महेशो लोकेशना
 योसि चराचरात्मा ॥ कुरु श्वरी त्वं सह जीवकोशं चराचरं तत्सकलं प्रदग्धं ॥ ५४ ॥ एवं स्तुतो गणेशेन भगवान्भक्
तभावनः ॥ यदुत्थितं कालकूटं लोकसंहारकारकं ॥ ५५ ॥ लिंगरूपेण तद्ग्रस्तं विमलं चाकरोत्तदा ॥ स देवा
सुरमर्त्यांश्च सर्वाणि त्रिजगंति च ॥ ५६ ॥ तत्क्षणाद्दर्शयामास कृपया परया युतः ॥ ब्रह्मविष्णुसुरेंद्राश्च लोक
पाला महर्षयः ॥ ५७ ॥ यक्षा विद्याधराः सिद्धा गंधर्वाप्सरसां गणाः ॥ उत्थितास्ते च सर्वे ते निद्रापरिगता इव ॥
॥ ५८ ॥ विस्मयेन समाविष्टा बभूवुर्जातसाध्वसाः ॥ सर्वे देवासुराश्चैव ऊचुराश्चर्यवत्ततः ॥ ५९ ॥ क्व काल
 कूटं क्व महद्येन विंतावयं ॥ मृतप्रायाः कृताः सद्यः सलोकालोकपाद्यसी ॥ ६० ॥ इत्यब्रुवन्तदा देवास्तूष्णी
भूतास्तदा स्थिताः ॥ शक्रादयो लोकपाला विष्णुं सर्वेश्वरेश्वरं ॥ ६१ ॥ ब्रह्माणं च पुरस्कृत्य इदमूचुः स

तत्वज्ञानेननिर्हत्यकामक्रोधादिकान्द्विजाः॥तदात्मनिस्थितंलिंगमपश्यन्विबुधादयः॥६१॥

 मेधिताः॥केनेदंकारितंविष्णोनविंदामोस्यमेधसः॥६२॥तदाप्रहस्यभगवान्ब्रह्मणासहतैःसुरैः॥समाधिम
गमन्सर्वेप्येकाग्रमनसातदा॥६३॥विष्णुंपुरस्कृत्यतदातुष्टुवुःपरमार्थतः॥आत्मानंपरमात्मानंयोगिनःप
 र्युपासते॥६५॥लिंगमेवपरंज्ञानंलिंगमेवपरंतपः॥लिंगमेवपरोधर्मोलिंगमेवपरागतिः॥तस्माल्लिंगात्प
रतरंयच्चकिंचनविद्यते॥एवंब्रुवंतोहितदासुरासुराः सलोकपालाऋषिभिश्वसाकं॥६७॥ विष्णुंपुरस्कृ
त्यतमालनीलंशांतंशरण्यंशरणंप्रपन्नाः॥त्राहित्राहिमहादेवकृपालोपरमेश्वर॥६८॥त्रातारोहिवयंसर्वेति
थात्वंत्रातुमर्हसि॥हेदेवपाहिभवतश्वरणारविंदसेवानुबंधमहिमानमनंतरूपं॥६९॥त्वदाश्रितंयस्यरमानुकं
पयानमोस्तुतेदेववरप्रसीद॥लिंगस्वरूपमध्यस्थोभगवान्भूतभावनः॥७०॥सर्वैःसुरगणैःसाकंबभाषे
वाक्यमच्युतः॥त्वंलिंगरूपीभगवान्जगतामभयप्रदः॥७१॥भूतास्त्रातागरास्सर्वेतस्मान्मृत्युंजयप्रभो॥र
क्षरक्षमहाकालत्रिपुरांतनमोस्तुते॥७२॥विष्णुनासंस्तुतोदेवोलिंगरूपीमहेश्वरः॥प्रादुर्बभूवसहसाबोध
यन्निवतान्सुरान्॥७३॥हेविष्णोहेसुराःसर्वेऋषयोपिहिश्रृण्वतां॥मन्यंतेपिचसंसारेत्यनित्येनित्यताकु
तः॥७४॥अवलोकयतात्मानमात्मनाविबुधादयः॥किंयज्ञैःकिंतपोभिश्वकिमुद्योगेनकर्मणा॥७५॥
एकत्वेनबहुत्वेनकिंचिन्नैवप्रयोजनं॥यस्माद्भवद्भिर्मिलितैःकृतंयत्कर्मदुष्करं॥क्षीराब्धेर्मथनंयत्तदस्
तार्थंकथंप्रभुं॥मृत्युंजयंनिराकृत्यद्यवज्ञायच्चमांसदा॥७७॥तस्मात्सर्वैर्मृत्युमुखेपतिताहिनसंशयः॥ ३६
अस्माभिर्निर्मितोदेवोगणेशःकार्यसिद्धये॥७८॥ननमंतिगणेशंयेदुर्गाचैवतथाविधां॥क्लेशभाजोभवि

शांतंद्वैताद्वैतविवर्जितं॥३५॥ज्ञप्तिमात्रस्वरूपंचसदानंदैकलक्षणं॥श्रीगणपतिवाच॥यदित्वंकेवलोह्यात्मापरमानंदल
क्षणः॥३६॥तस्मात्त्वदपरंनास्तिनान्यत्किंचपरंतपः॥नानारूपंकथंजातंसुरासुरविलक्षणं॥३७॥विचित्रंमोहजननंत्रिभि
तुर्भिश्व देवैश्वलक्षितं॥भूतग्रामैश्वनानाभेदसमन्वितैः॥३८॥जातंसंसारचक्रंचनित्यानित्यविलक्षणं॥परस्परविरोधेनज्ञा
केचित् नवादेनमोहिताः॥३९॥कर्मवादरताःकेचित्सगुणमाश्रिताः॥ज्ञाननिष्ठाश्वकेचिच्चपरस्परविरोधिनः॥२०॥एवं
संशयमापन्नंत्राहिमांवृषभध्वज॥अहंगणाश्वकुत्रत्याःकेचायंवृषभःप्रभो॥२१॥एतेचान्येचबहवःकुतोजाता
श्वकेनवै॥कृताःसर्वेमहाभागसात्विकाराजसास्तामी॥२२॥प्रहस्यभगवान्रुद्रोगणेशंवकुमुद्यतः॥ईश्वरउ
वाच॥कालत्रात्याच्चजातानिरजःसत्वतमांसिवै॥२३॥तैरावृतंजगत्सर्वंसदेवासुरमानुषं॥परिदृश्यमानमेत
च्चनश्वरंपरमार्थतः॥२४॥विध्यैतत्सकलंमिथ्याकर्तुःकृत्याचनश्वरं॥यावद्गणेशंसंयुक्तोभाषमाणःसदाशि
वः॥२५॥लिंगरूपीविश्वरूपःप्रादुर्भूतःसदाशिवः॥विश्वरूपाजगद्योनिःकार्यकारणरूपिणी॥२६॥लिंगरू
पीसभगवान्निमग्नस्तत्क्षणादभूत्॥एकीभूतापराशक्तिर्ब्रह्मविद्यात्मलक्षणा॥२७॥गणेशोविस्मयाविष्टोह्यव
लोकनतत्परः॥ऋषयऊचुः॥प्राकृतंतद्भुतंसर्वंजगदेतच्चराचरं॥२८॥गणेशस्यपृथक्कृतत्वंकथंजातंतदु
च्यतां॥लोमशउवाच॥साक्षात्प्रकृतिसंभूतोगणेशोभगवान्भवः॥२९॥यथारूपःशिवःसाक्षात्तद्रूपोहिग
णेश्वरः॥शिवेनसहसंग्रामःकृतस्तेनमहात्मना॥३०॥अज्ञानाप्राकृतोभूत्वाबहुकालंनिरंतरं॥तस्य

ष्यंतिनात्रकार्यविचारणा ॥ ७९ ॥ यूयंसर्वेह्यधर्मिष्ठास्तब्धाःपंडितमानिनः ॥ कार्याकार्यमविज्ञायकेवलंमो
हमोहिताः ॥ ८० ॥ तस्मात्कालमुखंसर्वेयतितानात्रसंशयः ॥ सर्वेश्रुतिपरायूयमिंद्राद्यादेवतागणाः ॥ ८१ ॥
प्ररोचनपरास्सर्वेक्षुद्राश्चेंद्रादयोहताः ॥ नात्मानंचप्रपंचेनवेत्थत्वंहिशचीपते ॥ ८२ ॥ कृतःप्रयत्नोहिमहा
नमृतार्थंत्वयाशठ ॥ अश्वमेधशतेनैवयदाज्यंप्राप्तवानसि ॥ ८३ ॥ पतिंचैवपराधीनंतंनजानासिदुर्म
ते ॥ येवेदवाक्यैस्त्वंमूढसंस्तुतोसितपस्विभिः ॥ ८४ ॥ तेमूढास्तोषयंतित्वांकामरागपरायणाः ॥ विष्णो
स्त्वंपक्षपातित्वान्नजानासिहिताहितं ॥ ८५ ॥ केचिद्धतास्त्वयाविष्णोरक्षिताश्चैवकेचन ॥ इच्छयायुक्त
स्त्वमत्रैवसदाबालकचेष्टितः ॥ ८६ ॥ येन्येचलोकपालाश्चतेषांवार्ताकुतस्त्विह ॥ अन्यथाहिकृतेह्यर्थेह्य
न्यथात्वंभविष्यति ॥ ८७ ॥ कार्यसिद्धिर्भवेद्येनमवद्भिर्विस्मृतश्चसः ॥ येनाद्यरक्षिताःसर्वेकालकूटम
हाभयात् ॥ ८८ ॥ येननीलःकृतोविष्णुर्येनसर्वेपराजिताः ॥ लोकाभस्मीकृतायेनतस्माद्येनापिरक्षि
ताः ॥ ८९ ॥ तस्यार्चनविधिःकार्योगणेशस्यमहात्मनः ॥ कर्मारंभेतुविघ्नेशंनार्चयंतिगणाधिपं ॥ ९० ॥
कार्यसिद्धिर्नतेषांवैभवेच्चभवतांयथा ॥ एतन्महेशस्यवचोनिशम्यसुरासुराःकिंनरचारणाश्च ॥ ९१ ॥
पूजाविधानंपरमार्थतोपिपप्रच्छुरेनंचतदागिरीशं ॥ ९२ ॥ इतिश्रीस्कंदपुराणेकेदारखंडेशैव

स्कं० केदार० शास्त्रेदशमोध्यायः॥ ॥श्रीः॥ महेश्वरायनमः॥ श्रीमहादेवउवाच॥ प्रतिपक्षेचतुर्थ्यांतुपूजनीयोगणाधिपः॥ अ० ६१
स्नात्वाशुक्लतिलैःशुभ्रैःशुक्लपक्षेसदानृभिः॥१॥ रुद्राचावश्यकंकर्मगणेशस्यार्चनाक्रिया॥ प्रयत्नेनैवकु
२७ र्वीतगंधमाल्याक्षतादिभिः॥२॥ ध्यानमादौप्रकर्तव्यंगणेशस्ययथाविधि॥ आगमाबहवोजातागणेशस्य
यथामम॥३॥ बहुलोपासकायस्मात्तमःसत्वरजोन्विताः॥ गुणभेदेनतस्यैवध्यानंशृणुतहेसुराः॥ पं
चवक्त्रोगणाध्यक्षोदशबाहुस्त्रिलोचनः॥ कांस्यस्फटिकसंकाशोनीलकंठोगजाननः॥ तस्यवक्त्राणि
पंचैवकथयामियथातथं॥ मध्यमंचमुखंगौरंचतुर्दंतंत्रिलोचनं॥७॥ शुंडादंडमनोज्ञंचपुष्करंमोद
कान्वितं॥ तथान्यसीतवर्णंचरक्तंनीलंसुलक्षणं॥ पिंगलाचतथाशुंडागणेशस्यशुभप्रदा॥ तथादश
भुजाश्चैवह्यायुधानिशृणामिव॥८॥ पाशंचपरशुंपद्मंह्यंकुशंदंतमेवच॥ अक्षमालांलांगलंचमुस
लंचवरंतथा॥९॥ पूर्णंचमोदकैःपात्रंपाणिष्वेवंविचिंतयेत्॥ लंबोदरंविशालाक्षंनवीनंमेखलान्वि
तं॥१०॥ योगासनेचोपविष्टंचंद्रलेखांकशेखरं॥ ध्यानंचसात्विकंज्ञेयंराजसंचशृणामिव॥११॥ शु
द्धचामीकराभासंगजाजिनमभौलिकं॥ चतुर्भुजंत्रिनयनमेकदंतंमनोहरं॥१२॥ पाशांकुशाधरंदे २७
वंदंतमोदकपात्रकं॥ नीलंचतामसंध्यानमेवंत्रिविधमुच्यते॥१३॥ ततःपूजाप्रकर्तव्याभवद्भिः

स्कं० केदार० ड्राकर्ण्यामहे ॥ तेषांतद्वचनंश्रुत्वासूतोवाक्यमुपाददे ॥ चंद्रमाअभ्भयोविप्राः अत्रिपुत्रोगुणान्वितः ॥ २८ ॥ उत्पन्नो अ० ११
ह्यनसूयायांब्रह्मणोंशसमुद्भवः ॥ २९ ॥ रुद्रस्यांशोहिदुर्वासाः विष्णोरंशात्तुदत्तकः ॥ क्षीराब्धेर्मथनंदृष्ट्वाचंद्रश्चैव
३८ मुदान्वितः ॥ ३० ॥ क्षीराब्धिरपिचंद्रंचदृष्ट्वासोप्युत्सुकोभवत् ॥ प्रविष्टंचोभयंप्रीत्याश्रूयतांभोद्विजोत्तमाः ॥ ३१ ॥
चंद्रोह्यमृतपूर्णःस्यादयतोदेवसंन्निधौ ॥ दृष्ट्वाभ्रकांतिस्त्वरितोथचंद्रोनीराजितोदेवगणैस्तदानीं ॥ ३२ ॥ वा
दित्रघोषैस्तुमुलैरनेकैः मृदंगशंखैःपटहैरनेकैः ॥ नमश्चक्रुश्चतेसर्वेह्यसुराः सुरदानवाः ॥ ३३ ॥ तदागर्गं
पृच्छमानाः बलंचंद्रस्यतत्वतः ॥ गर्गेणोक्तास्तदादेवाः सर्वेषांबलमद्यवै ॥ ३४ ॥ केंद्रस्थानगताः सर्वेभवता
मुत्तमाग्रहाः ॥ चंद्रोगुरुः समायातोबुधश्चैवसमागतः ॥ ३५ ॥ आदित्यश्चतथाशुक्रः शनिरंगारकोमहान् ॥
तस्माच्चंद्रबलंश्रेष्ठंभवतांकार्यसिध्धये ॥ ३६ ॥ गोमतसंज्ञकोनाममुहूर्तोयंजयप्रदः ॥ एवमाश्वासितादेवा
गर्गेणैवमहात्मना ॥ ३७ ॥ ममंथुस्तेत्वरितागर्जमानामहाबलाः ॥ द्विगुणंबलमापन्नामहात्मानोदृढव्रताः
॥ ३८ ॥ महेशंस्मरमाणास्तेगणेशंचपुनःपुनः ॥ निर्मथ्यमानादुदधेर्गर्जमानाच्चसर्वशः ॥ ३९ ॥ निर्गतासु ३९
रभीसाक्षाद्देवानांकार्यसिध्धये ॥ पुष्टाकपिलवर्णासाद्यूधोभारेणभूयसा ॥ ४० ॥ तरंगोपरिगच्छंतीशन
कैःशनकैस्ततः ॥ कामधेनुंसमायांतींदृष्ट्वासर्वेसुरासुराः ॥ ४१ ॥ आनीताजलमध्याच्चसंरत्तागोशतैरपि ॥

पीताः स्युर्नीलकृष्णाश्चकपिलाश्चकपिंजलाः ॥ ४२ ॥ पुष्पवर्षेणमहतावववर्षुरमितप्रभाः ॥ तदातूर्याण्यनेकानिनेदुर्वा
द्यान्यनेकशः ॥ ४३ ॥ बभूवुः श्यामकारक्ताजंबूवर्णाश्चपिंगलाः ॥ आभिर्युक्तातदागोभिः प्रत्यदृश्यत ॥ ४४ ॥ असुरैः सूरभिः
सुरसंवीतैः कामधेनुंययाचिरे ॥ ऋषयोहर्षसंयुक्तादेवान्दैत्यांश्चतत्क्षणात् ॥ ४५ ॥ भवद्भिरेवविप्रेभ्योनानागोत्रे
भ्यएवच ॥ सुरभीसहितागावोदातव्यानात्रसंशयः ॥ ४६ ॥ तैर्याचितास्तेत्वसुरासुराश्चददुश्चताःगाःशिवतोषणाय
॥ तैःस्वीकृतास्ताऋषिभिःप्रमंगलैर्महात्मभिः कर्मसुभावितात्मभिः ॥ ४७ ॥ पुण्याहंसर्वमुनिभिः कारितास्तेसुरासु
राः ॥ देवानांकार्यसिध्यर्थंअसुराणांक्षयायच ॥ ४८ ॥ पुनःसर्वेसुसंरब्धाममंथुःक्षीरसागरं ॥ मथ्यमानात्ततस्तस्मा
दुदधेश्चतथाभवत् ॥ ४९ ॥ शाखाश्चविटपाश्चैवपत्राणिचचकाशिरे ॥ सुरभीणिमहांत्येवपुष्पाणिचफलानिच
॥ ५० ॥ कल्पद्रुमःपारिजातश्चूतः संतानकस्तथा ॥ तान्द्रुमानेकतः कृत्वागंधर्वनगरोपमान् ॥ ५१ ॥ ममंथुरस्ते
त्वरिताः ॥ पुनःक्षीरार्णवंबुधाः ॥ निर्मथ्यमानादुदधेरभवत्सूर्यवर्चसं ॥ ५२ ॥ रत्नानामुत्तमंरत्नंकौस्तुभाख्यंमहा
प्रभं ॥ स्वकीयेनप्रकारेणभासयंतंजगत्त्रयं ॥ ५३ ॥ चिंतामणिंपुरस्कृत्यकौस्तुभंतेददर्शिरे ॥ सर्वेसुरादददुस्तं
वैकौस्तुभंविष्णवेतदा ॥ ५४ ॥ चिंतामणिंततः कृत्वामध्येचैवसुरासुराः ॥ ममंथुः पुनरेवाब्धिंगर्जंतस्तेबलो
त्कटाः ॥ ५५ ॥ मथ्यमानात्ततस्तस्मादुच्चैःश्रवसमद्भुतं ॥ बभूवचाश्वरत्नानांहयंचैरावतंगजं ॥ ५६ ॥ तथै
वगजरत्नंतुचतुःषष्ट्यासमन्वितं ॥ गजानांपांडुवर्णानांचतुर्दंतंमदान्वितं ॥ ५७ ॥ तान्सर्वान्मथ्यतः कृत्वा

पुनरेवममंथिरे ॥ निर्मथ्यमानादुदधेर्निर्गतानिबहून्यपि ॥ ५९ ॥ मदिराविजयाभंगातथालशुनगृंजनाः ॥ अतीवचो
न्मादकरोधत्तूरः पुष्करंतथा ॥ स्थापितान्येकपदेनतीरेनदनदीपते ॥ पुनश्चतेतत्रमहासुरेंद्राममंथुरब्धिंसुरदै
३१ त्यसंघाः ॥ ६० ॥ निर्मथ्यमानादुदधेस्तदासीत्सदिव्यलक्ष्मीर्भुवनैकमाता ॥ आन्वीक्षिकींब्रह्मविदोवदंतित्तथाचा
न्येमूलविद्यांगृणंति ॥ ६१ ॥ वाग्ब्रह्मविद्यांकेचिदाहुःसमर्थाःकेचित्सिद्धिंऋद्धिमाज्ञांतथाशां ॥ यांवैष्णवींयोगिनः
केचिदाहुस्तथाचमायांमायिनःकेचिदाहुः ॥ ६२ ॥ वदंतिसर्वेनेकसिध्धांतयुक्तायांयोगमायांज्ञानशक्त्यन्विता
यें ॥ ददृशुस्तांमहालक्ष्मीमायांतीशानकैःसुराः ॥ ६३ ॥ गौरीचयुवतींस्निग्धांपद्मकिंजल्कभूषणां ॥ सुस्मितांस्त
योवन द्विजांश्यामांनवयौवनां ॥ ६४ ॥ विचित्रवस्त्राभरणांरत्नानेकोद्यतायुधां ॥ बिंबोष्ठींसुनसींतन्वींसुग्रीवांचारुलो
चनां ॥ ६५ ॥ सुमध्यमांचारुजघनांबृहत्कटितटांतथा ॥ नानारत्नप्रदीपैश्चनीराजितां ॥ ६७ ॥ चामरैर्वीज्यमा मुखांबुजां
नांतांगंगाकल्लोलभास्वरैः ॥ पांडुरंगजमारूढांस्तूयमानांमहर्षिभिः ॥ ६८ ॥ सुरद्रोः पुष्पमालांचबिभ्रतींवह्नि
संयुतां ॥ करायेध्रियमाणांतांदृष्ट्वादेवाःसमुत्सुकाः ॥ ६९ ॥ आलोकनपरायावत्तावत्तानूदद्दशेव्ह्यसौ ॥ देवांश्च
दानवांश्चैवसिद्धचारणपन्नगान् ॥ ७० ॥ मातायथास्वपुत्रांश्चमहालक्ष्मीस्तथासती ॥ देवास्तयाभवन्लक्ष्मीपु
काश्चालोकितास्तथा ॥ ७१ ॥ संजातास्तत्क्षणांदेवराज्यलक्षणलक्षिताः ॥ निःश्रीकाह्यसुराजातायेश्रियाना ३१
वलोकिताः ॥ ७२ ॥ निरीक्षमाणश्चतदामुकुंदंतमालनीलंसुकपोलनासं ॥ विभ्राजमानंवपुषापरेणश्रीवत्सचि

शीघ्रमेवच ॥ एकविंशतिदूर्वाभिर्दूर्वाभ्यांनाम्नापृथक्पृथक् ॥ १४ ॥ सर्चनामभिरेकैवदीयतेगणनायके ॥ तथै
वनामभिर्ज्ञेयाएकविंशतिमोदकाः ॥ १५ ॥ दत्वानामान्यहंवस्त्वेपूजनीयःपृथक्पृथक् ॥ गणाधिपनमस्तेस्तु
उमापुत्राघनाशन ॥ १६ ॥ विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक ॥ एकदंतेभवक्त्रेतितथामूषकवाहन ॥
॥ १७ ॥ कुमारगुरवेतुभ्यंपूजनीयाप्रयत्नतः ॥ एवमुक्त्वासुरान्सद्यःपरिष्वज्यचसादरं ॥ १८ ॥ विष्णुंगु
हाशयंसद्योब्रह्माणंचसदाशिवः ॥ तिरोधानंगतःसद्यःशंभुःपरमशोभनः ॥ १९ ॥ प्रणम्यत्वांभुंतेसर्वेगणा
ध्यक्षार्चनेरताः ॥ ततःसंपूज्यविधिवद्गणाध्यक्षंसुरोत्तमाः ॥ २० ॥ उपचारैरनेकैश्चदूर्वाभिश्चपृथक्पृ
र थक् ॥ संतुष्टोहिगणाध्यक्षोदेवानांवरदोभवत् ॥ २१ ॥ प्रदक्षिणनमस्कारैःसुरैस्तैरभितोषितः ॥ तमोगु
णान्विताःसर्वेह्यसुरानाभ्यपूजयन् ॥ २२ ॥ उपहासपरास्तेवैदेवान्प्रत्यसुरोत्तमाः ॥ पूजयित्वात्वांकरं
थ हस्पतेतत्कथयस्वमाचिरं॥३६॥बृहस्पतिरुवाचेदंमहेंद्रंमतिसद्वचः॥एवमेवत्वयाकार्यंमहेंद्रश्रूयतांहितत्॥३७
एतत्कार्यंमन्मथेनैवराजन्नान्यःसमर्थोभविताात्रिलोके॥विध्वंसितुंतापसानांमनांसितस्मात्सयाप्रार्थनीयो
हिमारः॥३८॥गुरोर्वचनमाकर्ण्यआह्वयन्मदनंहरिः॥आह्वानादाजगामाथमदनःकार्यसाधकः॥३९॥रत्या
समेतःसहमाधवेनसपुष्पधन्वापुरतःसभायां॥महेंद्रमागम्यचप्राहवाक्यंसगर्वितंलोकमनोहरंच॥४०॥अ
हमाह्वानितःशक्रकस्माद्धिशचीपते॥किंकार्यंकरवाण्यद्यकथ्यतामविलंबितं॥४१॥ममस्मरणमात्रेणविभ्रष्टा
हितपस्विनः॥त्वमेवजानासिहरेममवीरस्यविक्रमं॥४२॥ममवीर्यंहिजानातिशक्तिपुत्रःपराशरः॥एतेचान्येच
ऋषयोभृग्वाद्याबहवोह्यमी॥४३॥गुरुरेवहिजानातिभार्यामोचथ्यमेवच॥तस्यांजातोभरद्वाजोगुरुणासकृतो

न्वितं॥४०॥येनयेनप्रकारेणपरेषामुपजीवनं॥भविष्यतिचतत्कार्यंधीमतापुरुषेणहि॥४१॥स्त्रियाहितार्थितंकार्यं
परोपकरणंशुभे॥एवंप्रवर्तितातेनगिरिणामहिषीतदा॥४२॥ततोदधारसाकन्यामेनाभाग्यवतीसती॥महाविद्यांम
हामायांमहालक्ष्मीस्वरूपिणीं॥४३॥रुद्राणींभद्रकालींचअंबांदाक्षायणींतथा॥तांबिभ्रतीमहाभागाजवरेपरमेश्व
रीं॥४४॥बभूवसाविशालाक्षीमेनाचारुविलोचना॥स्तुतिंचकुस्तदेवाऋषयोयक्षकिंनराः॥४५॥मेनाया दा
याः भूरिभाग्यौस्तदाहिमवतोगिरेः॥एतस्मिन्नंतरेजातागिरिजानामनामतः॥४६॥प्रादुर्भूतातदादेवीसर्वेषांचसु
खप्रदा॥देवदुंदुभयोनेदुर्ननृतुश्चाप्सरोगणाः॥४७॥जगुर्गंधर्वपतयोतुष्टुवुःसिद्धचारणाः॥पुष्पवर्षेणमह
तावव्रषुर्विबुधाःसुराः॥४८॥तदाप्रसन्नमभवत्त्रैलोक्यंसर्वमेवचा॥यदाहिजातागिरिजामहासतीतदैवदैत्याभ
यमापुश्चसर्वे॥४९॥प्रापामुदंदेवगणामहर्षयःसचारणाःसिद्धगणास्तथैवच॥५०॥इतिश्रीस्कंदपुराणेकेदा
रखंडेशैवशास्त्रेएकोनविंशोध्यायः॥ ॥लोमशउवाच ॥ वर्धमानातदाकन्यासाशक्तिर्लोकपूजिता॥अ अ॰ १९ समाप्त
ष्टवर्षायदाजाताहिमालयगृहेसती॥१॥महेशोहिमवद्द्रोण्यांततापपरमंतपः॥सर्वैर्गणैःपरिवृतोवीरभद्रा
दिभिस्तथा॥२॥एवंतपोजुषाणंचमहेशंहिमवान्गिरिः॥तत्पादपल्लवंद्रष्टुंपार्वत्यासहबुद्धिमान्॥३॥या

रु ह्यसौ ॥ ४४ ॥ भरद्वाजोमहाभागइत्युवाचगुरुस्तदा ॥ ममवीर्यंचशौर्यंचसम्यक्जानात्य यंत्राश्री ॥ ४५ ॥ सूर्योपिजानातिह
रेकिंबहूक्त्याप्रजापतिः ॥ जानातिममवीर्यंचशौर्यंचैवविशेषतः ॥ ४६ ॥ क्रोधोहिममबंधुश्चमहाबलपराक्रमः ॥ उभाभ्यां
द्रावितंविश्वंजंगमाजंगमंमहत् ॥ ४७ ॥ ब्रह्मादिस्तंबपर्यंतंप्लावितंसचराचरं ॥ सप्रौढवचनंतस्यश्रुत्वाइंद्रोभ्यभाषत ४८
पुराकृतंत्वयायच्चतन्नवाच्यंकथंचन ॥ वयंसर्वेत्वयासर्वेजितास्मस्तकंदर्परूपिणः ॥ ४९ ॥ मदनत्वंसमर्थोसिअस्मान्जेतुंस
त्या देवहि ॥ महेशंप्रतिगच्छाशुस्मरकार्यार्थसिद्धये ॥ ५० ॥ पार्वसहितंशंभुंकुर्षाथमहामते ॥ एवमभ्यर्थितोदेवैर्मदनोविश्वमो रु
गा हनः ॥ ५१ ॥ जगामदेवकार्यार्थमप्सरोभिःसमन्वितः ॥ ततोजग्राहमहाधनुर्धरोविस्फार्यचापंकुसुमान्वितंमहत् ॥ ५२ ॥ तथै
वबाणांश्चमनोरमांश्चप्रगृह्यवीरोभुवनैकजेता ॥ तस्मिन्हिमाद्रौप्रतिदृश्यमानोबभौस्मरोयुद्धकृतां वरिष्ठः ॥ ५३ ॥ रत्या
समेतोमधुमाधवाभ्यांविजेतुकामोथपिनाकपाणिं ॥ सप्रविश्यत्वर न्नेवमप्सरोभिःसमन्वितः ॥ ५४ ॥ तत्रागतातदारंभा
उर्वशीपुंजिकस्थला ॥ प्रम्लोचामिश्रकेशीचसुभगाचतिलोत्तमा ॥ ५५ ॥ अन्याश्चैवंविधायाताःसाहाय्येमदनस्यच ॥ अ
भ्युत्थानगताःसर्वेमदनेनाविमोहिताः ॥ ५६ ॥ भृंगिणाचहृतारंभाचंडेनचतथोर्वशी ॥ मेनकावीरभद्रेणमुंडेनपुंजिकस्थला ५७
लो तित्तमादयस्तत्रसंहृताश्चगणैस्तदा ॥ उन्मत्तभूतैर्बहुभिस्तपस्याम्नमनीषिभिः ॥ ५८ ॥ अकालेकोकिलाभिश्चव्याप्तमभा
सीन्नभस्थलं ॥ अशोकाश्चंपकाश्चूतायूथिकाश्चकदंबकाः ॥ ५९ ॥ नीपाःप्रियालाःपनसाराजवृक्षाश्चरायणाः ॥ द्राक्षाव

म स

प

ल्यः प्रदृत्र्यं लेबकुलानागकेसराः ॥६०॥ तथा कनककेतक्यो भ्रमैरैरुपशोभिताः ॥ मत्तैर्मदनसंरोहहंसाभिः कलहंसकैः ॥६१॥ करे
णुभिर्गजाश्चासन्मयूराभिः शिखंडिनः ॥ निकामंयत्सुराध्यासीत्छिवसंके जेगुणेः ॥६२॥ अकस्मान्मत्तभूतं हि कुभंजातविभ्रमेषु च ॥ त्रैलोक्ये रोहि
महातेजा नंदी ह्यमितविक्रमः ॥६३॥ रक्षाविधानं कृतवान् परमेण समाधिना ॥ निश्चलस्तंगलाः सर्वे गणाश्चासन् शुचिव्रताः ॥६४॥ परस्प
रं त्रपायुक्ताः विलोक्यासन्नवदन्मुखाः ॥ एतस्मिन्नंतरे तत्र मदनो हि धनुर्धरः ॥६५॥ पंचबाणान् समारोप्य स्वकीये धनुषि स्थितः ॥ तरोश्छायां
समाश्रित्य देवदार्वभिधस्य च ॥६६॥ निरीक्ष्य शंभुं परमासने स्थितं तपोजुषाणं परमासने स्थितं ॥ गंगाधरं नीलतमालकंठं कपर्दिनं चंद्रक
लावतंसं ॥६७॥ भुजंगभोगार्पितसर्वगात्रं पंचाननं सिंहविशालविक्रमं ॥ कर्पूरगौरं परमश्रियान्वितं तं वेक्ष्य कामो मदनस्तरस्वी ॥६८॥ दुरास
दं दीक्षिमतां वरिष्ठं महेश्वरं मुग्रं सरमाधवेन ॥ यावच्छिवं वेक्षु कामस्तरस्वी तावद्याता गिरिजा विश्वमाता ॥६९॥ सखीजनैः संवृता पूजनार्थं स
दाशिवं मंगलमंगलानां ॥ कनककुसुममालां संदधे नीलकंठं शिवममरमनोज्ञं दुर्लभं सा तदानीं ॥ सितविकसितनेत्रा चारुव
क्त्रा त्रिनेत्रं सकलजननजनित्री वीक्ष्यमाणा बभूव ॥७१॥ तावद्रूपः शरेणैव मोहिन्याख्येन सत्वरं ॥ विध्यमानस्तदा शंभुः शनैरुन्मील्य
लोचने ॥७२॥ ददर्श गिरिजां देवः सागरः शशिनः कलां ॥ चारुप्रसन्नवदनां बिंबोष्ठीं सुस्मितां सतीं ॥७३॥ स्फुद्द्विजांस्फस्मितांतानां वि
शालवस्त्रोज्ज्वलां ॥ गौरीं प्रसन्नमुद्रां च विश्वमोहनमोहिनीं ॥७४॥ यया त्रिलोकरचना कृता ब्रह्मादिभिः सह ॥ उत्पत्तिपालनविधो
हरणाय कृतैः कृत्यागः सत्वरजस्तमांसि ॥ सा वै भवेन ददृशे पुरतः स्थिता यं संमोहिनी सकलमंगलमंगलैका ॥७६॥ तां निरीक्ष्य
भवो देवी गिरिजां लोकपावनीं ॥ मुमोह दर्शनात्तस्या मदनेन वशीकृतः ॥ विस्मयोत्फुल्लनयनो बभूव सहसा शिवः ॥ एवं विलो
क्यमानोसौ देवदेवो जगत्पतिः ॥७८॥ मनसा ध्यमानेन इदमाह सदाशिवः ॥ अनया मोहितः कस्मात्स्वतंत्रोहं निरामयः ॥७९

अ.२०

कामोहिनरकायैवसर्वेषांप्राणिनांध्रुवं॥दुःखरूपीत्वनंगोयंज्ञानीध्वंभमभाषितं॥९३॥तारकोपिदुराचारोनिष्कामोहि भविष्य
ति॥विनाकामेचैनंकथंपापमाचरतेनरः॥९४॥तस्मात्कामोमयादग्धः सर्वेषांशांतिहितवे॥युष्माभिर्निर्जितः सर्वैरस्करैश्रम
हर्षिभिः॥९६॥अन्येःप्राणिभिरेवात्रतपसेध्रियतांमनः॥कामक्रोधविहीनंचजगदेतन्मयाकृतं॥९७॥तस्मादनंगव
द्दुदायिनंनजीवयाम्यघस्करःप्रतीक्ष्यतां॥९८॥निरंतरंचात्मसुखप्रबोधमानंदरूपंस्रमहत्प्रकाशं॥९९॥एवमुक्तास्तदा
देवाःशंभुनापरमेष्ठिना॥ऊचुमहर्षयःसर्वेशंकरंलोकशंकरं॥९९॥यदुक्तंभवताशंभोपरंश्रेयस्करंहितः॥किंतु
वक्ष्यामहेदेवश्रूयतांचावधार्यतां॥१००॥यथास्रष्टमिदंविश्वंनिष्कामोहिभवान्परः॥तस्मात्प्रकृत्याचरितंकाम
क्रोधसमन्वितं॥१॥एतत्सर्वंकामरूपंसकामःकेनहन्यते॥कथंत्वयात्वयंदग्धःकामोहिदुरतिक्रमः॥२॥येनसंध
रतेविश्वंकामेनपरिपाल्यते॥कामेनोत्पद्यतेविश्वंतस्मात्कामोमहाबलः॥३॥समर्थोहिसमर्थत्वादसमर्थंकरि
ष्यति॥ऋषिभिश्चैवमुक्तोसोद्विगुणंरोषमास्थितः॥४॥चक्षुषाचतृतीयेनदग्धःकामोहरस्तदा॥मुनिभिश्च्या
रणैःसिद्धैर्गणैश्चविविधैस्ततः॥५॥शिवश्चवेदितोरुद्रःपिनाकीवृषवाहनः॥मारंतथाविदग्धंदग्ध्वात्यक्त्वा
तंपर्वतंरुषा॥६॥हिमाचलंचतंसद्यस्तिरोधानगतोभवत्॥तिरोधानगतंदेवंवीक्ष्यदग्धंचतद्वनं॥७॥स
कोकिलंसचूतंचसभृंगंसहचंपकं॥तथैवदग्धंमदनंविलोक्यरत्याविलापंचतदामनस्विनी॥८॥सबाष्प

कंठीमदनंविमृश्यकथंसरुद्रोवशगोभवेन्मम॥एवंविमृश्यस्वचिरंगिरिजातदानेसंमुत्पतीत्यपिसतीचतद्वभाषे॥९॥संमुह्यमानांचरि
तंनिरीक्ष्यसतीमहारूपवतीमनस्विनी॥माविषादंकुरुसखेमदनंजीवयाम्यहं॥१०॥त्वदर्थेनोविशालाक्षितपसाराधयाम्यहं॥एवमाश्वा
सितासाध्वीपार्वत्यारतिरंजसा॥११॥तपस्तताप्सुमहत्सतिंप्राप्तुंस्रमध्यमा॥मदनोयत्रदग्धश्चरुद्रेणपरमेष्ठिना॥१२॥तप्यमानांरतिंत
त्रदहशेनारदस्तदा॥उवाचागत्यसहसा॥कामिनीरतिकामुकां॥१३॥कस्यासित्वंविशालाक्षिकेनवातप्यतेतपः॥तरुणीरूपसंपन्नासौ
भाग्येनपरेणहि॥१४॥नारदस्यवचःश्रुत्वारोषेणमहतावृता॥उवाचवाक्यंमधुरंकिंचिन्निष्ठुरमेवच॥१५॥रतिरुवाच॥नारदोसि
मयाज्ञातःकुमारस्त्वंनसंशयः॥परस्त्रीणांदर्शनंचकर्तुंनार्हसिसुव्रत॥१६॥यथागतेनमार्गेणगच्छध्वंमाविलंबितं॥यदिकिंचिन्न
जानासिकेवलंमूर्खएवच॥परस्त्रीकामुकाःक्षुद्राःविटाःव्यवसिनिनस्तथा॥१७॥नचात्यधर्मिणःक्षुद्रास्तेषांमध्येत्वमग्रणीः॥एवं
निर्भर्त्सितोरत्यानारदोमुनिसत्तमः॥१८॥जगामाकाशमार्गेणदेवर्षिरमितद्युतिः॥निरीक्ष्यमाणोपितदासर्वेतोद्यानचक्षुषा॥१९॥
जगामत्वरितेनैवशंबरंदैत्यपुंगवं॥२॥शंसंदैत्यराजायदग्धंमदनमेवच॥२०॥रुद्रेणक्रोधयुक्तेनतस्यभार्यामनस्विनी॥तामानय
महाभागभार्यांकुरुमहाबल॥२१॥अतीवरूपसंपंनायाआनीतास्त्रियस्त्वया॥तासांमध्येरूपवतीरतिःसामदनप्रिया॥
२२॥एवमाकर्ण्यवचनंदेवर्षेर्भावितात्मनः॥जगामसहसातत्रयत्रास्तेशुभलक्षणा॥२३॥तांदृष्ट्वाथविशाला
क्षींरतिंमदनमोहिनीं॥उवाचप्रहसन्वाक्यंशंबरोदेवकंटकः॥२४॥एहितन्विमयासार्धंराजभोगान्यथेप्सितान्
॥भुंक्ष्वदेविप्रसादान्मेतपसाकिंप्रयोजनं॥२५॥एवमुक्तातदातेनशंबरेणदुरात्मना॥उवाचतन्वीमधुरंमहिषीमदन
स्यसा॥२६॥विधवाहंमहाबाहोएवंवक्तुंनचार्हसि॥राजात्वंसर्वदैत्यानांलक्षणैःपरिवारितः॥एतत्तुवचनंश्रुत्वाशंब

द० के दा०

रः काममोहितः ॥ २८ ॥ गृहीत्वासौ कचं तस्यास्तदा तस्या निवारितः ॥ विमृश्य मनसा सर्वं भजेयत्वं च तस्य वै ॥ मा स्पृश्य त्वं चरे मूढ मम संस्पर्शजे
नहि ॥ २९ ॥ संपर्केणैव दग्धोसि नात्र कार्या विचारणा ॥ ततः प्राह महातेजाः शंबरः प्रहसन्निव ॥ बिभीषिकाभिर्वह्वीभिर्मा भीषयसि
भामिनि ॥ ३० ॥ गच्छ शीघ्रं मया सार्धं बाहुल्या किं प्रयोजनं ॥ इत्युच्यमानेन तदानीं तासाप्रसभं रतिः ॥ स्वपुरं परमं तन्वी शंबरेण
मनस्विनी ॥ कृता महानसाध्यक्षा नाम्ना मायावतीति च ॥ ३२ ॥ ऋषय ऊचुः ॥ पार्वत्या च प्रतिज्ञातं मदनानयनं प्रति ॥ शंबरेण
हृता तन्वी मदनस्य प्रिया सती ॥ ३३ ॥ अत ऊर्ध्वं तदा सूत किं जातं तत्र वर्ण्यतां ॥ सूतः ॥ गतं सदाशिवं दृष्ट्वा दग्ध्वा मदनमोजसा ॥
पार्वतीतपसा युक्ता स्थिता तत्रैव भामिनी ॥ तत्रागता तदा मेना यत्र सा पार्वती स्थिता ॥ पतिना सह तन्वंगी साध्वी नां प्रवराहि सा ॥
तथा तेन च तन्वंगी पार्वती सा निवारिता ॥ बाले एहि गृहं शीघ्रं मा श्रमं कर्तुमर्हसि ॥ उक्ता तान्यां तदा साध्वी गिरिजा वाक्यमब्रवीत् ॥ पार्वत्यु-
वाच ॥ न गच्छामि गृहं मातस्तात मे शृणु तत्त्वतः ॥ वाक्यं धर्मार्थसंयुक्तं येन त्वं तोषमेष्यसि ॥ शंभुः परेषां परमो दग्धो येन महाबलः ॥ मद-
नो मम सान्निध्यमानयन्नेव तं शिवं ॥ दुर्लभो हि सदा शंभुः प्राणिनां गृहवर्त्तिनां ॥ न गच्छामि गृहं मातस्तस्मात्सर्वं विमृश्यतां ॥ ४० ॥ त
स्मात्त्वं हि गृहं व्रज ॥ स बाष्पपूरितेनैव कंठेन स्वसुतां प्रति ॥ ४२ ॥ उवाच मेना तन्वंगी एहि वत्से गृहं प्रति ॥ ततः प्रहस्य
चोवाच मातरं प्रति भामिनि ॥ ४३ ॥ प्रतिज्ञां शृणु मे मातस्तपसा परेण हि ॥ अत्रैव तं समानीय वरयामि विचक्षणं ॥ ४४ ॥

मे

कुस्माकस्मा च केनेदं कृतमस्ति मम प्रियं ॥ ततो विलोकयन् शंभुर्दिशः सर्वाः ससादरं ॥ ९० ॥ तावद्दृष्टो दक्षिणस्यां दिश्याकृ
ष्टशरासनः ॥ वक्रीकृतं धनुः सज्जं चक्रे वेद्धुं सदाशिवं ॥ ९१ ॥ यावत्पुनः संधितो वै बाणस्तु मदनेन वै ॥ तावद्दृष्टो महेशेन
सरोषेण द्विजोत्तमाः ॥ ९२ ॥ निरीक्षितस्तत्तृतीयेन चक्षुषा त्रिपुरारिणा ॥ मदनस्तत्क्षणादेव ज्वालामालावृतोभवत् ॥ ९३
हाहाकारो महानासीद्भूतानां तत्र पश्यतां ॥ देवा ऊचुः ॥ देवदेव महादेव देवानां वरदो भव ॥ ९४ ॥ गिरिजायाः सहायार्थं प्रेषि
तो मदनो हर ॥ वृथा दग्धस्त्वया देव मदनो हि महाप्रभः ॥ ९५ ॥ त्वया हि कार्यं जगदेकबंधो कार्यं स्मरेणापरमेण वर्चसा ॥ अ-
स्यां समुत्पत्स्यति यश्च शंभो तेनैव सर्वं भवतीह कार्यं ॥ ९६ ॥ तारकेणाधुना देव देवाः संपीडिता वयं ॥ तदर्थं जीवितं चास्य
देहि गिरिजां प्रभो ॥ ९७ ॥ वरय स्व महाभाग क्षेमार्थं च दिवौकसां भस्मासुरात्त्वया त्राता वयं सर्वे दिवौकसः ९८
कालकूटाच्च नूनं हि रक्षितास्म न चान्यथा ॥ तारकाच्चैव सर्वेषां त्वं त्राता तत्र न संशयः ॥ ९९ ॥ मदनोयं समायातः सु
राणां कार्यसिद्धये ॥ तस्मात्त्वया रक्षणीया उपकारपरो हि नः ॥ १०० ॥ विना तेन जगत्सर्वं नाशमेष्यति शंकर ॥ निष्का
मश्च कथं शंभो त्वं बुध्यात्र विचार्यतां ॥ १०१ ॥ तदोवाच रुषाविष्टो देवान् प्रति महेश्वरः ॥ विना कामेन भो देवा भवित
व्यं न चान्यथा ॥ १०२ ॥ यदा कामं पुरस्कृत्य सर्वे यूयं सवासवाः ॥ पदभ्रष्टास्तु वो दुःखो व्याप्तदैन्यं समाश्रिताः ॥ १०३ ॥

नाशयामि चरुद्रत्वं तस्य चैव वरवर्णिनि ॥ एकरूपं करिष्यामि अनंगेन समन्वितं ॥ प्रतिज्ञां चइमां श्रुत्वा तदुत्सृष्टास्कमध्य
मा ॥ वायुपानरता जाता त्वंबुपानरता सती ॥ ४६ ॥ कालक्रमेण महता बभूव गिरिजा तदा ॥ एकांगुष्ठेन स्कसुरवींदधारच
निजंवपुः ॥ ४७ ॥ एवमुग्रेण तपसा परमाराधनं सती ॥ चकार परया तुष्ट्या शंभोः प्रीत्यर्थमेव च ॥ ४८ ॥ एवं भावं समा
श्रित्य जगन्मंगलमंगला ॥ तुष्ट्यर्थं च महेशस्य तताप परमं तपः ॥ ४९ ॥ एवं दिव्यसहस्राणि बहूनि परमा सती ॥ हि
मालयस्तदागत्य पार्वतीं कृतनिश्चयां ॥ सभार्यः ससुतामात्य उवाच परमेश्वरीं ॥ मा खिद्यतां महादेवि तपसानेन
भामिनी ॥ क्रुरुद्रो हि दृश्यते बाले विरक्तो नात्र संशयः ॥ त्वं तन्वी तरुणी सुभ्रूस्तपसा च विमोहिता ॥ ५२ ॥ भविष्यसि न सं
देहः सत्यं प्रतिवदामि ते ॥ तस्मादुत्तिष्ठ एह्याशु स्वगृहं वरवर्णिनि ॥ ५३ ॥ किं तेन तव रुद्रेण येन दग्धः पुरानघे ॥ मद
नो निर्विकारत्वात्कथं तं प्रार्थयिष्यसि ॥ ५४ ॥ गगनस्थो यथा चंद्रो ग्रहीतुं नैव शक्यते ॥ तथैव दुर्गमः शंभुः जानी
हि त्वं शुचिस्मिते ॥ ५५ ॥ तथैव मेनया प्रोक्ता तथा सह्याद्रिणा सती ॥ मेरुणा मंदरेणैव मैनाकेन तथैव च ॥ ५६ ॥
एवमुक्ता तदा तन्वी पार्वती तपसि स्थिता ॥ उवाच प्रहसंती तु हिमवंतं शुचिस्मिता ॥ पुरा प्रोक्तं मया तात अंब किं
विस्मृतं त्वया ॥ अधुनैव प्रतिज्ञां च शृणुध्वं मम बांधवाः ॥ विरक्तोसौ महादेवो मदनो येन वै हतः ॥ तं तोषयामि तप
सा शंकरं लोकशंकरं ॥ ५९ ॥ सर्वे यूयं च गच्छंतु नात्र कार्या विचारणा ॥ दग्धो हि मदनो येन येन दग्धं गिरेर्वनं ॥ ६०
तमानयामि चात्रैव तपसा केवलेन हि ॥ तपोबलेन माहात्म्यात्स सेव्यो हि सदाशिवः ॥ ६३ ॥ जानीध्वं हि महाभागा

सत्यंसत्यंवदामिवः॥ संभाषमाणांजननींचमेनांमेनाकबंधुंपितरंहिमालयं॥ ६२॥ तथैवमेरुंमितिभाषिणंतदासमंदरं
पर्वतराजकन्यका॥ जग्मुस्तदातेनयथापर्वताहिविचक्षणाः॥ ६३॥ गतेषुतेषुसर्वेषुसखीभिःपरिवारिता॥ तथै
वचतपस्तेपेपरमार्थासतीतदा॥ ६४॥ तपसामहतातेनतत्समासीज्जगत्त्रयं॥ तदासुरासुराःसर्वेयक्षकिंनरचा
रणाः॥ ऋषयोमुनयःसिद्धाविद्याधरमहोरगाः॥ कष्टात्कष्टतरंप्राप्ताःब्रह्माणंशरणंययुः॥ ६६॥ देवाऊचुः॥ त्वया
सृष्टमिदंविश्वंजगदेतच्चराचरं॥ त्रातुमर्हसिदेवान्नस्त्वदन्योनोपपद्यते॥ ६७॥ इत्याकर्ण्यवचस्तेषांब्रह्मालो
कपितामहः॥ विमृश्यमनसासर्वंगिरिजायास्तपःफलं॥ ६८॥ दग्धंविश्वमितिज्ञात्वाक्षीराब्धिंत्वरितंययौ॥ तत्र
सुप्तंसुपर्यंकेशेषाख्येचातिशोभनं॥ ६९॥ लक्ष्म्यापादयुगलंसेव्यमानंनिरंतरं॥ दूरस्थेनापिताक्ष्र्येणन
तकंधरधारिणा॥ ७०॥ सेव्यमानंश्रियायुक्तंधृत्याकांत्यादयान्वितं॥ नवशक्तियुतंविष्णुंपार्षदैःपरिवारितं॥
कुमुदोथकुमुदाक्षश्चसनकोथसनंदनः॥ सनातनोमहाभागःसुनंदोविजयोरिजित्॥ जयंतश्चजयत्सेनोजय
श्चैवमहाबलः॥ सनत्कुमारःसुतपाःनारदश्चैवतुंबरुः॥ पांचजन्योमहाशंखोगदाकौमोदकीतथा॥ सुदर्शनं
तथाचापंशार्ङ्गंचपरमाद्भुतं॥ विष्णोःसमीपेपरमात्मनोहरेर्देवास्तदानींददृशुःसमेताः॥ उपास्यमानान्पर
मेष्ठीनीपतितांत्वसकवर्यान्सुस्कतत्राब्धिमध्ये॥ एवंविधंमहात्मानंविष्णुंदेवाववंदिरे॥ ऊचुःपरमयावाचासें
द्राब्रह्मादयःसुराः॥ देवाऊचुः॥ त्राहित्राहिमहाविष्णोत्वतोनःशरणागतान्॥ तपसोग्रेणमहतापार्वत्याःपर

अ. २१. प्र

मीमाध्यक्षायवैनमः ॥ त्र्यंबकाय जगत्रात्रे विश्वरूपाय वै नमः ॥ त्वं धाता सर्वलोकानां पिता माता त्वमीश्वर ॥ त्वं नाथो
जगतां स्वामी त्रातुमर्हसि च प्रभो ॥ ३० ॥ इत्याकर्ण्य वचस्तेषां सुराणां नंदिकेश्वरः ॥ कृपया परया युक्तो विज्ञ
प्तुं शंकर मारभत् ॥ अथ विज्ञापितस्तेन नंदिना देन महात्मना ॥ ध्यानस्थितो महादेवो देवानां कार्यसिद्ध
ये ॥ नंद्युवाच ॥ ब्रह्मादयः सुरगणाः सुरसिद्धसंघास्त्वां द्रष्टुमेव सुरवर्य विशेषयंति ॥ कार्यार्थिनो
सुरवरैः परिभत्स्यमानाः सम्यक्कृपराभव पदं परमं प्रपन्नाः ॥ तस्मात्त्वया हि देवेश त्रातव्यास्त्वधुना सु
राः ॥ एवं तेन तदा शंभुर्विज्ञप्तो नंदिना स्वयं ॥ शनैः शनैरुपारमत शंभुः परमकोविदः ॥ समाधेः प
रमात्मा सो सुरान्सर्वाननुवाच ह ॥ श्रीशिव उवाच ॥ कस्माद्यूयं महाभागा आगता मत्समीपकं ॥ ब्र
ह्मादयोत्यमी देवाः कारणमद्य वै ॥ तदा ब्रह्मा उवाचेदं सुरकार्यं महत्तरं ॥ तारकेण कृतं शंभो देवानां
परमाद्भुतं ॥ कष्टात्कष्टतरं देव विज्ञप्तुं सर्व आगताः ॥ हे शंभो तव पुत्रेण औरसेन हतो भवेत् ॥ तारको देवशत्रुश्च
नान्यथा मम भाषितं ॥ तस्मात्त्वया गिरिजा देव संधोत्गृहीतव्या पाणिना दक्षिणेन ॥ २० ॥ पाणिग्रहेण च महानु
भाव तदा गिरीं द्रेण च तां कुरुष्व ॥ ब्रह्मणो हि वचः श्रुत्वा प्रहसन्निदमब्रवीत् ॥ यदा मया स्वीकृता देवी गिरिजा सर्वसुं
दरी ॥ तदा सर्वे सुरेंद्राश्च मुनयो ऋषयस्तथा ॥ सकामाश्च भविष्यंति न क्षमाश्च परे पथि ॥ मदनो हि मया दग्धः
सर्वेषां कार्यसिद्धये ॥ मया हि धिक्कृतन्वी गिरिजा च सुमध्यमा ॥ तदानीमेव भो देवाः [illegible]

पार्वतीमदनं च सा ॥ जनयिष्यति भो ब्रह्मन्नूनात्र कार्या विचारणा ॥ एवं विमृश्य भो देवाः कार्याकार्यव्यवस्थितो ॥ २५ ॥
मदनेनैव दग्धेन सुरकार्यं महत्कृतं ॥ यूयं सर्वे च निष्कामाः मया सह सुनिश्चयं ॥ यथाहं च सुराः सर्वे तथा यूयं प्रयत्न
तः ॥ परमं तु तपश्चैव करिष्यध्वं सुदुष्करं ॥ परमानंदसंयुक्ताः सुखिनः सर्व एव हि ॥ यूयं समाधिना तेन मदनेन विना
सुराः ॥ पुराकृतं तव ब्रह्मन्नू मदनेन च विस्मृतं ॥ कामो हि नरकायैव तस्मात्क्रोधो हि जायते ॥ क्रोधाद्भवति संमोहः
संमोहात्स्मृतिभ्रंशस्तस्मात्तत्परं ॥ कामक्रोधौ परित्यज्य भवद्भिः सुरसत्तमैः ॥ ३० ॥ सर्वैरेव च मंतव्यं मद्वाक्यं नान्य
था क्वचित् ॥ एवं विश्राव्य भगवान्महादेवो वृषध्वजः ॥ सुरांश्च सर्वान्बोधयामास तथा ऋषिगणान्मुनीन् ॥ तूष्णीं भू
तो भवच्छंभुः ध्यानमाश्रित्य वै पुनः ॥ आस्ते पुरा यथा त्वासीत्स्वगणैश्च परिवारितः ॥ ध्यानस्थितं च सर्वेशं हृत्स्थानं
स्क दीर्विज्यतान् ॥ स ब्रह्म विष्णुर्विबुधान्नुवाच प्रहसन्निव ॥ यथागतेन मार्गेण गच्छध्वं मा विलंबितं ॥ ३४ ॥ तथे
पु तिमत्वा ते सर्वे स्वं स्वं स्थानमथाव्रजन् ॥ गतेषु तेषु सर्वेषु समाधिस्थो भवोऽभवत् ॥ ३५ ॥ आत्मानमात्मना कृत्वा
आत्मन्येवव्यचिंतयत् ॥ परात्परतरं स्वस्य निर्ममं निरवग्रहं ॥ निरंजनं निराभासं यत्र मुह्यंति सूरयः ॥ भा
नुर्न भाति न शशी न विभावसुर्महान्न ज्योतिरेव न चरं न च मारुतोपि ॥ यत्केवलं च सुविचार्य वसु पुरुस्मा
त्परं सूक्ष्मतरात्परं च ॥ अनिर्देश्यमचिंत्यं च निर्विकारं निरामयं ॥ ज्ञप्तिमात्रस्वरूपं च न्यासिनो यांति तत्र वै ॥
शब्दातीतं निर्विकारं यस्य चसत्तामात्रं ज्ञानगम्यं त्वगम्यं ॥ तत्तद्वस्तु सर्वदा कथ्यते वै वेदातीतं चागमैः

कर्मश्रुते:॥ तद्दृरूक्षत्वोभगवानसर्वईश्वर:पिनाकपाणिर्वृषभध्वजोविराट्॥ ४०॥ येनैवसाक्षान्मकरध्वजो
हतस्तपोजरूपाण:परमेश्वरोहर:॥ लोमशउवाच॥ गिरिजाहितदाविप्रास्तत्तापपरमंतप:॥ तपसातेनरुद्रो
पिपरमंभयमापस:॥ विजित्यतपसादेवीपार्वतीपरमेणहि॥ शंभुंसर्वार्थदंस्थाणुंकेवलज्ञप्तिरूपिणं॥ अ.२१
यदाजितस्तयादेव्यातपसावृषभध्वज:॥ समाधेश्चलितोभूत्वासंभ्रमात्ससमुत्थित:॥ जगामत्वरितेनेव
पार्वतींद्रष्टुमीश्वर:॥ तत्रापश्यत्स्थितांदेवींसखीभि:परिवारितां॥ वेदिकोपरिविन्यस्तायथैवशशिन:क
ला॥ शंभुर्निरीक्ष्यतांदेवींबटुर्भूत्वाथतत्क्षणात्॥ ४५॥ ब्रह्मचारिस्वरूपेणमहेशोभगवान्स्वयं॥ सखी
नांमध्यमाश्रित्यउवाचबटुरूपधृक्॥ किमर्थमालिमध्यस्थातन्वीसर्वांगसुंदरी॥ केयंकस्यकुतोयाता:
किमर्थंतप्यतेतप:॥ सर्वमेकथ्यतांसख्योयथातथ्येनसंप्रति॥ तत:प्राहजयाविप्रंतपस:कारणंपरं॥
हिमाद्रेर्दुहितांचेयंतपसारुद्रमीश्वरंप्राप्तुकामापतित्वेनसेयमत्रोपविश्यच॥ तपस्तत्तापसुमहत्सु
रैर्वापिदुरतिक्रमं॥ बटोजानीहितथ्येननान्यथाभाषणंमम॥ ५०॥ तद्बुलावचनंतस्यामहेशोबटुरूपधृ
क्॥ उवाचप्रहसंनेवसंतोषंपरमंगत:॥ ५१॥ शृणुध्वंममवाक्यंचमहेशोबटुरूपवान्॥ मन्येयंपार्वतीस
ख्योनजानातिहिताहितं॥ किमर्थमनयातप्तंरुद्रमुद्दिश्यबालया॥ सोऽमंगल:कपर्दीचश्मशानप्रियर

मेणहि॥ शेषासनेचोपविष्टउवाचपरमेश्वर:॥ युष्माभि:सहित:श्रीघ्रंव्रजामिपरमेश्वरं॥ मदेवंप्रार्थयामोगिरिजांप्रतिवे
स्करा:॥ पाणिग्रहार्थमद्यधुनादेवदेवंपिनाकिनं॥ यथाचेष्यतितत्रैवकरिष्यामोधुनावयं॥ तस्माद्वयंगमिष्यामोयत्ररुद्रो
महाप्रभु:॥ तपसोग्रेणसंतुष्टोह्यास्तेपरममंगल:॥ विष्णोस्तद्वचनंश्रुत्वाऊचु:सर्वेसुरासुरा:॥ ६२॥ नायास्यामो
वयंसर्वेविरूपाक्षंमहाप्रभुं॥ यथादग्ध:पुरातनमदनोदुरतिक्रम:॥ ६३॥ तथैवधक्ष्यत्यस्माकंनात्रकार्याविचारणा
प्रहस्यभगवान्विष्णुरुवाचपरमेश्वरं॥ मा भयंकुरुतसर्वेशिवरूपीसदाशिव:॥ ६४॥ नधक्ष्यतिचसर्वेषांदेवानां
भयनाशन:॥ तस्मान्द्भवद्भिर्गंतव्यंमयासार्धंविचक्षणे:॥ स्फूर्कंपुराणपुरुषंजगतामधीशंवरेण्यरूपंहिपरंपरेषां
॥ ६६॥ तपोजरूपाणंपरमार्थरूपंपरात्परंतंशरणंव्रजामि॥ ६७॥ इतिश्रीस्कंदपुराणेकेदारखंडेशैवशास्त्रेविंश अ.२० समा.
तितमोध्याय:॥ सूतउवाच॥ एवमुक्तास्तदादेवाविष्णुपरमेष्ठिना॥ जग्मु:सर्वेमहेशंतुद्रष्टुकामा:पिनाकिनं॥ १॥ परपारे
समुद्रस्यपरमेणसमाधिना॥ योगपीठस्थितंशंभुंगणैश्चपरिवारितं॥ २॥ यज्ञोपवीतंविधिनाउरसाबिभ्रदारतं॥
वासुकिंसर्पराजंचकंबश्वतरेणहि॥ ३॥ कर्णद्वयंचपरमंतथाकर्कोटकेनहिपुलकेनचबाहुभ्यांबिभ्रकं
टकन्नूपुरं॥ ४॥ शंखेनैवचपद्मेनबकुलेनविराजित:॥ गजाजिनेनमहतापरिधानगतेनहि॥ ५॥ गंगाधरं
सोमयुतंकपर्दिनंमहानुभावै:प्रमथै:समन्वितं॥ कर्पूरगौरंशितिकंठमद्भुतंरूपान्वितंदेववरंववंदिरे॥ ६॥
तदाब्रह्माचविष्णुश्चइंद्रस्त्वयोदेवमानवा:॥ तुष्टुवुर्विविधै:सूक्तै:सर्वोपनिषदान्वितै:॥ ७॥ ब्रह्मोवाच॥ न
मोरुद्रायमहतेमदनांकेतरायच॥ स्तुत्यायश्रीरिमोगायत्रिनेत्रायत्रिविष्टपे॥ ८॥ शिपिविष्टायभीमाय

वच॥ अशिवः शिवरूपेण मण्यते हि मृषा च वै॥ अनयातोषितो रुद्रो यदा सर्व्वं समेष्यति॥५४॥तदे
यमस्फुमातन्वी भविष्यति न चान्यथा॥ योदक्षशापाद्धिकृतो यज्ञवाह्यो निरंतरं॥५५॥तेन रुद्रे
णा किं कार्यमनया चैव बालया॥ निवार्यतामियं सख्यो मतुं कामा पिशाचवत्॥५६॥हित्वेंद्रं च
मनोज्ञं वैयमं चैव महाबलं॥ निर्ऋतिं च विशालाक्षं वरुणं च अपांपतिं॥५७॥कुबेरपव
नं चैव तथैव च विभावसुं॥ एवमादीनि वाक्यानि उवाच परमेश्वरः॥५८॥ सखीनां शृण्व
तीनां च तदा सा पार्वती सती॥ इत्याकर्ण्य वचस्तस्य रुद्रस्य बटुरूपिणः॥५९॥ चुकोप रुद्र
शं साध्वी महेशं बटुरूपिणं॥ जये त्वं विजये साध्वी विजये विश्वसुंदरि॥६०॥स्फुलोचने महा
नागे किमनेन प्रयोजनं॥ बटुस्वरूपमास्थाय यद्यागतो देवनिंदकः॥६३॥एवं ज्ञात्वा च भोस
ख्यः किमनेन प्रयोजनं॥ येनिंदकाश्च पापाश्च कृतघ्नाश्च वेदनिंदकाः॥६२॥ व्रतभ्रष्टाश्च प्रवि
ष्टा आवाभ्यां स्तेभनीषिभिः॥ आर्याणां निंदनं श्रुत्वा येनयांति परांङ्मुखाः॥६३॥ स्थानांतरं
त्वप्रविष्टास्ते पिस्युः पापिनो जनाः॥ गिरिजोक्तं समाकर्ण्य विजया वाक्यमब्रवीत्॥६४॥बटुस्वरू

स्कं॰ केदारखं॰ पिंगरुद्रं कुपितासहसातदा ॥ गछगछवटोशीघ्रंनस्थातव्यंत्वयात्रवै ॥ ६५ ॥ किमनेनप्रलापेनतवनास्तिप्रयोज
नं ॥ नस्माकिंपरस्त्वयातान्विरुतःकेनैवहेतुना ॥ ६६ ॥ सर्वेषामपिचसात्यंवचनंस्तकमेवच ॥ मयोक्तेनचवाक्येनक
स्मात्तन्वीचरोपिता ॥ ६७ ॥ यःशंभुरुच्यतेलोकेभिक्षुकोभिक्षुकप्रियः ॥ यंप्रेत्यत्ततंप्रोक्तंतदाकोपपराभव दि
॥ ६८ ॥ इयंतावत्स्वरूपाचविरूपोसौसदाशिवः ॥ विशालाक्षीत्वियंबालाविरूपाक्षोभवस्तथा ॥ ६९ ॥ एवं
भूतेनरुद्रेणमोहितेयंकथंभवेत् ॥ सभाग्योहिपतिस्त्रीणांसदाभाव्योरतिप्रियः ॥ ७० ॥ मोहितासित्वंते
नाद्यनिर्गुणेनगुणात्मिका ॥ तस्मात्तेनचविज्ञातानदृष्टःकेनचिछिवः ॥ ७१ ॥ सकामानांचभूतानांदुर्लभो
हिसदाशिवः ॥ तपसापरमेणैवगर्वितेयंस्त्वमध्यमा ॥ ७२ ॥ निस्त्वंमोहिसदास्थाणुःकथंप्राप्स्यतितंपतिं
॥ मयोक्तंहिविशालाक्षिकस्मात्दुष्टासित्वंगने ॥ ७३ ॥ यावद्दोषोभवेत्तन्नृणांनारीणांचविशेषतः ॥ तेन
वैरेणतत्सर्वंभस्मीभूतंभविष्यति ॥ ७४ ॥ कृतंचार्जितंतान्विसत्यमेवमयोदितं ॥ कामःक्रोधश्चमोहश्च
दंभोमात्सर्यमेवच ॥ ७५ ॥ हिंसेर्ष्याचप्रपंचश्चतेनसर्वंविनश्यति ॥ तस्मात्तपस्विनीयावैकामंक्रोधंच
वर्जयेत् ॥ ७६ ॥ यदीश्वरोत्हृदिमध्येविभाव्योमनीषिभिःसर्वदाह्यसिमात्रः ॥ तदासर्वैर्मुनिरत्नाविभाव्य
स्तपस्विभिर्नान्यथाचिंतनीयः ॥ ७७ ॥ एतच्छ्रुत्वावचनंतस्यभिक्षोस्तदाब्रवीद्द्विजयातंचविप्रं ॥ गछाद्य
किंचित्तवनास्तिकार्यंनवक्तव्यंवचनंबालिशेन ॥ ७८ ॥ एवंविवदमानंतंबहुरूपंसदाशिवं ॥ विस

हत्त्वात्तमो जातं तमसा वेष्टितं नभः ॥ ९५ ॥ नभसो मथ्यते वायुर्वायोरग्निस्तथैव च ॥ अग्नेरापः समुत्पन्नाः अद्भ्यो
जाता मही तदा ॥ ९६ ॥ मत्यादिकानि भूतानि नित्यानित्यानि वरानने ॥ दृष्टं यत्सर्वमेतद्धि नश्वरं विद्धि भामिनि ॥ ९७ ॥
एकोनेकत्वमापन्नो निर्गुणो हि गुणान्वितः ॥ स्वकांत्या भाति यो नित्यं परकांत्यान्वितो भवत् ॥ ९८ ॥ स्वतंत्रः
परतंत्रश्च त्वया देवि महत्कृतं ॥ मायामयं कृतमिदं च जगत्समग्रं सर्वात्मना विधृतं परया च बुध्या ॥ ९९ ॥ सर्वात्म-
भिः परगुणैः परमात्मभावैः संसक्तमिंद्रियगुणैः परिवेष्टितं च ॥ के ग्रहाः के उडुगणाः के बाध्यंते त्वया कृताः
१०० ॥ किमुक्तं चाधुना देवि शिवार्थे वरवर्णिनि ॥ गुणकार्यप्रसंगेन आवां प्रादुर्भूतौ कृतौ ॥ १०१ ॥ त्वं हि वै
प्रकृतिः सूक्ष्मा रजः सत्वतमोमयी ॥ व्यापारदक्षा सततं महात्माहं सुमध्यमे ॥ २ ॥ हिमालयं न गच्छामि न या-
चामि कथंचन ॥ देहीति वचनात्सद्यः पुरुषो याति लाघवं ॥ ३ ॥ इदं ज्ञात्वा च कल्याणि किमस्माकं वदस्व च
॥ कार्यं त्वयाद्यया मद्य तत्सर्वं वक्तुमर्हसि ॥ ४ ॥ तेनोक्ता सा तदा तन्वी उवाच कमलेक्षणा ॥ त्वमात्मा प्रकृति-
श्चाहं नात्र कार्या विचारणा ॥ ५ ॥ तथापि शंभो कर्तव्यं मम चोद्वहनं महत् ॥ देहोत्थविषयाक्षिप्तो विदे-
हो हि भवान्परः ॥ ६ ॥ तथाप्येवं महादेव देहीव वरणं कुरु ॥ प्रपंचरचनां शंभो कुरु वाक्यान्मम प्रभो ॥ ७ ॥ याच-
स्व मां देवदेव सौभाग्यं देहि मे हर ॥ इत्येवमुक्तः स तया महात्मा महेश्वरो लोकविडंबनाय ॥ ८ ॥ तथेति मत्वा प्रह-
सन्नजगाम स्वमालयं देववरैः प्रपूजितः ॥ एतस्मिन्नंतरे तत्र हिमवान्गिरिभिः सह ॥ मेनया भार्यया सार्धमा-

जगाम त्वरान्वित ॥ पार्वतीदर्शनार्थं च स्वस्तैस्वपरिवारितः ॥ ९ ॥ पार्वत्या च तदा दृष्टो हिमवान्गिरिभिः सह ॥ अभ्युत्थान-
परा साध्वी प्रणम्य शिरसा स्वयं ॥ ११० ॥ पितरौ च तदा भ्रातॄन्बंधूंश्चैव तथा परान् ॥ स्वमंकमारोप्य तदा महात्मा सुतां परि-
ष्वज्य च बाष्पपूरितः ॥ ११ ॥ उवाच वाक्यं मधुरं हिमालयः किं वै कृतं साध्वि यथातथं त्वया ॥ तत्कथ्यतां महाभागे सर्वं शुश्रू-
षतां हि नः ॥ १२ ॥ तच्छ्रुत्वा मधुरं वाक्यं उवाच पितरं प्रति ॥ तपसा परमेणैव प्रार्थितो मदनांतकः ॥ १३ ॥ ज्ञातं च मे महत्कृ-
त्यं त्र्यंबकेण सुदुःसहं ॥ अत्र दृष्टो महादेवो वरणार्थं समागतः ॥ १४ ॥ समयोक्तस्तदा शंभुर्मम पाणिग्रहः कथं ॥ क्रि-
यते त्वया देव मम पित्रा विनाधुना ॥ १५ ॥ यथागतेन मार्गेण गतो सौ त्रिपुरांतकः ॥ तस्यास्तद्वचनं श्रुत्वा अवाप प-
रमां मुदं ॥ १६ ॥ बंधुभिः सह धर्मात्मा उवाच स्वसुतां पुनः ॥ स्वगृहं चाद्य गच्छामो यदा सर्वे च भूधराः ॥ १७ ॥ अनया-
राधितः शंभुः पिनाकी वृषभध्वजः ॥ इत्युक्त्वा तु तदा सर्वे हिमालयपुरोगमाः ॥ १८ ॥ पार्वती परमप्रीतास्तु दृष्ट्वा वाग्भिरादृ-
ताः ॥ तांस्तु सभानां च तदा हिमालयो मृगेंद्रमारोप्य च देववर्णिनं ॥ १९ ॥ सर्वे च शैलाः परिवार्य चोत्सुकाः समानयामास गृहं
स्वमालयं ॥ देवदुंदुभयो नेदुः शंखास्तूर्याण्यनेकशः ॥ २० ॥ वादित्राणि बहून्येव वाद्यमानानि सर्वशः ॥ पुष्पवर्षेण मह-
ता तेनानीता गृहं प्रति ॥ २१ ॥ संपूज्यमाना बहुभिस्तदानीं महाविभूत्या द्युचलैस्तपस्विनी ॥ तथैव देवैः सह चारणैश्च
महर्षिभिः सिद्धगणैश्च सर्वशः ॥ २२ ॥ पूज्यमाना तु सा देवी ह्युवाच कमलानना ॥ देवानृषीन्पितॄन्यक्षानन्यान्
सर्वान्समागतान् ॥ २३ ॥ गच्छध्वं सर्व एवैते ये न्ये चात्र समागताः ॥ स्वं स्वं स्थानं यथाजोषं सेव्यतां परमः शिवः ॥

२४॥ एवंतदानींस्वपितुर्गृहंगतासंशोभमानापरमेणवर्चसा॥ सापार्वतीदेववरैः सुपूजितासंचिंतयंतीमनसासदा
शिवं॥ २५॥ इतिश्रीस्कंदपुराणेकेदारखंडेशैवशास्त्रेएकविंशतितमोध्यायः॥ श्री॥ लोमशउवाच॥ एतस्मिन्नं
तरेतत्रमहेशेनप्रणोदिताः॥ आजग्मुःसप्तऋषयोहिमालयमकल्मषं॥ १॥ तानदृष्ट्वासहसोत्थायहिमाद्रिः
प्रीतमानसः॥ पूजयामासतान्सर्वान्उवाचनतकंधरः॥ २॥ किमर्थमागतायूयंब्रूतागमनकारणं॥ तदोचुःसप्त
ऋषयोमहेशप्रेरितावयं॥ ३॥ समागतास्त्वत्सकाशंकन्यायाश्चविलोककाः॥ तान्सर्वान्विधिनाशैलस्त्वांकं
न्यांदर्शयाशुवै॥ ४॥ तथाचोक्तःसऋषिभिरानयामाससपार्वतीं॥ स्वोत्संगेपरिगृह्याशुगिरींद्रश्चैवबुधिमा
न॥ ५॥ हिमवान्गिरिराजोथउवाचप्रहसन्निव॥ इयंसुतामदीयाहिवाक्यंशृणुतमेऽधुना॥ ६॥ तप
स्विनांवरिष्ठोसोविरक्तोमदनांतकः॥ कथमुद्वाहमेवार्थयिनानंगःकृतःस्मरः॥ ७॥ अत्यासन्नेचाति
दूरेआढ्येधनविवर्जिते॥ वृत्तिहीनेचमूर्खेचकन्यादानंनशस्यते॥ ८॥ मूढायचविरक्तायचात्मसंभावि
तायच॥ सासूयायप्रमत्तायकन्यादानंनकारयेत्॥ ९॥ तस्मान्मयाविचार्यैवभवद्भिर्ऋषिसत्तमाः॥
प्रदातव्यामहेशायएतन्मेव्रतमुत्तमं॥ १०॥ तच्छ्रुत्वावचनंतस्यगिरीशस्यमहर्षयः॥ ऊचुस्तमेकपद्येनप्रह
स्यचहिमालयं॥ ११॥ ययाकृतंतपस्तीव्रंययाचाराधितःशिवः॥ तपसातेनसंतुष्टःप्रसन्नोद्यसदाशिवः॥
१२॥ अस्याःपुत्र्याश्चशैलेनजानासिचकिंचन॥ महिमानंपरंचैवतस्माद्देवंप्रयच्छवै॥ १३॥ शिवायगि

र्जयामासतदाविजयावाक्यकोविदा॥ ८९॥ तिरोधानंगतःसद्योमहेशोगिरिजांप्रति॥ अलक्ष्यमाणःसर्वासांस
खीनांपरमेश्वरः॥ ९०॥ प्रादुर्बभूवसहसानिजरूपधरस्तथा॥ यदाध्यानस्थितादेवीनिजध्यानपरासती॥ ९१॥
तदात्हृदिस्थितोदेवोबहिर्दृष्टिपथेभवत्॥ नेत्रेचोन्मील्यचतदागिरिजायतलोचना॥ ९२॥ अपश्यद्देवदेवेशं
सर्वलोकमनोहरं॥ द्विकुजंचैकवक्त्रंचकृत्तिवाससमद्भुतं॥ ९३॥ कपर्दचंद्रलेखांकंभस्मोद्धूलितविग्रहं
कर्णस्थौहिमहानागौकंबलाश्वतरौबुधौ॥ ९४॥ वासुकिःसर्पराजश्चकृतोहारोमहात्मना॥ वलयानिमहार्हा
णिकृतंगाश्चकृतानिवै॥ ९५॥ एवंभूतस्तदारुद्रोपार्वतीप्रत्युपस्थितः॥ उवाचलरयायुक्तोवरंवरयभामि
नि॥ ९६॥ व्रीडयापरयायुक्तासाध्वीसोवाचशंकरं॥ त्वंनाथोममदेवेशतारकस्यवधंप्रति॥ ९७॥ भवतोहि
मयासाकंभविष्यतिकुमारकः॥ तस्मात्त्वयाहिकर्तव्यंममवाक्यंमहेश्वर॥ ९८॥ गंतव्यंहिमवत्पार्श्वेनात्रका
र्याविचारणा॥ याचस्वमांमहादेवऋषिभिःपरिवारितः॥ ९९॥ करिष्यतिनसंदेहस्तववाक्यंपितामम॥ द
क्षकन्यापुराहंवैपित्रादत्तायदातव॥ १००॥ यथोक्तविधिनातत्रउद्वाहोनकृतस्त्वया॥ नग्रहाःपूजितास्तेनदक्षे
च गैमहात्मना॥ १०१॥ ग्रहाणांविषमत्वेनसच्छिद्रोयंमहानभूत्॥ तस्माद्यथोक्तविधिनाकर्तुमर्हसिसुव्रत॥ १०२॥
विवाहंत्वंमहादेवदेवानांकार्यसिद्धये॥ ततोवाचमहादेवोगिरिजांप्रहसन्निव॥ १०३॥ स्वभावेनैवयत्सर्वंजं
गमाजंगमंमहत्॥ जातंत्वयामोहितंचत्रिगुणैःपरिवेष्टितं॥ १०४॥ अहंकारात्समुत्पन्नंमहत्तत्वंचपार्वति॥ म

रिजामेनांकुरुष्ववचनंहिनः॥ तच्छ्रुत्वावचनंतेषांऋषीणांभावितात्मनां॥३४॥ उवाचलरयायुक्तःपर्वतान्पर्वतेश्वरः॥
हेमेरोहिमवान्सह्यगंधमादनमंदर॥३५॥ मैनाकविंध्यशृंसर्ध्वंकिंकार्यंचयथातथं॥ मेनातदाउवाचेदंपर्वता
न्वाक्यमुत्तमं॥३६॥ अधुनाकिंविशेषेणकर्तव्यंकार्यंतदेवहि॥ उत्पन्नेयंमहाभागदेवकार्यार्थमेवच॥३७
प्रदातव्याशिवायैवशिवार्थेचावतारिता॥ अनयाराधितोरुद्रोरुद्रेणप्रतिभाषितं॥३८॥ उत्पन्नेयंमहाभा
गारुद्रायप्रतिदीयतां॥ निमित्तमात्रंकर्तव्यमस्माभिःशिवपूजनं॥१९॥ एतच्छ्रुत्वातदातस्यामेनायाःपरि
भाषितं॥ परितुष्टोहिमाद्रिश्चवाक्यंचेदमुवाचह॥२०॥ ऋषींश्चैवनिरीक्षंतीकन्येयंममसंप्रति॥ ततः
समानीयसकलोचनांतांश्यामांनितंबार्पितहेमकांचीं॥ वैडूर्यमुक्तावलयान्दधानांभास्वत्प्रभांचंद्रमुखीं
चसुंदरीं॥२१॥ लावण्यालयवापिकांसकवदनांगौरींमहासुप्रभांबिंबोष्ठींतनुमध्यमांसुवलयांतन्वींसु
वस्त्रांशुभां॥ दृष्ट्वातेऋषयोपिमोहमगमन्कांतास्तदासंभ्रमान्नोचुःकिंचनवाक्यमेवसुधियोत्यन्या
न्प्रमत्ताइव॥२२॥ एवंतदातेऋषयोपिमोहितास्तस्याःस्वरूपेणकिमुतान्यदेवताः॥ तथाविधांतांच
निरीक्ष्यतन्वींकन्यांनगेंद्रस्यशिवप्रियास्ते॥२३॥ आमंत्र्यसर्वेऋषयोहिमालयंपप्रछ्वशंकंतरसातमू
चुः॥ ऋषयऊचुः॥ प्रदत्ताहिगिरींद्रेणपार्वतीतवनान्यथा॥२४॥ उद्वाहार्थंतुगच्छस्वदेवैश्चपरिवारितः॥=

दा

अ. २२. ५

गच्छशीघ्रंमदेहेहोवपार्वतीमामजन्मने ॥२५॥ तच्छ्रुत्वावचनंतेषांप्रहस्येदमुवाचह ॥ विवाहोहिमहाभागानष्टो
नश्रुतोपिवा ॥ मयापुरामुनीन्द्राःमोकथ्यतांकविशेषतः ॥ ततोचुर्ऋषयःसर्वेप्रहसंतःसदाशिवं ॥२७॥ विष्णु
राहूयतांदेवनान्यथाकर्तुमर्हसि ॥ ब्रह्माणंसत्यलोकाच्चतथाचैवशतक्रतुं ॥२८॥ तथाऋषिगणान्सर्वान्
यक्षगंधर्वपन्नगान् ॥ सिद्धविद्याधरांश्चैवकिन्नरांश्चाप्सरोगणान् ॥२९॥ एतांश्चान्यान्बहून्देवआनय
स्वेतिसत्वरं ॥ तदाकर्ण्यऋषिप्रोक्तंवाक्यंवाक्यविशारदः ॥३०॥ उवाचनारदंदेवोविष्णुमासत्वरं ॥ ब्रह्मा
णंमहेंद्रंचअन्यानेवंसमानय ॥३१॥ शंभोर्वचनमादायशिरसालोकपावनः ॥ जगामत्वरितोनत्वावैकुंठं
विष्णुवल्लभः ॥ ददर्शदेवंपरमासनेस्थितंश्रियाचदेव्यापरिसेव्यमानं ॥ चतुर्भुजंदेववरंमहाप्रभंनीलोत्पल
श्यामतनुंवरेण्यं ॥३२॥ महार्हरत्नाढ्यचारुकुंडलंमहार्घकिरीटोत्तमभास्वरं ॥ स्ववैजयंत्यावनमालयान्वि
तंसनादैरस्तंसहस्रशाववंदे ॥३४॥ उवाचचसमेत्यैवंशंभोर्वचनमादरात् ॥ ब्रह्मवीणांवाद्यमानःसततमः
॥३५॥ एहिएहिमहादेवंमहाविष्णोचरान्वितः ॥ उद्वाहार्थंचदेवस्यत्वमेकःकार्यसाधकः ॥३६॥ प्रहस्य
भगवानाहनारदंऋषिसत्तमं ॥ कथमुद्वाहनेबुद्धिरुत्पन्नातस्यशूलिनः ॥३७॥ विज्ञातार्थोहिभगवा
न्नारदंपरिदृष्टवान् ॥ नारदः ॥ तपसामहतारुद्रःपार्वत्यापरितोषितः ॥३८॥ स्वयमेवागतस्तत्रयत्रसागि

ऋर्भृगुः॥५३॥ कण्वोबृहस्पतिःशक्तिःजमदग्निःपराशरः॥ मार्कंडेयःशिलावाकःशून्यपालोदृढश्रमः॥ अगस्त्यश्च
वनोगर्गःशिलादोथमहामुनिः॥ एतेचान्येचबहवोह्यागताःशिवसंनिधौ॥५५॥ ब्रह्मणानोदितास्तत्रचक्रुस्तेवि अ २२.
धिसत्क्रियां॥ वेदोक्तविधिनासर्वेवेदवेदांगपारगाः॥५६॥ चक्रुःरक्षांमहेशस्यकृतकौतुकमंगलाः॥ ऋग्यजुः
सामसहितैःसूक्तैर्नानाविधैस्तथा॥ मंगलानिचभूरीणिऋषयस्तत्ववेदिनः॥ अभ्यंजनादिकंसर्वंचक्रुःतस्य
परात्मनः॥५८॥ ख्यातंकपर्दिनस्तस्यशिवस्यपरमात्मनः॥ अनेकैःपंजरैर्युक्तामुंडमालाभवत्तदा॥५९॥ ये
सर्पास्त्वंगनाभूताश्चतेसर्वेतक्षकादिवै॥ बभूवुर्मंडलान्येवजातरूपमयानिच॥६०॥ सर्वभूषणसंयुक्तोमहा
देवोभवत्तदा॥ यथोदितैःपरिवृतोगिरिजांप्रतिशंकरः॥६१॥ चंडिकावीरभगिनीतदाजाताभयावहा॥ प्रेतास
नगताचंडीसर्पाभरणमंडिता॥६२॥ पूर्णकलशमादायहैममूर्ध्निमहाप्रभा॥ परिवारयुताचंडीदीप्तास्यात्यु
ग्रलोचना॥६३॥ तांचभूतान्यनेकानिविरूपाणिसहस्रशः॥ तैःसमेताग्रतश्चंडीजगामविकृतानना॥ चं
ड्याःसर्वेरुद्रगणाःपृष्ठतश्चकृतास्तथा॥ कोट्येकादशसंख्याकारौद्रारुद्रप्रियाश्चते॥६५॥ तदाडमरुनि
र्घोषैर्व्याप्तमासीज्जगत्त्रयं॥ भेरीझांकारशब्देनशंखानांनिनदेनच॥६६॥ तथादुंदुभिनिर्घोषैःशब्दःकोला

हलोभवत्॥ गणानांपृष्ठतोभूत्वासर्वेदेवाःसवासवाः॥६७॥ अन्वयुःसहसिद्धाश्चलोकपालैःसमन्विताः॥
मध्येव्रजन्महेंद्रोथऐरावतमुपस्थितः॥६८॥ शुशुभेध्रियमाणेनछत्रेणमहतावृतः॥ चामरैर्वीज्यमानो
सौस्रुरैश्चपरिवारितः॥६९॥ तदनुव्रजमानास्तेऋषयोपितदाह्यमी॥ भरद्वाजादयोविप्राःशिवस्योद्वहनं
प्रति॥७०॥ शाकिनीयातुधानाश्चवेतालाब्रह्मराक्षसाः॥ भूतप्रेतपिशाचाश्चप्रणिपत्यमहाप्रभं॥७१
प्रमथाश्चतदासर्वेचंडीमूचुर्भयंकरां॥ विनास्माभिःकुतोयासिवदचंडियथातथं॥७२॥ उवाचतुहसंतीसांती
साभूतानांतत्रशृण्वतां॥ शंभोरुद्वहनार्थायप्रेतारूढाप्रयाम्यहं॥७३॥ हैमंकलशमादायशिरसाबिभ्रतीस्व
यं॥ करवालीस्वरूपेणचंडीजाताततःस्वयं॥ भूतैःपरिवृतासर्वैःसर्वेषामग्रगासती॥ गणास्तामनुजग्मुर्वै
गणानांपृष्ठतःपुरा॥७५॥ इंद्रादयोलोकपालाऋषयःपृष्ठतोन्वयुः॥ ऋषीणांपृष्ठतोभूत्वापार्षदाश्चम
हाप्रभाः॥७६॥ विष्णोरमितभावज्ञाकुमुदाद्यामनोरमाः॥ सर्वेपयोदसंकाशाःस्रग्विणोवनमालिनः॥
श्रीवत्सांकधराःसर्वेपीतवस्त्रान्विताःशुभाः॥ चतुर्भुजाःकुंडलिनःकिरीटकटकांगदाः॥७८॥ हारनूपुरसूत्रै
श्चकटिसूत्रांगुलीयकैः॥ शोभिताःसर्वएवैतेमहापुरुषलक्षणाः॥७९॥ तेषांमध्यगतोविष्णुःश्रियोपेतः

केदा०

शरारिहा ९०॥ बभौ त्रिलोकीकृतविश्वमंगलो महानुभावैः कृतविश्वमंगलः॥ शिवेन सार्धं परमार्थदस्तदा हरिः परा
आज्जगदेकबंधुः॥ ९१॥ स तार्क्ष्यपुत्रोपरि संस्थितो महालक्ष्म्या समेतो भुवनैकभर्ता॥ सर्वैर्मुनींद्रैः परिवीज्यमानः अ० २२
सचामरैर्देवतादैवो महाहरिः॥ ९२॥ तथा विरिंचिर्निजवाहनस्थो वेदैः समेतः सह षड्भिरंगैः॥ तथागमैः सेतिहा
सैः पुराणैः स सद्भृतो वेदगर्भो बभूव॥ ९३॥ ब्रह्मा हरिश्चापि तदा सुरेंद्रैः समावृतो ऋषिभिः संपरीतः॥ वृषारूढो वृषके
तुर्डराजो योगीश्वरो विश्वरूपोप्यगम्यः॥ ९४॥ शुद्धस्फटिकसंकाशं वृषभं च मनोहरं॥ यो धर्म उच्यते वेदे वेदैर्देवैः
सिद्धैर्महर्षिभिः॥ ९५॥ तमारूढो महादेवो वृषभं धर्मवत्सलं॥ समेतो मातृभिस्ताभिः ब्रह्मादिभिरलंकृतः ९६
एभिः समेतः शुरदैत्यदानवैर्यो महेशोपि बुधैरलंकृतः॥ हिमालयं गिरिवर्यं तदानीं पाणिग्रहार्थं प्रमदोत्तमा २
याः॥ ९७॥ इति श्रीस्कंदपुराणे केदारखंडे शैवशास्त्रे द्वाविंशोध्यायः॥ लोमश उवाच॥ तथैव सर्वे परया मुदा अ० २३ - समा०
न्विताश्चक्रे गिरींद्रः स्वस्वकृतार्थमेव च॥ गर्गं पुरस्कृत्य महानुभावं प्रस्तावयोग्यं च सुमंगलं तदा॥ १॥ आहूय विश्व
कर्माणं कारयामास सादरं॥ मंडपं च सुविस्तीर्णं वेदिकाभिर्मनोहरं॥ २॥ अयुतेनैव विस्तारो योजनानां च वि
स्तृतं॥ मंडपं लक्षणोपेतं नानाश्चर्यसमन्वितं॥ ३॥ स्थावरं जंगमं चैव सदृशं च मनोहरं॥ जंगमं च जितं तत्र स्थाव त
रेण विशेषतः॥ ४॥ जंगमेन च तत्रासीत्स्थावरं जितमेव च॥ तपसा च जितास्तत्र स्थूलभूमिर्न चान्यथा॥ ५॥

रिजा सती॥ दासोहमवदच्छंभुः मदनेन वशीकृतः॥ ३९॥ त्वरितेनैव शंभुस्त्वां समाह्वयति संप्रति॥ तस्य तद्वचनं श्रुत्वा दे
वदेवो जनार्दनः॥ ४०॥ नारदेन समायुक्तः पार्षदैः परिवारितः॥ सुपर्णमारुह्य तदा महात्मा योगीश्वराणां प्रभुरच्युतो
महान्॥ ४१॥ ययौ तदाकाशपथा हरिः स्वयं सनारदो देववरैः समेतः॥ तं दृष्ट्वा त्वरितो रुद्रः योगिध्येयांघ्रिपंकजं॥ ४२
अभ्युत्थाय मुदा युक्तः परिष्वज्य च शार्ङ्गिणं॥ तदा हरिहरौ देवौ एकपर्यंकनातिष्ठतां॥ ४३॥ ऊचतुश्च तदान्योन्यं क्षेमं
कुशलमेव च॥ ईश्वर उवाच॥ गिरिजा तपसा तुष्टा प्रहृता च पुरा सती॥ ४४॥ तदा संकल्पविधिना मया पाणिग्रहः
कृतः॥ अधुनैव मया कार्यं कर्मविस्तारणं बहु॥ ४५॥ यत्कार्यं तन्न जानामि सर्वं पाणिग्रहोचितं॥ शंभोस्तद्वचनं श्रुत्वा
प्रहस्य मधुसूदनः॥ ४६॥ यावद्वक्तुं समारेभे तावद्ब्रह्मा समागतः॥ इंद्रेण सह देवैश्च लोकपालैः समन्वितः॥ ४७॥ तथै
व सर्वे सुरयक्षदानवा नागाः पतंगाप्सरसो महर्षयः॥ समेत्य सर्वे परिवकुमीशमूचुस्तदानीं समवेतवाक्यं॥ ४८
गच्छ गच्छ महादेव अस्माभिः सहितः प्रभो॥ ततो विष्णुरुवाचेदं प्रस्तावसदृशं वचः॥ ४९॥ गृह्योक्तविधिना शंभो क
र्म कर्तुं त्वमर्हसि॥ नांदीमुखं मंडपस्थानं तथा चैव हि कुलधर्मेण युक्तं॥ ५०॥ महानदीसंगमं वर्जयित्वा कुर्वंति ये वेदवि
दो मनीषिणः॥ मंडपस्थापनं चैव क्रियतां ह्यधुना विभो॥ ५१॥ एवमुक्तस्तदा शंभुर्विष्णुना तत्र कारवै॥ ब्रह्माद्यधि
कृतं तेन सर्वमभ्युदयोचितं॥ ५२॥ ग्रहाणां पूजनं चक्रे कश्यपो ब्रह्मणा युतः॥ तथात्रिश्च वसिष्ठश्च गौतमो भागु

जलंमरुस्थलंतत्रनविदुः कोविदाजनाः॥ क्वचित्सिंहाः कृत्रिमाश्चक्वचित्सारसपंक्तयः॥६॥ क्वचिच्छिखंडि
नस्तत्रकृत्रिमाश्चमनोरमाः॥ क्वचित्स्त्रियः कृत्रिमाश्च [illegible]येः पुरुषैस्सह॥७॥ तथातेनैव
विधिनाद्वारपालाःमनोहराः॥ हस्तेधनुषिचोत्कृत्यास्थावराजंगमोपमाः॥८॥ तथैवकृत्रिमायोषास्ताल
हस्ताः सुलोचनाः॥ चामरैर्वीज्यमानाश्चनानापुष्पांकुरान्विताः॥९॥ कृत्रिमाश्चतथाबाह्याः पताकाबहुव
र्णजाः॥ द्वारिस्थितामहालक्ष्मीः साक्षात्क्षीराब्धिजेवसा॥१०॥ गजाश्वालंकृताह्यासंन्कृत्रिमाह्यचलो
पमाः॥ तथाश्वाः सादिभिश्चैवगजाश्चगजसादिभिः॥११॥ रथारथिभिराकृष्यमहाश्चर्यसमन्विताः॥
एवंसर्वंमोहनार्थंकृतंचैवविश्वकर्मणा॥१२॥ महाद्वारिस्थितोनंदीकृतस्तेनमहात्मना॥ शुद्धस्फटिक
संकाशोयथानंदीतथैवच॥१३॥ तस्योपरिमहादिव्यंपुष्पकंरत्नभूषितं॥ राजतंपल्लवैश्छत्रैश्चामरैश्च
सुशोभितं॥१४॥ वामपार्श्वेगजौतत्रकृत्स्नचामीकरनिभौकृतौ॥ षष्टिवर्षौचतुर्दंतौमहात्मानौमहाप्रभौ॥१५
तथैवार्कनिभौतेनकृतौचाश्वौमहात्मना॥ दंशितौवररत्नाढ्यौलोकपालास्तथैवाह॥१६॥ षोडशोप
कृतास्तेनयाथातथ्येनधीमता॥ सर्वेदेवायथार्थायेनकृताविश्वकर्मणा॥१७॥ तथाहिऋषयः सर्वेभृग्वा वि

२३ अ. ५ा.

ज्ञातोहिनारदस्त्संवेदृष्ट्वात्मानंमहायशाः॥२२॥अवलोकपरोजातुचरितंविश्वकर्मणा॥ +४

स्कंद० केदारखं० श्चतपोधनाः॥विष्णुश्चपार्षदैश्चैसाकंइंद्रोहिपरमार्थवान्॥१८॥कृताःसर्वेमहात्मानोयथातथ्येनधीमता॥एवंभू
तात्स्तेनदातेनकृतोवैमंडपोमहान्॥१९॥अनेकाश्चर्यसंयुक्तोदिव्योदिव्यविमोहिनः॥एतस्मिन्नंतरेतत्रआग ३२२
तोनारदोग्रतः॥२०॥ब्रह्मणानोदितस्तत्रहिमालयगृहंप्रति॥नारदोवीक्ष्यआत्मानंविस्मयान्वितः॥२३॥कृ
त्रिमोनारदस्तेनकृतोवैविश्वकर्मणा॥प्रविष्टोमंटपंतस्याहिमाद्रेःरत्नशोभितं॥२२॥कविष्टोकंदलीस्तंभैरंभाये
रूपशोभितं॥सहस्रस्तंभसंयुक्तंविचित्रंपरमाद्भुतं॥२४॥वेदिकांचतदादृष्ट्वाविस्मयंपरमंययौ॥तदाप्रोवा
चभगवान्नारदःपरमंवचः॥२५॥आगतास्तेमहाभागदेवाइंद्रपुरोगमाः॥तथामहर्षयःसर्वेगणैश्चपरि
वारिताः॥२६॥महादेवोवृषारूढोविवाहंप्रतिसत्वरन्॥इत्येवंवचनंश्रुत्वाहिमवान्गिरिसत्तमः॥२७॥उ
वाचनारदंवाक्यंप्रशस्यंमधुरंमहत्॥पूजयित्वायथान्यायंगच्छध्वंशंकरंप्रति॥२८॥मैनाकेनचस[illegible]
रुणागिरिणासह॥एभिःसमेतोत्यधुनामहामतेव्रजस्वशीघ्रंशिवमानयस्व॥देवैःसमेतंचमहिर्षिसंघैःसुरास्
रैरर्चितपादपद्मं॥ध्रुवं॥तथेतिमत्वासजगामतूर्णंसहैवतैःपर्वतराजभिश्च॥३०॥त्वरन्जगामैकपदेनशंभुंप्राप्तो
मुनीनांप्रवरोमहात्मा॥तावद्दृष्टोमहादेवोदेवैश्चैवपरिवारितः॥३१॥तदाब्रह्माचविष्णुश्चइंद्रश्चैवसुरैःसह॥
पप्रच्छुर्नारदंसर्वेयेन्येरुद्रचराश्चशं॥३२॥कथ्यतांपृच्छमानानांअस्माकंत्वरितेनहि॥एतेकस्मात्समायाताःभे

सकलानप्रति ॥ कन्यांदास्यतिचेन्मह्यंपर्वतोहिहिमालयः ॥ ४९ ॥ माययाममकिंकार्यंवदविष्णोयथातथं ॥ केना
प्युपायेनफलंहिसाध्यमित्युच्यतेपंडितैर्न्यायविद्भिः ॥ ५० ॥ तस्मात्त्वैवगम्यतांशीघ्रमेवकार्यार्थिभिश्चेंद्रपुरो
गमैश्च ॥ सदाशिवोमहात्माचमदनेनाविवर्जितः ॥ ५१ ॥ भस्मीभूतेनचतदात्वन्येषांकाकथाद्विजाः ॥ ए
वंविवदमानोसौरुद्रःशंभुरभूत्तदा ॥ ५२ ॥ कृतोह्यनंगेनसितोयथान्यःप्राकृतोजनः ॥ मदनेनबली
लोकोयेनसर्वमिदंजगत् ॥ ५३ ॥ जितमस्तिचप्रौढंचसदेवर्षिसमन्वितं ॥ सर्वेषामेवभूतानांदेवानांचवि
शेषतः ॥ ५४ ॥ राजात्वनंगोबलवान्यस्यचाज्ञाबलीयसी ॥ वर्ततेस्त्रीस्वरूपेणअजेयोभुवनत्रये ॥ ५५ ॥
तस्याज्ञामृषयःसर्वेमुनयोपिविचक्षणाः ॥ देवामनुष्यगंधर्वाःपिशाचोरगराक्षसाः ५६ नलंघयंतिसर्वेपिमद
नस्यमहात्मनः ॥ तपोबलेनमहतातथादानव्रतेनच ॥ ५७ ॥ अशक्योमदनोजेतुंविनयेनविनाद्विजाः ॥ तस्मा
दनंगस्यसखाक्रोधस्तुबलवत्तरः ॥ ५८ ॥ ईश्वरोमदनेनैवमोहितंवीक्ष्यमाधवः ॥ उवाचवाक्यंवाक्यं
शोमाचिंतांकुरुवैप्रभो ॥ ५९ ॥ यदुक्तंनारदेनैवमंटपंप्रतिसर्वशः ॥ त्वष्ट्राकृतंविचित्रंचतत्सर्वमवदत्प्र
भुः ॥ ६० ॥ तच्छ्रुत्वाशंकरंवाक्यंबभाषेमधुसूदनं ॥ अविघ्यार्थंतत्स्तेनकृतस्त्वष्ट्राहिमंटपः ॥ ६१ ॥ किंतु
वक्ष्यामहेविघ्नामंटपंकेवलेनहि ॥ विवाहोहिमहाभागअविघ्यामूलमेवच ॥ ६२ ॥ तस्मात्त्वंनैवयंत्वा

नाकसत्यपर्वताः॥३३॥कन्यांदास्यतिवाशंभोःकिंत्विनिदानींप्रवर्तते॥ततःप्राहमहातेजाःनारदोऋषिसत्तमः॥३४॥ब्रह्मा
णंपुरतःकृत्वाविष्णुंप्रतिसहेतुकं॥एकांतमाश्रित्यचवज्रपाणिंसनारदोवाक्यमिदंबभाषे॥३५॥त्वष्ट्राकृतंयज्ञम
हत्तरंवैयेनैवसर्वंभवतांचविमोहएव॥पुराकृतंतस्यमहात्मनात्वयाकिंविस्मृतंतत्सकलंशचीपते॥३६॥तस्मा
दसौत्वांविजिगीषुःकामोऽत्रहैवसंस्तस्यगिरेर्महात्मनः॥अहंविमोहितस्तेस्यनविचित्रेणैवकर्मणा॥३७॥ऐ
रावतःकृतस्तत्रअप्सरयेस्तथैवच॥प्रतिमाश्चैवदेवानांसमस्ताःकृतवाक्त्वयं॥३८॥मोहनार्थंचदेवानांका
र्यसिध्यर्थं॥तच्छ्रुत्वावचनंतस्यदेवेंद्रोवाक्यमब्रवीत्॥३९॥विष्णुंप्रतितदाशीघ्रंत्वष्टामांनिहर्षयति॥पुत्रशोकेन सर्वेपां
तप्तोसौव्याजेनानेननान्यथा॥४०॥तस्यतद्वचनंश्रुत्वादेवदेवोजनार्दनः॥उवाचप्रहसन्वाक्यंशक्रमाश्वा नि
स्यवैतदा॥निवातकवचैःसर्वैर्मोहितोसिशचीपते॥महाविद्यास्मृतातत्रमहादैत्योपशांतये॥४२॥महाविद्याबलेनैव
प्रवेश्योमंटपोधुना॥पर्वतोहिमवानेषस्तथान्येपर्वतोत्तमाः॥४३॥विपक्षाहिकृताःसर्वैर्ममतत्वाद्भवासव॥ते
विस्मृत्यालुर्वैदुष्टामाययागिरयोत्यमी॥४४॥जयमिच्छंतिवैमूढाःनचभेतव्यमण्वपि॥एवंविवदमानांस्तान्
देवान्शक्रपुरोगमान्॥उवाचसत्वरंशंभुःपरिम्लानेनचेतसा॥किंनुवक्तिमहाशैलोयथार्थंवदनारद॥४६
ददातिवानददातिगिरींद्रःकन्यांवैस्वांकथ्यतांशीघ्रमेव॥किंतेदृष्टंकिंकृतंचाद्ययचुतत्तत्सर्वंवदभोनारदर्षे॥४७
तथोक्तःशंभुनातत्रनारदोदिव्यदर्शनः॥उवाचसर्वंरहसियद्दृष्टंतस्यमंटपे॥४८॥तच्छ्रुत्वाप्रहसन्शंभुरुवाच

मउद्वाहार्थं च संप्रति ॥ नारदं च पुरस्कृत्य सर्वे देवाः सवासवाः ॥ ६३ ॥ हिमाद्रिं च तदा जग्मुर्मंदिरं परमाद्भुतं ॥
अनेकाश्चर्यसंवीतं निर्मितं विश्वकर्मणा ॥ ६४ ॥ कृतं च तेनाथ पवित्रमुत्तमं तं यज्ञवाटं बहुभिः पुरस्कृतं ॥ तं
वक्ष्यमाणं बहुधा प्रकल्पितं मामेयायं भूरितरेण चक्षुषा ॥ ६५ ॥ विचित्रचित्रं मनसा दुरंततं तं यज्ञवाटं स चका
र बुद्धिमान् ॥ प्रवेक्ष्यमाणास्ते सर्वे सुरेंद्र ऋषिभिः सह ॥ ६६ ॥ हिमाद्रिश्च ततो दृष्ट्वा अभ्युत्थानपरोभव
त् ॥ तथैव तेषां च मनोहराणि समर्पितान्येव तदासनानि ॥ ६७ ॥ महाप्रमाण्येव च गंधधूपतांबूलपाद्यार्घ्यमया
नि चैव ॥ गंधर्वयक्षासुरसिद्धभूतास्तथा च सर्वे प्रमथादयोत्यमी ॥ ६८ ॥ वसंति यत्रैव सखानि यत्र स
तत्र तत्रोपवसं चकार ॥ तेषामर्थे महार्हाणि धारायंत्रगृहाणि च ॥ ६९ ॥ अत्यद्भुतानि शोभंते कृतान्येवं म
हात्मना ॥ एवं विस्मरयामास विश्वकर्मा बहून्यपि ॥ ७० ॥ मंदिराणि यथाजोषं यत्र तत्रैव तिष्ठतां ॥ निवासार्थं
कल्पितानि सावकाशानि तत्र वै ॥ ७१ ॥ देवानां चैव सर्वेषामृषीणां भावितात्मनां ॥ भैरवक्षेत्रपालाश्च
ये चान्ये क्षेत्रवासिनः ॥ ७२ ॥ श्मशानवासिनश्चैवान्ये ये च न्यग्रोधवासिनः ॥ अश्वत्थवासिनश्चा
न्ये खेचराश्च तथापरे ॥ ७३ ॥ ये तत्रोपविष्टाश्च तत्र तत्रैव ते न वै ॥ कृतानि च मनोज्ञानि भवनानि महां
ति च ॥ ७४ ॥ तेषामेवानुशंसीनि भूतानां विश्वकर्मणा ॥ तत्रैव ते सर्वगणैः समेता निवासितास्तेन हिमा

स्कंद० केदा०

द्रिणात्यमी॥ सेंद्राःसुरायक्षपिशाचदानवाः गंधर्वाःसिद्धाप्सरसांसमूहाः॥ ८५॥ इतिश्रीस्कंदपुराणेकेदारखं
डेशैवशास्त्रेत्रयोविंशोध्यायः॥ श्री॥ लोमश उवाच॥ तत्रोपविष्टविश्वःसर्वेसत्कृताश्चहिमाद्रिणा॥ तत्रैवचमहा
चित्रंनिर्मितंविश्वकर्मणा॥ १॥ दीक्षापरमयायुक्तंनिवासार्थंस्वयंभुवः॥ तथैवविष्णोस्त्वपरंनिर्मितंस्वयमे
वच॥ २॥ भास्वरंचविचित्रंचनानाश्चर्यसमन्वितं॥ त्वष्टाविज्ञाननिपुणश्चकारपरमाद्भुतं॥ ३॥ चंडीगृहं
मनोज्ञंचतथैवकृतवान्स्वयं॥ तथैवचित्रपरमंमनोज्ञंमहाप्रभंदेववरैःसुपूजितं॥ ४॥ कैलासलक्षणयुतं
प्रभयातिशोभतेनाग्निर्नसूर्योनशशीनचान्यः॥ गृहाश्चसर्वेचतथाविभांतितत्रैवशंभुश्चतदानिविशि
तः॥ ५॥ बभौतदानींभुवनैकभर्ताविश्वेश्वरोवेदविदांवरिष्ठः॥ विशेषवाद्यैःपरिपूज्यमानोहिमाद्रि
णाज्ञानवतातदानीं॥ ६॥ एतस्मिन्नंतरेमेनासमायातासखीजनैः॥ नीराजनार्थंशंभोश्चऋषिपत्नीभि
रवृता॥ ७॥ नीराजनंकृतवतीमेनकाचतपस्विनी॥ अवलोक्यपरासाध्वीमेनजामातरंप्रति॥ ८॥
गिरिजोक्तिमनुस्मृत्यमेनाविस्मयमागता॥ यद्देवपुरोक्तंचतयापार्वत्यामममतत्रवै॥ ९॥ ततोधिकंप्रपश्या
मिसौंदर्यंपरमेष्ठिनः॥ महेशस्यमयादृष्टमनिर्वाच्यंचसंप्रति॥ १०॥ एवंविस्मयमापन्नामेनाख्यास्वगृहंययौ
मंगलस्नापितागौरीतल्लिंगोपरिसंस्थिता॥ ११॥ नीराजितासखीभिश्चविप्रपत्नीभिरेवच॥ अहतांबरयु
ग्मेनशोभितावरवर्णिनी॥ १२॥ कंचुकीपरमादिव्यानानारत्नैश्चशोभिता॥ अंगीकृतातयादेव्याहारराजपरमाश्रिया १३

२३-अ.रामा

सावभारतदादिव्यंहारंरत्नविभूषितं॥ वलयानिमहार्हाणि शुभ्रचामीकराणिच॥३४॥स्थितातत्रैवस अ२४ प्र·
न्नगाध्यायंतीचसदाशिवं॥सखीभिःसेव्यमानाचविप्रपत्नीभिरेवच॥३५॥एतस्मिन्नंतरेतत्रगर्गो
वाक्यमभाषत॥पाणिग्रहार्थंशंभुंचआनयध्वंस्वमंदिरं॥३६॥भोपर्वताःस्ववेलायामस्यामेवविच
क्षणाः॥तच्छ्रुत्वावचनंतस्यगर्गस्यचमहात्मनः॥३७॥अभ्युत्थानपराःसर्वेपर्वताःसकलत्रकाः॥
महाविभूत्यासंस्कार्सर्वमंगलपाणयः॥३८॥सालंकृतास्तथातेषांपत्न्योलंकरणान्विताः॥उपायनान्यनेका
नि आजह्रुःस्निग्धलोचनाः॥३९॥तदावादित्रघोषेणभूयसाचैवसंवृताः॥आजग्मुःसकलत्रास्तेयत्रदे
वोमहेश्वरः॥२०॥प्रथमैरावृतस्तत्रभृंडयाचैवाभिसेवितः॥तथामहर्षिभिःसर्वैर्देवदेवगणैस्तथा॥२१
एभिःपरिवृतःश्रीमान्शंकरोलोकशंकरः॥शुश्रावावादित्रनिर्घोषंसर्वेशंकरसेवकाः॥२२॥उत्थि
ताश्चैकपद्येनदेवैश्चऋषिभिरावृताः॥तत्रोत्थितोयोगिनीचक्रयुक्तोगणोगणानांपरमेणवर्चसा॥२३
शिवंपुरस्कृत्यमहानुभावंतथैवसर्वेगणनायकाश्च॥तद्योगिनीचक्रंप्रहस्यचंडंढक्काभेरीरव
निःस्वनेन॥चंडीपुरस्कृत्यमहानुभावंमहाविभूत्यासमलंकृतंहि॥कंठेकर्कोटकंनागंहारभूतंचकार
सा॥२५॥पदकंवृश्चिकानांचदंदशूकाश्चितंमहत्॥कर्णावतंसौतस्यास्तांपाणिपादमयौतदा॥२६॥रणेहता

ता

स्कंद० केदा० नांवीराणांशिरांसिचबद्धानिवै ॥ भूषणार्थंकृतान्येवाशिरस्युरसिचापवान् ॥ २६ ॥ द्वीपिचर्मावृताचंडी॰ अ. २५
योगिनीचक्रसंयुता ॥ क्षेत्रपालयुतातद्वद्भैरवैःपरिवारिता ॥ २८ ॥ तथाप्रेतैश्चभूतैश्चकर्पटैःप
परिवारिता ॥ वीरभद्रादयश्चैवगणाःपरमदारुणाः ॥ २९ ॥ येदक्षयज्ञनाशार्थंशिवेनोत्पादिताःपु
रा ॥ तथाकालीभैरवीचत्धार्याचैवभवापहा ॥ ३० ॥ त्रिपुराचजयाचैवतथाक्षेमकरीशुभा ॥ अन्या
श्चैवतथासर्वाःपुरस्कृत्यसदाशिवं ॥ ३१ ॥ गंतुकामाश्चागतावैभूतैःप्रेतैःसमावृताः ॥ एताःसर्वावि
लोक्याहशिवभक्तोजनार्दनः ॥ ३२ ॥ महर्षीश्चपुरस्कृत्यस्फरांश्चैवतथैवहि ॥ अनसूयांतथांसा
ध्वींतथैवारुंधतींसतीं ॥ ३३ ॥ लोपामुद्रांतथाशंभोसावित्र्यासहस्वप्रभां ॥ इंद्रंकुरुसमीपस्थंलो
कपालावृतंसदा ॥ ३४ ॥ तदुक्तंविष्णुनावाक्यंनिशम्यजगदीश्वरः ॥ उवाचप्रहसन्नेवचंडीप्र
तितदाभवः ॥ ३५ ॥ अत्रैवस्थीयतांतावद्यावद्दुहनंभवेत् ॥ ममभावान्नविजानासिकार्या
कार्यंस्वशोभने ॥ ३६ ॥ एवमाकर्ण्यवचनंशंभोरमिततेजसः ॥ उवाचकुपिताचंडीविष्णुमु
द्दिश्यसादरं ॥ ३७ ॥ तथान्येप्रमथाःसर्वेविष्णुमूचुःप्रकोपिताः ॥ यत्रयत्रशिवोभातितत्रत

अ.२६

त्रवयंप्रभो॥३८॥त्वयानिवारिताः कस्माद्वयमाभ्युदयिकेपरे॥ तेषांतद्वचनंश्रुत्वाकेशवोवाक्य
मब्रवीत्॥३९॥ चंडीमुद्दिश्यप्रमथानन्यांश्चैवतथाविधान्॥ यूयंचैवमयोक्तास्तमाकोपंकर्तु
मर्हथ॥४०॥ एवमुक्तास्तदातेनचंडीमुख्यागणास्ततः॥ एकांतमाश्रिताः सर्वेविष्णुवाक्या
च्चरंतिन॥४१॥ तावत्सर्वेसमायाताः पर्वतस्यचमंत्रिणः॥ सकलत्राः संभ्रमेणमहेशंप्रतिस
त्वरं॥४२॥ पंचवाद्यप्रघोषेणब्रह्मघोषेणभूयसा॥ प्राप्तास्तत्रयतः शंभुः सकलैः परिवारितः॥
४३॥ आगत्यसकलैः साकमभिषेकार्थमेवच॥ स्नानंकृतंतदातेनमंगलैः सहशूलिना॥४४॥
स्नातः शुक्लवाससायुक्तः सर्वैः स्वैः परिवारितः॥ आरोपितोगजस्कंधेलोकपालैः प्रपूजितः॥४५॥
ऋषयोदेवगंधर्वास्तथान्येपर्वतोत्तमाः॥ शंभ्वग्रगास्तदाजग्मुर्गजस्कंधगतस्यच॥४६॥ ब
भौछत्रेणमहताध्रियमाणेनमूर्धनि॥ चामरैर्वीज्यमानोसौवितानेनविराजितः॥४७॥ ब्रह्मा

स्कंद० केदार० विष्णुस्तथाचेंद्रोलोकपालास्तथैवच ॥ अग्रगाद्यपिशोभंतेश्रियापरमयायुताः ॥ ४८ ॥ ततशंखाश्च
भेर्यश्चपटहानकगोमुखाः ॥ तथैवगायकाः सर्वेजग्मुः परममंगलं ॥ ४९ ॥ पुनः पुनरवाद्यंतवादित्रा
णिमहोत्सवे ॥ अरुंधतीमहाभागाअनुसूयातथैवच ॥ ५० ॥ सावित्रीचतथालक्ष्मीर्मातृभिःपरि
वारिता ॥ एभिःसमेताजगदेकनाथोबभौतदानींपरमेणवर्चसा ॥ ५१ ॥ सचंद्रसूर्यानलवायु
संयुतःसलोकपालैःप्रवरैर्महर्षिभिः ॥ संवीज्यमानःपवनेनसाक्षीछत्रंचतस्मैशशिनाप्यधि
ष्ठितं ॥ ५२ ॥ सूर्यःपुरस्तात्प्रतपन्स्वतेजसाहरिस्तदासीत्सचवेत्रपाणिः ॥ एवंतदादेवगणाःसप
र्वताःशंभोःपुरस्तादभवन्श्रियान्विताः ॥ पुष्पैर्ववर्षुःपरिकीर्यमाणादेवास्तदानींऋषिभिःसमे
ताः ॥ ययौगृहंकांचनपट्टियमर्हं अहाविभूत्यापरिशोभितंतदा ॥ ५४ ॥ विवेशशंभुःपरया
सपर्ययासंपूज्यमानोनरदेवदानवैः ॥ संपूजितस्तदाशंभुः प्रविष्टोयज्ञमंडपं ॥ संस्तूयमानोबहु
भिःस्तुतिभिःपरमेश्वरः ॥ गजादुत्तारयामासमहेशंपर्वतोत्तमः ॥ ५६ ॥ उपवेश्यतदापीनेरु

भातेजगन्मयो॥६७॥त्रैलोक्यलक्ष्म्यासंवीतोनिरीक्षंतोपरस्परं॥तदानीराजितोलक्ष्म्यासावित्र्याचवि
शेषतः॥६८॥अरुंधत्यातथातोन्चदंपतीपरमेश्वरौ॥अनसूयातदाचक्रेशंभुनीराजनाविधिं॥६९
सर्वाःशंभुंचपश्यंत्यस्तथैवमुदिताहिताः॥लोमशउवाच॥एतस्मिन्नंतरेतत्रगर्गाचार्यप्रणो
दितः॥७०॥हिमवान्मेनयासार्धंकन्यांदातुंप्रचक्रमे॥हेमंकलशमादायमेनाचार्धांगमा
श्रिता॥७१॥हिमाद्रेश्चमहाभागासर्वाभरणभूषिता॥तदाहिमाद्रिणाप्रोक्तोविश्वनाथोवर
प्रदः॥७२॥ब्रह्मणासहसंगत्यविष्णुनाचतथैवच॥तथापुरोधसासार्धंगर्गेणचमहात्मना॥७३
कन्यादानंकरोम्यद्यदेवदेवायशूलिने॥प्रयोगोभण्यतांब्रह्मन्अस्मिन्समयआगते॥७४॥
तथेतिमत्वातेसर्वेकालज्ञाद्विजसत्तमाः॥तिथ्यादिकीर्तनंचक्रुर्हिमवान्शंभुमब्रवीत्॥हिम
वानुवाच॥स्वगोत्रंकथ्यतांतातकुलंचैवविशेषतः॥कथयस्वमहाभागइत्याकर्ण्यवचस्तदा॥७६

स्मुखोविमुखःसद्यःआशोच्यःशोच्यतांगतः॥एवंविधःसुरवरैर्ऋषिभिस्तदानींगंधर्वयक्षसुर
रसिद्धगणैस्तथैव॥७७॥दृष्टोनिरुत्तरमुखोभगवान्महेशोहास्यंचकारसुचशंतथनारदश्च
वीणांप्रवादयामासब्रह्मपुत्रोथनारदः॥७८॥तदानिवारितोधीमान्वीणामावादयप्रभो॥अ
स्यगोत्रंकुलंचैवनादएवपरंगिरे॥८०॥कुलीशोऽकुलिनोयोयमगोत्राणांपरागतिः॥नादेप्र
तिष्ठतःशंभुर्नादोत्यस्मिन्प्रतिष्ठितिः॥८१॥अस्यगोत्रंकुलंनामनजानंतिहिपर्वतः॥ब्र
व ह्मविष्ण्वादयोप्येतेत्यन्येषांचैवकाकथा॥८२॥त्वंहिमूढत्वमापन्नोजानासिहिनकिंचन॥
वाच्यवाच्येमहेशस्यविषयेहिवहिर्मुखाः॥८३॥येये आगामिकाश्चान्येनष्टास्तेनात्रसंशयः
अरूपोयंविरूपाक्षअकुलीनश्चरुच्यते॥८४॥अगोत्रोयंगिरिश्रेष्ठजामातातेनसंशयः॥

भातेजगन्मयो ॥ ६७ ॥ त्रैलोक्यलक्ष्म्यासंवीतोनिरीक्षंतौपरस्परं ॥ तदानीराजितोलक्ष्म्यासावित्र्याचवि
शेषतः ॥ ६८ ॥ अरुंधत्यातथातौन्वदंपती परमेश्वरौ ॥ अनसूयातदाचक्रे शंभुनीराजनाविधिं ॥ ६९
सर्वाः शंभुंचपश्यंत्यस्तथैवमुदिताहिताः ॥ लोमशउवाच ॥ एतस्मिन्नंतरेतत्रगर्गाचार्यप्रणो
दितः ॥ ७० ॥ हिमवान्मेनयासार्धंकन्यांदातुंप्रचक्रमे ॥ हेमंकलशमादायमेनाचार्धांगमा
श्रिता ॥ ७१ ॥ हिमाद्रेश्चमहाभागासर्वाभरणभूषिता ॥ तदाहिमाद्रिणाप्रोक्तोविश्वनाथोवर
प्रदः ॥ ७२ ॥ ब्रह्मणासहसंगत्यविष्णुनाचतथैवच ॥ तथापुरोधसासार्धंगर्गेणचमहात्मना ॥ ७३
कन्यादानंकरोम्यद्यदेवदेवायशूलिने ॥ प्रयोगोभण्यतांब्रह्मन्नस्मिन्समयआगते ॥ ७४ ॥
तथेतिमत्वातेसर्वेकालज्ञाद्विजसत्तमाः ॥ तिथ्यादिकीर्तनंचक्रुर्हिमवान्शंभुमब्रवीत् ॥ हिम
वानुवाच ॥ स्वगोत्रंकथ्यतांतातकुलंचैवविशेषतः ॥ कथयस्वमहाभागइत्याकर्ण्यवचस्तदा ॥ ७६

सुमुखोविमुखःसद्यः आशोच्यः शोच्यतांगतः ॥ एवंविधः सुरवरैर्ऋषिभिस्तदानींगंधर्वयक्षसुर-
रसिद्धगणैस्तथैव ॥ ७७ ॥ दृष्टोनिरुत्तरमुखोभगवान्महेशोहास्यंचकारसुचशंतथनारदश्च
वीणांप्रवादयामासब्रह्मपुत्रोथनारदः ॥ ७८ ॥ तदानिवारितोधीमान्वीणांमावादयप्रभो ॥ अ
स्यगोत्रंकुलंचैवनादएवपरंगिरे ॥ ८० ॥ कुलीशोऽकुलिनोयोयमगोत्राणांपरागतिः ॥ नादेप्र
तिष्ठतःशंभुर्नादोत्यस्मिन्प्रतिष्ठितिः ॥ ८१ ॥ अस्यगोत्रंकुलंनामनजानंतिहिपर्वतः ॥ ब्र
व ह्मविष्ण्वादयोप्येतेत्यन्येषांचैवकाकथा ॥ ८२ ॥ त्वंहिमूढत्वमापन्नोजानासिहिनकिंचन ॥
वाच्यवाच्यंमहेशस्यविषयेहिवहिर्मुखाः ॥ ८३ ॥ येये आगामिकाश्चान्येनष्टास्तेनात्रसंशयः
अरूपोयंविरूपाक्षअकुलीनश्चरुच्यते ॥ ८४ ॥ अगोत्रोयंगिरिश्रेष्ठजामातातेनसंशयः ॥

नकर्तव्योविमर्शोत्रजामाताविबुधेनहि॥ ८५॥ नजानंतिहरंसर्वेकिंबहुत्वस्याममप्रभो॥ यंचैवहिमहा
मायमोहिताऋषयोत्तमाः॥ ८६॥ ब्रह्माद्यपिनजानातिमस्तकंपरमेष्ठिनः॥ विष्णुर्गतोहिपाता
लंनदृष्टंविष्णुनात्वधमः॥ ८७॥ तेनलिंगेनमहतात्वगाधेनजगत्त्रयं॥ व्याप्तमासीच्चतादृशि
किमनेनप्रयोजनं॥ ८८॥ अनयाराधितःशंभुस्त्वपुत्र्याहिमालय॥ तत्वतोहिनजानाति
केयंचैवमहागिरे॥ ८९॥ एताभ्यामुद्यतंविश्वमाभ्यांचैवप्रतिष्ठितं॥ एतच्छ्रुत्वावचस्तस्यना
रदस्यमहात्मनः॥ ९०॥ हिमाद्रिप्रमुखास्सर्वेतथाचेंद्रपुरोगमाः॥ साधुसाध्वितितेसर्वेब्रु
वुर्विस्मयमागमाः॥ ९१॥ ईश्वरस्यचगांभीर्यंज्ञात्वासर्वेविचक्षणाः॥ विस्मयेनसमावि
ष्टाऊचुःसर्वेपरस्परं॥ ९२॥ ऋषयऊचुः॥ यस्याज्ञयाजगदिदंचविशालमेवजातंपरात्परत
रंनिजबोधरूपं॥ सर्वेस्वतंत्रपरमेश्वरभावगम्यंसोसौत्रिलोकनिजरूपवतांमहात्मा॥ ९३॥ रु

तानीराजनंमहत्॥ मेनयासखिभिःसार्धंतथैवचपुरोधसा॥ ५७॥ मधुपर्कादिकंसर्वंयत्कृत्यंचैवतत्रवै॥ ब्र
ह्मणानोदितस्तत्रपुरोधाकृतवान्प्रभुः॥ ५८॥ मंगलंशुभकल्याणंप्रस्तावसदृशंप्रभुः॥ अंतर्वेद्यांसंप्रवि
श्ययत्रसापार्वतीस्थिता॥ वेदिकोपरिचार्वंगीसर्वाभरणभूषिता॥ तत्रानीतोहरःसाक्षाद्विष्णुनाब्रह्म
णासह॥ ६०॥ लग्नंनिरीक्ष्यमाणास्तेवाचस्पतिपुरोगमाः॥ गर्गःप्रविष्टस्तत्रैवयत्रतद्घटिकालयं॥ ६१
यावत्पूर्णाघटीजातातावत्प्रणवभाषणात्॥ ओंपुण्येत्यवदत्गर्गःसमादधेंजलिं॥ ६२॥ पार्वत्यक्ष
तपूर्णंचववर्षनशिवोपरि॥ तयासंपूजितोरुद्रःअक्षतैश्चकुशादिकैः॥ ६३॥ मुदापरमयायुक्तापा
र्वतीरुचिरानना॥ विलोकयंतीतंशंभुंयस्यार्थेपरमंतपः॥ ६४॥ पुराकृतंमहादेव्यापरेषांपरमंमह
त्॥ तपसातेनसंप्राप्ताशंभुंसर्वेश्वरंप्रभुं॥ ६५॥ नारदेनतदोक्तस्तुमहादेवोवृषध्वजः॥ तथागर्गादि
भिःश्लाघ्यैर्मुनिभिःसनकादिभिः॥ ६६॥ एवंपरस्परंतेवैपार्वतीपरमेश्वरौ॥ अर्च्यमानौतदानींतु रु रु

तिश्रीस्कंदपुराणेकेदारखंडेशैवशास्त्रेचतुर्विंशतितमोध्यायः॥ लोमशउवाच॥ अथतेपर्वतश्रेष्ठा अ॰२४ समा.
मेर्वाद्याजातसंभ्रमाः॥ ऊचुस्तेत्वेकपद्येनहिमवंतंमहागिरिं॥१॥ पर्वताऊचुः॥ कन्यादानंक्रियते
चाद्यशैलकिंबहूक्त्याकार्यंनाशस्तथैव॥ भविष्यतिनात्रकार्योविमर्शोतस्माद्देयादीयतामीश्वरा
य॥२॥ तच्छ्रुत्वावचनंतेषांसत्वरंसहिमालयः॥ कन्यायादानमकरोद्ब्रह्मणानोदितस्तदा॥३॥
इमांकन्यांतुभ्यमहंददामिपरमेश्वर॥ भार्यार्थंप्रतिगृह्णीष्वइत्युक्त्वामंत्रेणदत्तवान्॥४॥ तस्मै
रुद्रायमहतेवेदवेद्यायशंभवे॥ परेशायमहेशायदत्ताकन्यामहात्मने॥५॥ वेदिकाबहिरानी
तौदंपतीकमलेक्षणौ॥ उपविष्टौतुबहिर्वेद्यांपार्वतीपरमेश्वरौ॥६॥ आचार्येणाथतत्रैवक
श्यपेनमहात्मना॥ आधानंहवनार्थायकृतमग्नेस्तदाद्विजाः॥७॥ ब्रह्माब्रह्मासनरतोबभौतु अ॰२५ प्रारं.
शिवसन्निधौ॥ प्रवर्तमानेहवनेऋषयश्चविचक्षणाः॥८॥ ऊचुःपरस्परंतत्रनानादर्शनविदि
नः॥ वेदवादरताःकेचिदब्रुवन्नसंमतेनहि॥९॥ इदमेवनचाप्येवंमेवमेवंनचान्यथा॥ कार्यमेव

स्कंद॰केदार॰ अ. २५

नकार्यंचकार्याकार्यमथापरे॥३०॥इत्येवंब्रुवतांशब्दःश्रूयतेशिवसन्निधौ॥स्वकीयंमतमास्थायविवदंतः
परस्परं॥३१॥तत्त्वज्ञानविहीनास्तेकेवलंवादबुद्धयः॥तेषांतद्वचनंश्रुत्वापरस्परजयैषिणां॥३२॥प्रह
स्यनारदोवाक्यमुवाचशिवसन्निधौ॥यूयंसर्वेवादिनश्चमिथ्यावादरताश्चवै॥३३॥मौनमाश्रित्यभोवि
प्राआगतात्हृदिसत्कृतं॥सदाशिवंचआत्मानंपरमात्मानंपरंचयत्॥३४॥येनेदंकारितंविश्वंयतःसर्वंप्र
वर्तते॥यस्मिन्विलीयतेसर्वंतस्मैसर्वात्मनेनमः॥३५॥सोयमास्तेधुनागेहेपर्वतेंद्रस्यभोद्विजाः॥सुखा
दस्यचसंजातायूयंसर्वेविचक्षणाः॥३६॥एवमेवतदातेननारदेनद्विजोत्तमाः॥उपदेशपरैर्वाक्यैर्बो
धितास्तेनवैद्विजाः॥३७॥होमेप्रवर्तमानेतुब्रह्मलोकपितामहः॥ददर्शचरणेदेव्याःनखेंदुंसुमनोह
रं॥३८॥दर्शनाद्विमानाःसद्योबभूवांबुजसंभवः॥मदनेनसमाविष्टोवीर्यंप्रत्यपतत्क्षवि॥३९॥रेतसा
क्षरमाणेनलज्जितोभूत्पितामहः॥चरणाभ्यांममर्दाथतद्गोप्यंदुरत्ययं॥४०॥बहवोऋषयोजाता
वालखिल्याःसहस्रशः॥उपतस्थुस्तदासर्वेतातनाथेतिचाब्रुवन्॥४१॥नारदेनतथाचोक्ताःको
पयुक्तेनभोद्विजाः॥गच्छध्वंसंगतायूयंपर्वतंगंधमादनं॥४२॥नस्थातव्यंभवद्भिश्चनात्रचास्तिप्र

खादयः॥ शाकिनीडाकिनीचैवयक्षिण्योमातृकादयः॥३४॥ योगिन्योथ चतुःषष्टियोगिनोहितथापरे॥द
शकोट्योगणानांहिकोट्येकाचमहात्मनां॥३५॥ बहवोत्रऋषयोश्चैवतथान्येविबुधादयः॥ योगिनोहिम
याचान्येकथिताःपूर्वमेवहि॥३६॥ योगिन्यश्चैवकथितास्तासांभक्ष्यंवदामिवः॥ भैरवेयेमद्यमांसानि
पशूनांविविधानिच॥३७॥ माहिषंचैववाराहंखाड्गंवैगावयंतथा॥ मांसंमाजंचरेणंचतथान्यानिब
हूनिच॥३८॥ मलमुत्सृज्यभक्षार्थंवन्यंपतितमेवच॥ प्रभुंजंत्यस्थिसंलिप्तमांसान्त्राणिबुभुक्षवः॥
३९॥ आंत्राणिकेचिच्छीर्षाणिमहिषाणामुरूणिच॥ तथाकेचिन्नृत्यमानास्तदानींशब्दायमानाःप्रम
थाश्चतत्र॥४०॥ केचित्तूष्णीमास्थितारुद्ररूपाःसौम्याश्चान्येवल्गमानास्तथैव॥ योगिनीचक्रम
ध्यस्थोभैरवोहिननर्दच॥४१॥ तथान्येभूतवेतालामत्ताःस्वैरप्रलापिनः॥ एवंतेषांप्रमोदंवैनिरीक्ष्य
मधुसूदनः॥४२ उवाचप्रहसन्वाक्यंशंकरंलोकशंकरं॥ एतान्निवारयभोशंभोप्रमत्तांश्चैवसंप्रति॥
यस्मिन्कालेचयत्कार्यंतत्सर्वंकार्यमेवहि॥ रुद्रउवाच॥ वारयस्वप्रमत्तांश्चभोमांश्चैनविशेषतः॥४३॥

तेनोक्तोहिमहावीरोवीरभद्रोऽतिकोपनः॥ आज्ञयावारयामासशासनात्परमेष्ठिनः॥४५॥ प्रमथाःवारिता
स्तेनतदानीमेवसंस्थिताः॥ निश्चलायोगिनीभूतप्रमथागुह्यकाः॥४६॥ शाकिन्योयातुधानाश्चकूश्मा
ण्डराक्षसैःसह॥ तथान्येभूतवेतालाःक्षेत्रपालाःसभैरवाः॥४७॥ सर्वेशांताःक्रमप्राप्ताबभूवुःप्रमथाद
यः॥ एवंतेभोजनंकृत्वासंतुष्टाहृष्टमानसाः॥४८॥ विश्रामार्थंगताःसर्वेब्रह्माद्यास्तेस्वमालयं॥ एव
मुत्सवसंयुक्तंकृतमुद्वाहनंतदा॥४९॥ हिमाद्रिणापरंविप्राःक्रमंगत्यंस्कशोभनं॥ चत्वारोदिवसा
जाताःपरिपूर्णेनचेतसा॥५०॥ हिमाद्रिणाकृतापूजादेवदेवस्यशूलिनः॥ वस्त्रालंकरणैःशुभ्रैःशु
भ्रैरुद्यावर्चैस्तदा॥५१॥ पूजयित्वामहादेवंविष्ण्वर्चनपरोभवत्॥ लक्ष्म्यासमेतंविष्णुंचवस्त्रालं
कारभूषणैः॥५२॥ पूजयामासहिमवांस्तदाब्रह्माणमेवच॥ इंद्रंपुरोधसासार्धंद्रोण्याचविचक्षणः
॥५३॥ तथैवलोकपालांश्चपृथक्पृथक्पूजयत्॥ स्कपूजितास्तदाचंडीभूतप्रमथगुह्यकाः॥५४॥ व
स्त्रालंकरणैश्चैवरत्नैर्नानाविधैस्तदा॥ येचान्येआगतास्तत्रतेसर्वेचयथाविधि॥५५॥ एवंतदानीप
र्याविभूत्याप्रपूजिताभूमिभृत्तांवरेण॥ गंधर्वयक्षाःकरसिद्धसंघास्तथैवसर्वेप्सरसांचसंघाः॥५६॥ ए

स्कंद० केदा० तिश्रीस्कंदपुराणेकेदारखंडेशैवशास्त्रेपंचविंशतितमोध्यायः॥२५॥लोमशउवाच॥तथैवविष्णुनासर्वेप अ० २५ समा०
र्वताश्चप्रपूजिताः॥सह्याचलोथविंध्यश्चमैनाकोगंधमादनः॥१॥माल्यवान्मलयश्चैवमहेंद्रोमंदराचलः
मेरुश्चैवप्रयत्नेनपूजितोविष्णुनास्वयं॥२॥श्वेतकूटःश्वेतगिरिर्नीलाद्रिश्चतथैवच॥उदयाद्रिस्त
द्रिश्चत्वस्तंगिवरोमहान्॥३॥मासाद्रिश्चतथाद्रिश्चकैलासःपर्वतोमहान्॥लोकालोकस्तथा
शैलःपूजितःपरमेष्ठिना॥४॥एवंतेपर्वतश्रेष्ठाःपूजिताःसर्वएवहि॥तथान्येपूजितास्तेनसर्वे
पर्वतवासिनः॥५॥विष्णुनाब्रह्मणासार्धंकृतंसर्वंयथोचितं॥अन्येहनिचसंप्राप्तेवरयात्राकृ
तातथा॥६॥अद्रिणाबंधुभिःसार्धंपर्वतंगंधमादनं॥ययुःसर्वेऋषिगणाःसुराश्चैवसहस्र
शः॥७॥प्रमथाश्चतथासर्वेचंडीयाद्यगणाःपरे॥येन्येहिबहवस्तत्रसमायाताहिमालयं॥
॥८॥शिवस्योद्वहनेविप्राःशिवेनपरिभाविना॥परंहर्षसमापन्नाद्दृष्ट्वातौदंपतीतदा॥९॥पा
र्वतीसहितांशंभुंशंभुनासहपार्वती॥सम्यग्युक्तौयथास्यातांवागर्थाविवतत्वतः॥१०॥तथा

२८

योजनं॥स्त्वेवमुक्तास्तेसर्वेवालखिल्याश्चपर्वतं॥२३॥नारदेनसमादिष्टंपर्वतंगंधमादनं॥नारदेनतदाअ अ० २७
त्माश्वासितोहिपिताद्विजाः॥२४॥हवनंचतदापूर्णंजातंतस्यमहात्मनः॥महेशस्यतदाविप्राःशांतिपाठ
पराभवन्॥२५॥महताब्रह्मघोषेणव्याप्तमासीद्दिगंतरं॥ततोनीराजितोदेवोदेवपत्नीभिरर्चितः॥२६॥
तथैवऋषिपत्नीभिरर्चितःपूजितश्चसः॥तथागिरीशंचसुलोचनांशंभुंमनोरमांदेविबरांचसुंदरीं॥२७
गीतैःसुगीतज्ञविशारदाश्चतथैवचान्येस्तुतिभिर्महर्षयः॥रत्नानिचमहार्हाणिददौतस्मैमहामतिः॥
२८॥ऋषिगंधर्वयक्षेभ्योयेन्येतत्रसमागताः॥एवंसमभ्यर्च्यतदामहात्मामहान्गिरीशःपरमेणवर्चसा
॥२९॥बभौतदानीसुरसंघमध्येवेद्यांस्थितोसौसकलत्रकोविभुः॥तथाचसर्वेमिलिताएकपद्येनसर्व
शः॥३०॥पंक्तीभूताश्चबुभुजुर्नंदिनाभृंगिणासह॥नंद्यादयोमहाभागावीरभद्रादयस्तथा॥३१॥बुभु
जुःसहसर्वैश्चनानाहास्यरसैस्तदा॥तुष्टाश्चनारदाद्यास्तेपरमानंदसंयुताः॥३२॥तुतुषुर्नारदाद्याश्च
अनेकेलीलयायुताः॥तथाचंडीगणाःसर्वेतुतुषुःकृतभोजनाः॥३३॥वेतालक्षेत्रपालाश्चकूश्मांडाभै

प्रकृतिपुंसोतावेकपद्येननान्यथा।।दंपतीतौगजारूढौशक्रशक्रभातेमहाप्रभौ।।३३।।विमानस्थस्तदाब्रह्माविष्णुश्चगरुडोपरि।।ऐरावतगतश्चेंद्रः कुबेरःपुष्पकोपरि।।३२।।पाशीचमकरारूढोयमोमहिषमेवच।।
प्रेतारूढोनैऋतश्च अग्निर्मेंद्रगतोमहान्।।३४।।मृगारूढोथपवनईशोवृष भमेवच।।अष्टावेतेलो
कपाला अग्रगाः परमेष्ठिनः।।३५।।स्वंस्वंबलंवहंत्येतेतथान्येप्रमथादयः।।हिमाद्रिश्चतथाशैल
ऋषभोगंधमादनः।।३५।।सत्याचलोनीलगिरिर्मंदरोमलयाचलः।।कैलासोहिमहातेजामेनाको
हिमहाप्रभः।।३६।।एतेचान्येचगिरयःश्रीमतासर्वएवहि।।सकलत्राःसहामात्याःसस्कृताश्चम
हाप्रभाः।।३७।।बलिनोरूपिणःसर्वेमेर्वाद्यास्तत्रपर्वताः।।वरयात्राकृतातेनयथोक्तंचहिमाद्रि
णा।।३८।।सर्वैस्तैर्बंधुभिःसार्धंपुनरागमनंकृतं।।स्वमंदिरस्थोहिमवान्रेजेसखुमहायशाः।।३९।।
शिवसंपर्कजेनैवमहसापरमेणहि।।विख्यातोहिमहाशैलस्त्रिषुलोकेषुविश्रुतः।।२०।।कन्या
दानेनमहतासंतुष्टोयस्यशंकरः।।तेधन्यास्तेमहात्मानःकृतत्यास्तएवहि।।२१।।शिवइत्यक्षरं
नामयैरुच्चरितमध्वये।।व्यक्षरंनामयेषांवैजिव्हाग्रेसंस्थितंसदा।।२२।।तेवैमनुष्यरूपेणरुद्रा
नास्त्यत्रसंशयः।।किंचिद्दलेनसंतुष्टःपुष्पेणापितथैवहि।।२३।।ततोयेनापिसंतुष्टोमहादेवोनि

रंजनः॥पत्रेणपुष्पेणतथाफलेनप्रीतोभवेत्येवसदाशिवोहि॥२४॥तस्माच्चसर्वैःपरिपूजनीयःशिवोमहा०
भाग्यकरोनराणामिह॥एकोमहाज्योतिरतिःपरेशःपरःपराणांपरमोमहात्मा॥२५॥निरंतरोनिर्गुणो
निर्विकारोनिराबाधोनिर्विकल्पोनिरीहः॥निरंजनोनित्ययुक्तोनिराशोनिराधारोनित्ययुक्तःस
दैव॥२६॥एवंभूतोदेवदेवोर्चितोयैर्लोकेतेवैपूजनीयाभवंति॥स्तुतोध्यातश्चिंतितश्चैवन्महे
शस्तुष्टस्तेषामभीप्सितंवैददाति॥२७॥तस्माद्गरिष्ठोहिमवान्प्रसिद्धःसर्वैर्गुणैःसर्वकरोमहा
त्मा॥विश्वेशवंद्योहितदाहिमालयोजातोगिरीणामधिपस्तदानीं॥२८॥मेनयासहधर्मात्मा
स्वमंदिरगतस्तदा॥सर्वान्विसर्जयामासपर्वतान्पर्वतेश्वरः॥२९॥गतेषुतेषुसर्वेषुहिमवा
न्पुत्रपौत्रकैः॥रेजेगिरीणांप्रवरोमहादेवप्रसादतः॥३०॥अथोगिरिजयासार्धंमहेशोगंधमा
दने॥एकांतेचमतिंचक्रेरमणायसुरूपवान्॥३१॥सुरतेनैवमहतातयासहमहाप्रभुः॥तयोः
सुरतमापन्नंयद्वयोश्चतदाभवत्॥३२॥अनिष्टंमहदाश्चर्यंप्रलयेएवमेवच॥तस्मिन्महाभयेप्राप्ते
नाविंदंतपरस्परं॥३३॥सर्वेब्रह्मादयोदेवाःकार्याकार्यव्यवस्थिताः॥रेतसाचजगत्सर्वंनष्टंस्था

ह्युक्तो निक्षायित्वाथ रेतईशस्य हव्यवाट् ॥ ४४ ॥ यत्र देवास्थिताः सर्वे तत्रागाच्चैव तत्र वै ॥ आगत्य क
थयामास तद्रेतो भक्षणादिकं ॥ ४५ ॥ सर्वे संगर्भाश्च भवन्तु सर्वे चिंतयाप्रपी(ड़िता)इंद्राद्यादेवतागणाः ॥ अ
ग्नेर्हविर्यथाचैव सर्वेषामुपयास्यसि ॥ ४६ ॥ अग्नेर्मुखोद्भवेनैव रेतसा सर्वदेवताः ॥ संगर्भाश्च भ
वन्सर्वे चिंतयाच प्रपीडिताः ॥ ४७ ॥ विष्णुंस्मरणमाजग्मुर्देवदेवेश्वरंप्रभुं ॥ देवा ऊचुः ॥ त्वंत्राता
सर्वदेवानां लोकाप्रभुरेवच ॥ ४८ ॥ तस्माद्रक्षाविधातव्या शरणागतवत्सल ॥ वयं सर्वे मर्तुकामा रेतसाने
नपीडिता ॥ ४९ ॥ असुरेभ्यः परित्रस्ता वयं सर्वे दिवौकसः ॥ शरणं शरणं याताः परित्रातुं त्वमिहार्हसि ॥ ५०
यस्य पुत्रोहि रुद्रस्य भविष्यति तदा वयं ॥ सुखिनः स्याम सर्वे वै नि भेयाश्च त्रिविष्टपे ॥ ५१ ॥ एवं विमृ
श्यमानानां सर्वेषां भयमागतं ॥ अनेन रेतसा विष्णो जीवितुं नोत्सहामहे ॥ ५२ ॥ त्रिवर्गोहि यथा
पुंसां रक्षितो हि सुपरिष्कृतः ॥ विपरीतो भवत्येव विना दैवेन नान्यथा ॥ ५३ ॥ तस्माद्दैवबलं मत्वा सर्वे
षामेव देहिनां ॥ कार्याकार्यव्यवस्थायां सर्वे मन्यामहे वयं ॥ ५४ ॥ तदा निशम्य देवानां परेशः परदै
वतं ॥ उवाच प्रहसन्वाक्यं देवान्वै देवतारिहा ॥ ५५ ॥ स्तूयतां हि महादेवः समेतैः कार्यगौरवात् ॥

तथेति मत्वा ते देवा विष्णुपुरोगमाः ॥ ५६ ॥ तथा ब्रह्मादयः सर्वे ऋषयस्त्वीडिरे भवं ॥ ब्रह्मादय ऊचुः ॥ न
मो भर्गाय देवाय नीलकंठाय मीढुषे ॥ ५७ ॥ विश्वेशाय त्रिवेदाय लोकत्रितयधारिणे ॥ त्रिस्वराय त्रिमा
त्राय ॐकाराय त्रिमूर्तये ॥ ५८ ॥ त्रिवर्गाय त्रिधाम्ने च त्रिपादाय त्रिशूलिने ॥ त्राहि त्राहि महादेव रेत
सोस्माज्जगत्प्रभो ॥ ५९ ॥ ब्रह्मणा संस्कृतो यावत्तावद्देवो वृषध्वजः ॥ प्रादुर्बभूव तत्रैव सुराणां कार्य
सिद्धये ॥ ६० ॥ दृष्ट्वा स तदानीं देवांस्तानुवाच परमेश्वरः ॥ मात्रासं कुर्वतां सर्वे रेतसानेन पीडिताः ॥
६१ ॥ उत्कालनं भवद्भिश्च कार्यं मद्यैव मोजसा ॥ तथेति मत्वा ते सर्वे इंद्राद्यादेवतागणाः ॥ ६२ ॥ वे
मुः सर्वे तदा देवास्तद्रेतः शंकरस्य च ॥ एकपद्येन तद्रेतो महापर्वतसन्निभं ॥ ६३ ॥ तदा चामीकरप्र
ख्यं बभूव परमाद्भुतं ॥ सर्वे च सुखिनो जाता विमुक्ता रेतसा तदा ॥ ६४ ॥ विनाग्निना च ते सर्वे परि
तुष्टास्तदाभवन् ॥ तेनाग्निना तदोक्तश्च शंकरो लोकशंकरः ॥ ६५ ॥ किं मयाद्य महादेव कर्तव्यं दे
वतावर ॥ तद्वदस्व प्रभो चाद्य येनाहं च सुखी सदा ॥ ६६ ॥ भविष्यामि च देवानां हव्यवाहः सदाशिव ॥
तदोवाच शिवः साक्षाद्देवानां चैव शृण्वतां ॥ ६७ ॥ रेतो विसृज्यतां योनौ तदाग्निः प्रहसन्निव ॥

स्कंद० केदा० उवाचशंकरंदेवभवंतंजोदुरासदं ॥६८॥ इदमत्युल्बणंतेजधार्यतेप्राकृतैः कथं ॥ तदाग्निर्नार
देनोक्तस्त्वरन्कुरुवचोमम ॥६९॥ माघमासिव्रतस्थानांहिदेतेजोविसृज्यतां ॥ तथेतिमत्वाव
चनंमहाप्रभःसंजातवेदाःपरमेणवर्चसा ॥ समुज्वलन्तत्रमहाप्रभावोब्राह्ममुहूर्तेहिसचोप
विष्टः ॥ तदाप्रातःसमुत्थायमाघस्नानपराःस्त्रियः ॥७०॥ ययुस्तदामहर्षीणांसप्तत्योजातवेद
सं ॥ दृष्ट्वाप्रज्वलितंतत्रसर्वास्ताःशीतकर्शिताः ॥७१॥ तत्तुकामास्तदासर्वाअरुंधत्यानिवारि
ताः ॥ तथानिवारिताश्चापितास्तेपुःकृत्तिकास्स्वयं ॥७२॥ यावत्तेपुश्चस्ताःसर्वारेतसःपरमा
णवः ॥ विविशूरोमकूपेषुतासांतत्रैवसत्वरं ॥७३॥ अग्निर्निर्गतरेतावैजातस्तत्क्षणमेवहि ॥
ततश्चताःसगर्भाश्चययुःस्वभवनंप्रति ॥७४॥ ऋषिनिर्दिष्टमात्रेणशप्तास्ताःखेचरास्तदा ॥
तदानीमेवताःसर्वाअग्निचारेणदुःखिताः ॥७५॥ उत्ससृजुर्महत्तेजःपृष्ठेहिमवतोगिरेः ॥ ऐ
कपद्येनतद्रेतस्तस्थचामीकरप्रभं ॥७६॥ गंगायांचतदाक्षिप्तंकीचकैःपरिवेष्टितं ॥ षण्मुखंबा
लकंज्ञात्वासर्वेदेवामुदान्विताः ॥७७॥ गर्गणोक्तास्तदाचैवसुखेनस्थीयतामिति ॥ शंभोः

वरजंगमं ॥३४॥ सस्मारचाग्निंब्रह्माथविष्णुश्चाप्यात्मवित्तमः ॥ मनसासंस्मृतःसद्योजगामाग्निः
स्त्वरान्वितः ॥३५॥ ताभ्यांसंप्रेषितोपश्यदचिरंशिवमंदिरं ॥ द्वारिस्थितस्तदानंदीददर्शस्व
यमेवहि ॥३६॥ अग्निर्हंसस्तदाभूतःकाश्मीरसदृशच्छविः ॥ प्रविष्टस्तत्पुरंशंभोर्नाना
श्चर्यसमन्वितं ॥३७॥ अनेकरत्नसंवीतंप्रासादैश्चस्वलंकृतं ॥ तदंगणमनुप्राप्यउपवि
श्यचहव्यवाट् ॥३८॥ पाणिपात्रश्चहेअंबभिक्षांदेह्यवरोधतः ॥ तच्छ्रुत्वावचनंतस्यपा
णिपात्रस्यचांबिका ॥३९॥ यावद्दातुंसमारेभेभिक्षांतस्मैततोभृशं ॥ उत्थायस्फुरतोत्त
स्माच्छिवोहिकुपितोभृशं ॥४०॥ रुद्रस्त्रिशूलमुद्यम्यभैरवोत्थभवत्तदा ॥ निवारितोगि
रिजयावधात्तस्माद्विसुःस्वयं ॥४१॥ भिक्षांतस्मैददौचांबात्वग्नयेजातवेदसे ॥ पाणौभि
क्षांगृहीत्वाथप्रत्यक्षंतेनचाग्निना ॥४२॥ भर्त्सितागिरिजातंवैशशापकुपितातदा ॥ रे
भिक्षोममशापाद्धिसर्वभिक्षोभविष्यसि ॥४३॥ अनेनरेतसासद्यःपीडांप्राप्स्यसिसर्वतः ॥

पुत्रप्रसादेनशिवंसर्वंभविष्यति॥७८॥गंगायाःपुलिनेजातःकार्तिकेयोमहाबलः॥उपविष्टोथगांगेयअ
होरात्रोषितस्तदा॥७९॥शाखोविशाखोतिबलःषण्मुखोसोबभूवह॥जातोयदाचगंगायांषण्मुखःशं
करात्मजः॥८०॥तदानीमेवगिरिजाजातास्नुतपयोधराः॥शिवंनिरीक्ष्यसादेवीहेशंभोप्रस्नवोमहा
न्॥८१॥जातोमममहादेवकिमर्थंतन्निरीक्ष्यतां॥सर्वज्ञोहिमहादेवोनाब्रवीत्तत्रचाभवत्॥८२॥
कथितंनारदेनैवशंकरेजन्मकर्मतत्॥शिवाचशिवायेचगणेभ्यःकथितंतदा॥८३॥तदाकर्ण्यवचो
विप्राःहर्षनिर्भरमानसाः॥बभूवुःप्रथमाःसर्वेगंधमादनवासिनः॥८४॥अनेकाभिःपताकाभिश्चलस
ल्लवतोरणैः॥तथाविमानैर्बहुभिःपर्वतःसोज्वलोभवत्॥८५॥पर्वतानांचभौमध्येयत्रास्तिपर्वतःस्वयं॥
तदासर्वेसुरगणाऋषयःसिद्धचारणाः॥८६॥यक्षगंधर्वसर्पाश्चसाप्सरोगणसेविताः॥एकपद्येनतेसर्वे
शंकरेणसमान्विताः॥८७॥द्रष्टुंगांगेयमधिकंगंगापुलिनवासिनं॥ततोवृषभमारुह्यसयोगिरिजया
सह॥८८॥अन्यैःसमेतोभगवान्सुरैरिंद्रादिभिस्तथा॥शंखाश्चबहवोनेदुर्भेरीतूर्याण्यनेकशः॥८९॥
तदानीमेवतेसर्वेवीरभद्रादयोगणाः॥ययुःकिलकिलाशब्दैर्नानातालधरास्तदा॥९०॥रूकटान्येववाद्या
नितताविततानिच॥केचिन्नृत्यपरास्तत्रगायकाश्चतथापरे॥९१॥प्रमथास्तूयमानाश्चचक्रुस्तेगुण

स्ते

कीर्तनं ॥ एवंविधोऽसुरसिद्धसंघागंधर्वविद्याधरपंन्नगात्यमी ॥ ९२ ॥ शिवेनसार्धंपरितुष्टमानसाद्रष्टुंययु
स्तंवरदंशिवात्मजं ॥ यावत्समीक्षयामासुर्गांगेयंशंकरात्मजं ॥ स्हश्फस्तेमहातेजोव्याप्तमासीज्जगत्त्रयं ॥ ९३
यत्तेजसार्द्दंतंबालंतदाचामीकरप्रभं ॥ स्कमुखंस्कंप्रियायुक्तंस्कनासंस्कास्मितेक्षणं ॥ ९४ ॥ ववंदिरेतदा
सर्वेकुमारंसूर्यवर्चसंप्रभथाश्वगणाश्चैववीरभद्रादयस्तथा ॥ ९५ ॥ परिवार्योपतस्थुस्तेवामदक्षिणभा
गतः ॥ तथाब्रह्माचविष्णुश्चइंद्रश्चापिसुरैःसह ॥ ९६ ॥ ऋषयोयक्षगंधर्वापरिवार्यकुमारकं ॥ दंडव
त्पतिताभ्रमोविरिंचिर्नतकंधरः ॥ ९७ ॥ प्रणेमुःशिरसासर्वेमत्वास्वामिनमव्ययं ॥ अवाद्यंतविचित्राणिवा-
द्यानिविविधानिच ॥ ९८ ॥ एवमभ्युदयेतस्मिन्सर्वेशांतिपराभवन् ॥ एतस्मिन्नंतरेयातःशंकरोगिरि-
जापतिः ॥ ९९ ॥ अवतीर्यवृषाछीघ्रंपार्वत्यासहसुव्रतः ॥ पुत्रंनिरीक्ष्यचतदाजगदेकबंधुःप्रीत्यायुतःपर
मयापरयाभवान्याः ॥ १०० ॥ स्नेहान्वितोभुजगभोगयुतोहिसाक्षात्सर्वेश्वरःपरिवृतःप्रमथैस्तथैव ॥
उपयुत्ययुहंतत्रपार्वतीजातसंभ्रमा ॥ १०१ ॥ प्रस्नुतंपाययामासस्तनंस्नेहपरिप्लुता ॥ तदानीराजि-
तोदेवैःसकलैस्त्रैर्मुदान्वितैः ॥ २ ॥ जयशब्देनमहताव्याप्तमासीन्नभस्थलं ॥ ऋषिभिर्ब्रह्मघोषेणगी
तेनैवगायकैः ॥ ३ ॥ वाद्यैश्चवादकास्तत्रउपतस्थुःकुमारकं ॥ स्वांकमारोपयामासगिरिशश्चकुमार

नविजित्यसंग्रामेजयिनोहि भविष्यथ ॥ वाचंतुरवेचरीं श्रुत्वासर्वेदेवाःसवाःसवाः ॥ २८ ॥ कुमारंचपुरस्कृत्य
सर्वेतेगतसाध्वसाः ॥ योद्धुकामाःकृरायावत्तावत्तेनसमागता ॥ २९ ॥ वरणार्थंकुमारस्यकृतामृत्योर्दु
हितया ॥ ब्रह्मणानोदितापूर्वंतपः परममास्थिता ॥ ३० ॥ तपसातेनमहताकुमारंप्रतिवैतदा ॥ आगत्य
दुहितामृत्योःसेनानाम्नेकसुंदरी ॥ ३१ ॥ ब्रह्मणावचसाचैवकुमारेणवृतातदा ॥ तदासेनापतिर्जातः
कुमारःशंकरस्यच ॥ ३२ ॥ तदाशंखाश्चभेर्यश्चपटहानकगोमुखाः ॥ तथादुंदुभयोनेदुःपटहाश्चमहा
स्वनाः ॥ ३३ ॥ तेननादेनमहतापूरितंचनभस्थलं ॥ तदागौरीत्वगंगाचकृत्तिकामातृकागणः ॥ ३४ ॥ पर
स्परमथोचुस्ताःकृतोममममेतिवै ॥ एवंविवादमापन्नाःसर्वेतेमातृकादयः ॥ ३५ ॥ निवारितानारदेन
मूढत्वंमाकरिष्यथ ॥ पार्वत्यांशंकराज्जातोदेवकार्यार्थमेवच ॥ ३६ ॥ तूष्णींभूतास्तदासर्वाःकृत्तिका
मातृकादयः ॥ गृहेनोकास्तदासर्वाऋषिपत्न्योथकृत्तिकाः ॥ ३७ ॥ नक्षत्राणिसमाश्रित्यभवद्भिःस्थी
यतांचिरं ॥ तथामातृगणास्तेनस्वामिनास्थापितादिवि ॥ ३८ ॥ मृत्योःकन्यांचसंगृह्यपत्नीत्वेववरा
ननां ॥ इंद्रंप्रोवाचभगवान्कुमारःशंकरात्मजः ॥ ३९ ॥ दिवंयाहिसुरैःसार्धंकुरुराज्यंनिरंतरं ॥ इंद्रे
णोक्तःकुमारोहितारकेणप्रपीडिताः ॥ २० ॥ स्वर्गोद्विग्नबलाःसर्वेवयंयातादिशोदश ॥ किंपृच्छसिमहा-

भाग अस्मात्पदपरिच्युतान् ॥ २१ ॥ एवमुक्तस्तदातेनवज्रिणाशंकरात्मजः ॥ प्रहस्यचेंद्रंप्रोवाचमाभैषीः
सुरसत्तम ॥ २२ ॥ यावत्कथयतस्तस्यशंकरस्यमहात्मनः ॥ कैलासंतुगतोरुद्रःपार्वत्याप्रमथैःसह ॥ २२
आजगाममहाबाहुस्तारकोदैत्यपुंगवः ॥ २३ ॥ सैन्येनमहतासार्धमसुरैःपरिवारितः ॥ यमदुंदुभयो
नेदुस्तत्रप्रलयभास्कराः ॥ २४ ॥ रणकर्कशतूर्याणिडिंडिमान्यद्भुतानिच ॥ पटहाष्टिविलाघंटाढक्कान
र्झरणास्तथा ॥ २५ ॥ गोमुखाःखरशृंगाणिकाहलानिचसर्वशः ॥ वाद्यप्रभेदावाद्यंतेतस्मिन्दैत्यसमा
गमे ॥ २६ ॥ गर्जमानास्तदादैत्यास्तारकेणदुरात्मना ॥ उवाचनारदोवाक्यंतारकंदेवकंटकं ॥ नारद
उवाच ॥ पुरादेवैःकृतोयत्नोवधार्थंनात्रसंशयः ॥ नचैवमेसुरश्रेष्ठमयोक्तंनान्यथाभवेत् ॥ कुमारोयं
त्वशर्वस्यवधार्थंजनितस्तव ॥ एवंज्ञात्वामहाबाहोकुरुयत्नंसमाहितः ॥ २९ ॥ नारदोक्तंनिशम्याथता
रकःप्रहसन्निव ॥ उवाचवाक्यंमेधावीगच्छत्वंचपुरंदरं ॥ ममवाक्यंमहर्षेत्वंवदशीघ्रंयथातथं ॥ कु
मारंचपुरस्कृत्यभयायोद्धुंत्वमिच्छसि ॥ मूढभावंसमाश्रित्यमर्तुमिच्छमूढधे ॥ ३३ ॥ मनुष्यमेकमाश्रि
त्यमुचुकुंदारकमेवच ॥ तत्तेजसामरानत्वांस्थितोसित्वंपुरंदर ॥ कुमारबलमाश्रित्वास्थितोसिय
दिभ्भतः ॥ त्वांहनिष्याम्यहंशक्रलोकपालैःसहैवहि ॥ ३३ ॥ एतत्कथयदेवेंद्रंदेवर्षेनान्यथावद ॥

स्कंद० केदा० तथेतिमत्वाभगवान्सनारदोययौस्करान्शक्रपुरोगमांश्च॥ आचष्टसर्वंव्यस्करेंद्रभाषितंसहोपहाःसंम
तिमांस्तदेव॥ नारदउवाच॥ भवद्भिःक्रियतांदेवावचनंममनान्यथा॥ तारकेणयदुक्तंचसानुगैरवधा अ० २७
र्यतां॥ तारकस्त्वांहनिष्यामिनान्यथाममभाषितं॥ ३५॥ मुचुकुंदंसमाश्रित्यलोकपालेश्चपूजितः॥
नत्वयाभीरुणायोत्स्येदेवोभूत्वानराश्रयः॥ ३६॥ निशम्योचुस्तदासर्वेमहेंद्राद्यादेवतागणाः॥ कुमारंच
पुरस्कृत्यनारदंऋषिसत्तमं॥ ३७॥ जानासित्वंचदेवर्षेकुमारस्यबलाबलं॥ अज्ञोभूत्वाकथंवाक्य
मुक्तंतस्यममाग्रतः॥ ३८॥ प्रहस्यनारदोवाक्यमुवाचस्करसान्निधौ॥ अहमप्युपहासेनवाक्यंतार
कमुक्तवान्॥ ३९॥ जानीध्वंचस्कराःसर्वेकुमारोजयवांश्चवै॥ भविष्यत्यत्रमेवाक्येनात्रकार्याविचा
रणा॥ ४०॥ नारदवचःश्रुत्वासर्वेदेवामुदान्विताः॥ ऐकपद्येनचोतस्थुर्योद्धुकामाश्चतारकं॥ ४१॥ कु
मारंगजमारोप्यदेवेंद्रोग्यतोभवत्॥ सर्वसैन्येनमहतालोकपालैःसमावृतः॥ ४२॥ तदादुंदुभयोनेदु
र्भेर्यस्तूर्याण्यनेकशः॥ वीणावेणुमृदंगाश्चतथागंधर्वनिस्वनाः॥ ४३॥ गजेंद्रंत्वामहेंद्रायकुमारोयान
मारोहत्॥ अनेकरत्नसंवीतंनानाश्चर्यसमन्वितं॥ ४४॥ विमानमारुह्यतदामहायशाःसशंकरःस
र्वगुणैरुपेतः॥ श्रियासमेतःपरयाबभौमहान्संवीक्ष्यमाणश्चरणेमहायशाः॥ ४५॥ प्राचेतसंछत्रंमहा

कं॥ ४॥ प्रमयामहाप्रभंबभौतदानींपतिरिवसाक्षात्॥ प्याश्रियान्वितोसौदेवतानांवरिष्ठः॥ ५॥ दंपतीतोतदा
तत्रऐकपद्येनरेजतुः॥ अभिषिच्यमानोऋषिभिराहूतोस्करसत्तमैः॥ ६॥ कुमारःक्रीडयामासउत्संगेशंकर
स्यच॥ कंठस्थितंवासुकिंचपाणिभ्यांसमपीडयत्॥ ७॥ मुखंचपीडयित्वासौपाणिनागणयत्तदा॥ एकंत्री
णिदशाष्टौचविपरीतक्रमेणच॥ ८॥ प्रहसन्भगवान्शंभुर्गिरिजायैप्रदर्शयत्॥ मंदस्मितेनचतदाभग
वान्महेशःप्राप्तोमुदंचपरमांगिरिजासमेतः॥ ९॥ प्रेम्णासगद्गदगिराजगदेकबंधुर्नोवाचकिंचनतदा
भुवनैकभर्ता॥ १०॥ इतिश्रीस्कंदपुराणेकेदारखंडेकुमारोत्सवोनामषड्विंशोध्यायः॥ २६॥ लोमशउवा अ० २६ समा
च॥ कुमारस्तांकरमारोप्यप्रोवाचजगदीश्वरः॥ देवान्प्रतितदारुद्रःसेंद्रान्शंभुःप्रतापवान्॥ १॥
किंकार्यंकथ्यतांदेवाःकुमारेणममाधुना॥ तदोचुःसहिताःसर्वेदेवंपशुपतिंतदा॥ २॥ तारकाद्भयमुत्पन्नं
सर्वेषांजगतःप्रभो॥ तस्माद्वयंवयास्यामस्तारकंहंतुमुद्यताः॥ ३॥ तथेतिमत्वासहसानिर्जग्मुस्तेतदास्कराः
कार्तिकेयंपुरस्कृत्यशंकरस्यात्मजंतथा॥ ४॥ सर्वेमिलित्वासहसाविष्णुब्रह्मपुरोगमाः॥ देवानांमुद्यमं
श्रुत्वातारकोपिमहाबलः॥ सैन्येनमहताचैवययौयोद्धुंस्करान्प्रति॥ ५॥ देवैर्दृष्टःसमायातःस्तारकोहि अ० २७ प्रा
महाबलः॥ तदानभोगतावाणीत्युवाचपरिसांत्वयन्॥ ६॥ करिष्यपुरस्कृत्यसर्वेयूयंसमुद्यताः॥ ७॥ दिसा

मणिप्रभैरत्नैरुपेतंबहुभिर्विराजितं ॥ धृतंतदाचारुकुमारमूर्धनिचंद्रेणचांद्रैःकिरणैःसमन्वितं ॥
४६ ॥ महाबलास्तदासर्वेदेवाइंद्रपुरोगमाः ॥ स्वैःस्वैर्बलैरुपक्रांतायोद्धुकामास्त्वरान्विताः ॥ ४७ ॥ य
मोपिस्वगणैःसार्धंमरुद्भिश्चसदागतिः ॥ पयोभिर्वरुणस्तत्रकुबेरोगुह्यकैर्वृतः ॥ ४८ ॥ ईशोपिप्रम
थैःसार्धंइंद्रोदेवैःसमावृतः ॥ अग्निरर्चिगणैःसार्धंनिर्ऋतिर्व्याधिभिःसह ॥ ४९ ॥ एवंसर्वेलोकपा
लायोद्धुकामाःसर्वेमिलित्वातारकंहंतुकामाः ॥ पुरस्कृत्वाथशंकरंविश्ववंद्यंगौरीपुत्रंवेदवंद्यंवरिष्ठं ॥ ५०
एवंदेवायोद्धुकामाअवतेरुश्चभूतलं ॥ अंतर्वेधांस्थिताःसर्वेगंगायमुनामध्यमः ॥ ५३ ॥ पातालाच्च:
समायातास्तारकस्योपजीविनः ॥ चतुरंगबलोपेताहंतुकामाःसुरान्रणे ॥ ५२ ॥ तारकोहिसमाया
तोविमानेनविराजितः ॥ छत्रेणचसुशोभासाजाःध्रियमाणेनमूर्धनि ॥ ५३ ॥ चामरैर्वीज्यमानोहिशु
शुंभेदैत्यराट्स्वयं ॥ एवंदेवाश्चदैत्याश्चअंतर्वेधांगतास्तदा ॥ ५४ ॥ सैन्येनमहतायुक्ताःसैन्यंकृत्वा
पृथक्पृथक् ॥ गजान्कृत्वाएकतश्चहयांश्चविविधांस्तथा ॥ ५५ ॥ स्यंदनांश्चविचित्रांश्चनानारंभा
कृतीस्तथा ॥ पत्तिणोबहवस्तत्रशक्तिशूलपरश्वधैः ॥ ५६ ॥ खड्गतोमरनाराचपाशमुद्गरशोभि

स्कंद० केदा०

नी॥सासेनास्करदैत्यानांयुयुधेचपरस्परं॥हंतुकामास्तदातेवैरक्ष्यमाणाश्चबंदिभिः॥५८॥इतिश्रीस्कं
सप्तविंशोध्यायः॥२७॥लोमशउवाच॥तेसेनेस्कराणांचतेषांस्करविद्विषां॥अनेकाश्चर्यसंवीतेचतुरंग
बलान्विते॥१॥विरेजतुस्तदान्योन्यंगर्जतेत्वंबुदोपमे॥एतस्मिन्नंतरेतत्रवल्गमानाःपरस्परं॥२॥देव
दैत्यास्तदासर्वेयुयुधुश्चपरस्परं॥युद्धंचतुमुलंत्वासीद्देवदैत्यसमाकुलं॥३॥दंडमुंडांकितंसर्वंक्षणेन
समपद्यत॥भूमौनिपातितास्तत्रशतशोथसहस्रशः॥४॥केषांचिद्बाहवश्छिन्नाःखड्गपातैःसुदारुणैः
केचित्प्रोथितसर्वांगागदाभिर्मुसलैरपि॥५॥केचिन्निर्भिन्नहृदयाःपाशैर्मल्लैश्चपातिताः॥केचिद्विदा
रिताःपृष्ठेअंकुशैःकुंतदृष्टिभिः॥६॥छिन्नान्यपिशिरांस्येवपतितानिचभूतले॥बहूनिचकबंधानिनृ
त्यमानानितत्रवै॥७॥नद्यःप्रवर्तिताश्चासन्शतशोसृङ्मयास्तदा॥भूतप्रेतपिशाचानांगणाःशतस
हस्रशः॥८॥गोमायवःशिवास्तत्रभक्ष्यमाणाःफलंबहु॥तथागृध्रबकाश्येनावसामांसस्यभक्षकाः॥९॥
अन्येचबहवःक्रूराःसैन्ययोरुभयोरपि॥बुभुजुःपतितानांचमांसंबहुतरंभुवि॥१०॥एवमादीन्यनेकानि
महाश्चर्याणितत्रवै॥बभूवुरणभूमौचतस्मिन्युद्धेसुदारुणे॥११॥द्वंद्वयुद्धंसमभवत्स्करास्करविमर्दनं॥दा
नवोवायुनासार्धंजंभेनैवयमःस्वयं॥१२॥वरुणेनसहपाशीचप्रघसेनधनाधिपः॥अग्निनासहसंह्रादोनैर्ऋतेन

अ०२७ समाप्तः

देनधीमता॥खड्गेनचाहतस्तत्रसवनरकंचवक्षसा॥२७॥प्रसल्यतंसंप्रहारंप्रहसन्वाक्यमब्रवीत॥किं
मेमृदलयाचाद्यरुतमस्तिबलान्वितं॥२८॥नत्वयायोद्धुमिच्छामिमानुषेणवलज्जया॥तारकस्यवचश्रुत्वा
मुचुकुंदोप्यभाषत॥२९॥मयाहतोसिदैत्येंद्रनान्योवासितुमर्हसि॥इत्युक्त्वामिरखड्गजंघातमात्वंतिष्ठसिवा
मतः॥३०॥एवंत्वंपश्यमेशौर्यंदैत्यराजस्थिरोभव॥एवमुक्त्वातदावीरोमुचुकुंदोमहाबलः॥३१॥याव
ज्जघानखड्गेनतावच्छक्त्यासमाहितः॥मांधातृतनयस्तत्रपपातरणमंडले॥३२॥पतितस्तत्क्षणादेवउत्थि
तःपरवीरहा॥सगर्जमानोतिरुषामहाबलोहंतुंतदादैत्यवरंचतारकं॥३३॥ब्रह्मास्त्रमुद्यम्यधनुर्धारा
णांमांधातृपुत्रोभुवनैकजेता॥तत्कालतारकंतुहंकामस्तरस्वीरुषान्वितोतीवमहामनस्वी॥इष्टस्तदा
नीभुवनैकजेतासनारदोवाक्यमिदंबभाषे॥मांधातृपुत्रंमुचुकुंदमेवंनतारकोहन्यतमानुषेण॥३५॥
निशम्यवचनंतस्यदेवर्षेर्नारदस्यच॥मुचुकुंदउवाचैनंकेनास्यभवितावधः॥३६॥ततःप्राहमहाते
जानारदोदिव्यदर्शनः॥एनंतुतारकंहंताकुमारोयंशिवात्मजः॥३७॥तस्मात्त्वंवह्निस्थातव्यंऐकपद्येनयु
ध्यतां॥तिष्ठत्वंसंयतोभूत्वामुचुकुंदमहामते॥३८॥निशम्यवाक्यंचमनोहरंभुंतदारितंतेनमहाप्रभेण
सर्वेसुराःशांतिपराबभूवुःस्तिनैवसार्कंनवरेणराज्ञा॥३९॥ततोदुंदुभयोनेदुःशंखाश्चैवाद्भुतस्वनाः॥
वादित्राविविधावाद्यासुरासुरसमन्विताः॥४०॥जगर्जुरसुरास्तत्रदेवानुप्रतिरुताधमाः॥शिवकोपात्स्वो

वीरोवीरभद्रोरुषान्वितः॥४१॥गणैर्बहुभिरासाद्यतारकंचमहाबलं॥मुचुकुंदंपृष्ठतश्चकृत्वासर्वान्सुरानपि॥४२
तदातेप्रमथाःसर्वेपुरस्कृत्यकुमारकं॥युयुधुःसंयुगेतत्रवीरभद्रादयोगणाः॥४३॥त्रिशूलैःसायकैःपाशैःखड्गैः
परशुपट्टिशैः॥निर्जघ्नुःसमरेन्योन्यंसुरासुरविमर्दने॥४४॥तारकोवीरभद्रेणत्रिशूलेनाहतोभृशं॥पपात
सहसाभूमौक्षणंमूर्छापरिप्लुतः॥४५॥उत्थायसमुहूर्ताच्चतारकोदैत्यसत्तमः॥लब्धसंज्ञोबलाविष्टोवीरभद्रं
जघानह॥४६॥शक्त्यातथामहातेजाःवीरभद्रोहितारकं॥त्रिशूलेनसघोषेणशिवस्यानुचरोबली॥४७॥एवंस
युध्यमानौतौजघ्नतुश्चेतरेतरं॥द्वयोर्युद्धंसुतुमुलंतयोर्जातंमहात्मनोः॥४८॥सुरासुराश्चतत्रैवप्रेक्षकाह्यभ
वंस्तदा॥ततोभेरीमृदंगाश्चपटहानकगोमुखाः॥४[illegible] तथाडमरुनादेनव्याप्तमासीज्जगत्त्रयं॥तेननादेनमह
तायुध्यमानौमहाबलौ॥५०॥स्फुस्फुनातितिसंरब्धौप्रहारैर्जर्जरीकृतौ॥अन्योन्यमभिसंरब्धौतौबुधांगारकावि
व॥५१॥नारदेनतदाप्रोक्तंवीरभद्रस्ययद्वचः॥नरोचतेतदावाक्यंतारकस्यवधंप्रति॥५२॥यथारुद्रस्तथासोपि
वीरभद्रोमहाप्रभः॥एवंहिविध्यमानौतुजघ्नतुश्चेतरेतरं॥५३॥अन्योन्यंस्पर्धमानौचसिंहाविवबलोत्कटौ॥ए
वंतदातौभुवियुध्यमानौमहात्मनाज्ञानवतांवरेण॥५४॥सवीरभद्रोहितदानिवारितोवाक्यैरनेकैरथनारदेन॥
तथानिशम्यतद्वाक्यंनारदस्यमुखोद्गतं॥५५॥वीरभद्रोरुषाविष्टोनारदंप्रत्यभाषत॥हतारकंचहनिष्यामिप
श्यमेद्यपराक्रमं॥५६॥नानयंतिचयेवीराःस्वामिनांरणसंसदि॥तेपापिष्ठास्त्वधर्मिष्ठाविमृशंतिरणंगताः॥५७॥

स्कंदकेदार० भीरवस्तेतुविज्ञेयानवाच्यास्तेकदाचन।।त्वंनजानासिदेवेशयोधानांचपरिक्रियां।।५८।।मत्युंच अ॰२८
पृष्ठतःकृत्वारणभूमौगतव्यथाः।।शस्त्रास्त्रैर्भिन्नगात्राश्चप्रशस्तास्तेनसंशयः।।५९।।शृण्वंतुममवा
क्यानिदेवाइंद्रपुरोगमाः।।अतारकांमहींचाद्यकरिष्येनात्रसंशयः।।६०।।इत्युक्त्वाप्रमथैःसा
र्धवीरभद्रोमहाबलः।।युयुधेतारकेणैवत्रिशूलवरधारकः।।६१।।वृषादैरनेकैश्चत्रिशूलवरधा
रकैः।।कपर्दिनोह्यनेकाश्चगणास्तेतिप्रहारिणः।।६२।।वीरभद्रंपुरस्कृत्यवीरभद्रपराक्रमाः।।
नीलकंठादशभुजाःपंचवक्त्राःकपर्दिनः।।६३।।छत्रचामरसंवीताःसर्वेरुद्रपराक्रमाः।।वीरभद्रं
पुरस्कृत्यसर्वेरुद्रचराभृशं।।६४।।युयुधुस्तं[illegible]त्यास्तारकास्करजीविनः।।पुनःपुनस्तेश्चबभू
वसंगरोमहाभयोदैत्यवीरैस्तदानीं।।६५।।अमर्षमाणैःपरमास्त्रकोविदैस्ततोगणास्तेजयिनो
बभूवुः।।गणैर्जितास्तेत्यसुराःपराङ्मुखाबभूवुरुच्चैर्व्यथितास्तदानीं।।६६।।तेतारकंशस्त्रभयेनपीडिताः
परेणवीरंव्यथिताःशशंसुः।।निशम्यवाक्यंचसतारकस्तदासंयोद्धुकामःप्रविवेशसेनां।।यथाम्बुपो
थेप्रविवेशसागरंतथाह्यसौदैत्यवरोमहात्मा।।गणैःसमेतोयुयुधेतदानींसदैत्यराजोयुधिजेतुकामः
।।६८।।सर्वान्सुराश्चेंद्रमुखान्महासुरस्तथागणान्यक्षपिशाचगुह्यकान्।।ततःसमभवद्युद्धंतु

महाहनुः।।१३।।ईशेनसहमेघाभइंद्रेणसहतारकः।।अनेनैवमहाशूरायुयुधुस्तेमहाबलाः।।१४।।यक्षाःपिशाचा
उरगाःपन्नगाःपितरस्तथा।।युयुधुर्व्याधयःसर्वेज्वराश्चैवविशेषतः।।१५।।सन्निपातास्तथाचान्येभूतप्रम अ॰२८प्रा॰
थगुह्यकाः।।अन्यैश्चशस्त्रसंघातैस्तथास्त्रैर्बहुभिर्भृशं।।१६।।द्वंद्वयुद्धेनतेसर्वेयुयुधुःकृतनिश्चयाः।।अन्यो
न्यंहन्यमानास्तेअन्योन्यंदुर्जयाभवन्।।१७।।एवंतदाभूत्सुरदानवानांवभूवयुद्धंतुमुलंजयैषिणांदावाग्नि
नादग्धमहाद्रुमाययाथ।।तंतितस्मिन्समयेसुरास्तथा।।१८।।यदासुरास्तेत्वसुरैःपराजिताभवंश्चतेस्मिन्
समयेविगाढे।।महीतदारौद्रतराचिनष्टैःसुरैस्तदानींपतितैरनेकशः।।१९।।लोमशउवाच।।एवंयुद्धेऽतिमुंतु
लेदेवदानवसंकुले।।तारकेणचदेवेंद्रःशक्त्यापरमयाहतः।।२०।।सद्यःपपातदेवेंद्रःधरण्यांमूर्छितोमहान्
तथैवलोकपालास्तेअसुरैश्चमहाबलैः।।केचित्पराजितास्तत्ररणेरणविशारदाः।।मृताःकेचिच्चसंग्रामेः
पलायनपराभवन्।।२२।।एवंविध्वस्यमानंतत्सैन्यंवीक्ष्यतदानृपः।।मुचुकुंदोमहातेजास्तारकंप्रत्ययु
ध्यत।।२३।।असुरोमुचुकुंदेनतारकोयुयुधेभृशं।।विहायचेंद्रंपतितमसुरैर्बहुभिर्वृतः।।२४।।एवंयु
द्धमतीवासीत्तारकेणसदेवहि।।मुचुकुंदोमहाबाहुर्देवतार्थेचभीतदा।।२५।।अनेकैःशस्त्रसंघातैर्यु
युधातेपरस्परं।।मुचुकुंदोहिबलवान्त्रैलोक्येख्यातविख्यातः।।२६।।तारकश्चतदातेनमुचुकुं

मुलंलोमहर्षणं ॥६९॥ देवदानवदैत्यानांसंनिपातकरंमहत् ॥ तथावृषागर्जमाना अश्वानजघ्नुश्चसादिभिः॥
७०॥ रथिभिश्चरथानजघ्नुः कुंजरासादिभिः सह ॥ वृषारूढैर्वृषभैस्तैश्चसर्वैर्निवारितात्यस्कराघातिता
श्च॥७१॥ क्षयंप्रणीताबहवस्तदानींपेतुःपृथिव्यांनिहताश्चकेचन॥ केचित्प्रविष्टाहिरसातलंचपला
यमानात्यस्करास्तदानीं॥७२॥ केचिद्भीताः प्रांजलयः प्रणेमुः केचित्तस्मिन्शरणंगताश्च॥ मृताः
केचिच्चतत्रैवभ्रष्टाः केचिद्रणच्युताः॥७३॥ केचिच्चशरणंप्राप्ताःशिवानुचरकिंकरान्॥ एवं
नष्टंतदासैन्यंविलोक्यास्करपालकः॥७४॥ तारकोहिरुषाविष्टोहंतुंदेवगणान्ययौ॥ भुंजाना
मयुतंकृत्वादैत्यराजोहितारकः॥७५॥ आरुह्यसिंहंसहसापातयामासतान्रणे॥ दंशितेनच
सिंहेनवृषाःकेचिद्विदारिताः॥७६॥ तथैवतारकेणैवपातिताबहवोरणे॥ एवंकृतंतदातेनता
रकेणमहात्मना॥७७॥ सर्वेषामपिदेवानामशक्यस्तारकोभवत्॥ आतस्तदामहाबाहुस्त्रैलोक्य
क्षयकारकः॥७८॥ तारकस्यानुगादैत्या अजेयाबलवत्तराः॥ सिंहारूढादंशिताश्चनानाशस्त्रैःप्र
हारिणः॥७९॥ तैराहतागणाः सर्वेसिंहैश्चवृषभाहताः॥ एवंनिहन्यमानांस्तान्गणान्दृष्ट्वारणाजि

स्कंद० केदा० २॥ ८०॥ प्रहस्य विष्णुः प्रोवाच कुमारं शिववल्लभं॥ विष्णुरुवाच॥ नान्योहंतास्य पापस्य त्वां वि अ-३८
नाकृत्तिकासुत॥ ८१॥ तस्मात्त्वयाहि कर्तव्यं निधानं तारकस्य च॥ तच्छ्रुत्वा भगवान् क्रुद्धः पार्वतीनंद
नो महान्॥ ८२॥ उवाच प्रहसन्नविभ्राम्य विष्णुं प्रति यथोचितं॥ मयास्मि क्ष्यते सम्यक् चित्रं युद्धं महात्मना॥
८३॥ अनभिज्ञोस्म्यहं विष्णो कार्याकार्यविचक्षण॥ केस्मदीयाः परे के त्र न जानामि कथंचन॥ किमर्थं
युध्यमानावे परस्परवधोत्थिताः॥ कुमारस्य वचः श्रुत्वा नारदो वाक्यमब्रवीत्॥ ८५॥ त्वं कुमार महा
बाहो शंकरस्यांशसंभव॥ त्वं त्राता जगतां स्वामी देवानां परमा गतिः॥ ८६॥ तारकेण पुरा वीर तपस्तप्तं
सुदारुणं॥ येनैव विजिता देवा ये न स्वर्गो जितस्तथा॥ ८७॥ तपसा तेन चोग्रेण त्वजेयत्वमवाप्तवा
न्॥ अनेन विजितश्चेंद्रो लोकपालैः समन्वितः॥ ८८॥ त्रैलोक्यं विजितं सर्वं असुरेण दुरात्मना तस्मात्त्व
यानिहंतव्यस्तारकः पापपूरुषः॥ ८९॥ सर्वेषां चैव कर्तव्यं शिवं वै शिवपुत्रक॥ नारदस्य वचः श्रुत्वा
कुमारः प्रहसन्निव॥ ९०॥ विमानादवतीर्याथ पदातिः सोभवत्तदा॥ दृष्ट्वातमायांतमतिप्रचंडं अब्यकं तं
षण्मुखमप्रियं॥ ९१॥ दैत्योब भाषे स्फुरसत्तमांस्तदा त्वयं कुरो द्विषतां निहंता॥ अनेन साकं त्वहमेव वीरे
योत्स्यामि सर्वानहमेव वीरान्॥ ९२॥ गणांश्च सर्वानपि वीरमुख्यान् माहेश्वरांश्चैव सलोकपालान्॥ इसे

स्कंद० के ले॥हाहाकारोमहानासीत्पतितेचपुरंदरे॥३॥तारकेणापितत्रैवयत्कृतत्शृणुष्वमे॥पतितंचपदाक्र
म्यहस्ताद्वज्रंप्रगृह्यच॥४॥हतंदेवेंद्रमालोक्यतारकोरिपुसूदनः॥पुनर्वज्रप्रहारेणशक्रंताडितवा अ० २९
न्रुषा॥५॥इंद्रंपतितमालोक्यवीरभद्रःप्रतापवान्॥त्रिशूलमुद्यम्यतदामहाबलःसवीरभद्रोरु
षितःपुरंदरं॥६॥सरक्ष्यमाणःपृथुनाजघानसतारकंशूलवरेणसत्वरं॥शूलप्रहारेणाभिहतोनि
पपातमहीतले॥७॥पतितोहिमहातेजास्तारकःपुनरुत्थितः॥जघानपरयाशक्त्यावीरभद्रंचवक्ष
सि॥८॥वीरभद्रोपिपतितःशक्त्यापरमयाहतः॥सगणाश्चैवदेवास्तुगंधर्वोरगराक्षसाः॥९॥हाहा
कारेणमहताचुक्रुशुश्चमुहुर्मुहुः॥मुहूर्तमात्रात्सहसामहाबलःसवीरभद्रोह्युत्थितोनिहंता॥१०॥त्रि
शूलमुद्यम्यतडित्प्रकाशंजाज्वल्यमानंप्रभयानिरंतरं॥स्वरोचिषाभासितदिग्वितारकंसूर्येंदुबिंबाग्निनि
भोरुमंडलं॥११॥यावत्त्रिशूलेनतदाहंतुकामोमहाबलः॥तदाजयेत्यभिहितंश्रुतेराकाशसंस्थितैः॥१२
शक्त्यापरमयावीरस्तारकोहंतुमुद्यतः॥तारकस्यकुमारस्यसंग्रामोतीवदुःसहः॥जातस्तत्रतदामहा
घोरःसर्वभूतभयंकरः॥शक्तिहस्तौचतौवीरौयुयुधातेपरस्परं॥१४॥शक्तिभिर्भिन्नहृदयौतौप
राक्रमशालिनौ॥परस्परंवंचयतौसिंहाविवमहाबलौ॥१५॥वैतालीयुद्धमाश्रित्यतथावैखेचरीम
तं॥पार्वतीमतमाश्रित्यशक्त्याशक्तिंनिजघ्नतुः॥१६॥एभिर्भूतैर्महावीरौचक्रतुर्युद्धमुत्तमं॥वृषभा

विवगर्जंतौमहाबलपराक्रमौ॥१७॥जघ्नतुःशक्तिधाराभीरणेरणविशारदौ॥मूर्ध्निकंठेतथाचोर्वोर्जान्वोश्चैव
कटीतटे॥उरस्येवपृष्ठेचजघ्नतुस्तौपरस्परं॥तदातौयुध्यमानौतुहंतुकामौमहाबलौ॥१९॥प्रेक्षकास्त्वभवन्
सर्वेदेवगंधर्वकिंनराः॥ऊचुःपरस्परंसर्वेकोस्मिन्युद्धेजयिष्यति॥२०॥तदानभोगतावाणीप्रोवाच
सुरसत्तमान्॥तारकंत्वसुरंचाद्यकुमारोयंहनिष्यति॥२१॥माशोचतसुराःसर्वेसुखेनस्थीयतामिति॥श्रुत्वात
दातांगगनेसमीरितांवाचंशुभांसप्रमथैःसमेतः॥२२॥तंहंतुकामःकुपितःकुमारोदैत्याधिपंतारकमुग्ररूपं॥श
क्त्यातयामहाबाहुराजघानस्तनांतरे॥२३॥तारकंचसुरश्रेष्ठंकुमारोबलवत्तरः॥तंप्रहारमनादृत्यतारकोदै
त्यपुंगवः॥२४॥कुमारंचापिसंक्रुद्धःस्वशक्त्याचजघानवै॥तेनशक्तिप्रहारेणशांकरिर्मूर्छितोभवत्॥मुहूर्ता
च्चेतनांप्राप्यस्तूयमानोमहर्षिभिः॥तदासीच्चमदोन्मत्तंहंतुकामस्तथैवच॥२६॥कुमारस्तारकंदैत्यमाजघान
प्रतापवान्॥एवंपरस्परेणैवकुमारश्चैवतारकः॥२७॥युयुधातेतिसंरब्धौशक्तियुद्धपरायणौ॥अभ्यासपर
मेवास्तामन्योन्यस्यजिगीषया॥२८॥तदातुयुध्यमानौचाचित्ररूपौतरस्विनौ॥पक्षैस्तैर्विविधैर्विप्राःअन्योन्यंवि
जघ्नतुः॥२९॥अवलोकपराःसर्वेदेवगंधर्वकिंनराः॥विस्मयंपरमंप्राप्तानोचुःकिंचनतत्रवै॥३०॥नववौच
तदावायुर्निष्प्रभोभूद्दिवाकरः॥चचालवसुधासर्वासशैलवनकानना॥३१॥हिमालयोथरुद्रश्चत्रिकूटो
थदर्दुरः॥मलयोथमहाशैलोमानसोत्तरपर्वतः॥३२॥लोकालोकोमैनाकोविंध्यपर्वतः॥उदयाद्रिर्महेंद्रश्च
तथैवास्तगिरिर्महान्॥एतेचान्येचबहवोपर्वताश्चमहाप्रभाः॥तेत्थर्दितास्तदाजग्मुःकुमारंचपरीप्सवः॥३४॥

ततश्चदृष्ट्वातान्सर्वान्सचभीतांश्चशांकरिः॥ पर्वतान्गिरिजापुत्रोबभाषेप्रत्यबोधयन्॥३५॥ कुमारउवाच॥
माखिद्यतांमहाभागाः माचिंतांकुरुतानघाः॥ घातयाम्यद्यपापिष्ठंसर्वेषामपिपश्यतां॥३६॥ एवंसमाश्वास्य
तदामनस्वीतान्पर्वतान्देवगणैःसमेतान्॥ प्रणम्यशंभुंमनसाहरिप्रियःस्वांमातरंचैवतदाकुमारः॥३७॥
ततारकंहंतुमनामहाप्रभुर्गृहीतशक्तिःपरमेणचौजसा॥ विराजमानोतिबलेनविप्राःपिनाकपाणेस्तनय २१
स्तदानीं॥३८॥ शक्त्याजघानाथसशंकरुषान्वितोदैत्याधिपंशूलधरंतरस्वी॥ पपातसद्यस्सदेहसालदानीमसौ अ.२९
विशीर्णोहियथागिरींद्रः॥३९॥ तंतथापतितंदृष्ट्वातारकंबलवत्तरं॥ नजघानपुनर्वीरोभक्त्यापतितमाहवे॥४०
एवंहतंकुमारेणतारकासुरमोजसा॥ दृष्ट्वाशक्रस्तेसुरगणाऋषयोयुद्धकानगाः॥४१॥ किंनराश्चारणाःस
र्वास्तथाचैवाप्सरोगणाः॥ हर्षेणमहताविष्टास्तुष्टुवुस्तंकुमारकं॥४२॥ विद्याधराश्चननृतुर्गायकाश्चजयुस्त
दा॥ एवंविजयमापन्नंदृष्ट्वासर्वेमुदान्विताः॥४३॥ बभूवुश्चैकपद्येनसर्वेत्रैलोक्यवासिनः॥ सदाशिवोपिसं
तुष्टस्तथैवगिरिजासती॥४४॥ तत्रागत्यमुदायुक्तोस्वांकमारोप्यचात्मजं॥ परिषज्यचगाढेनगिरिजापि
तुतोषवै॥४५॥ तमुत्संगेगृहीत्वाचकुमारंसूर्यवर्चसं॥ लोडयामासतन्वंगीपार्वतीरुचिरेक्षणा॥४६॥ ऋषि
भिःसत्कृतःशंभुःपार्वत्यासहितस्तदा॥ अथासनगतासाध्वीशक्रशक्रमेमिलभाषिणी॥४७॥ संस्तूयमानामुनि
भिःसिद्धचारणपन्नगैः॥ नीराजितातदादेवैःपार्वतीशंभुनासह॥४८॥ कुमारेणसहैवाथशोभमानासती
तदा॥ हिमालयस्तदागत्यपुत्रैश्चपरिवारितः॥४९॥ मेर्वाद्यैःपर्वतैश्चैवस्तूयमानोथशंकरः॥ तदादेवगणाःसर्वे

वमुक्त्वासत्तदामहाबलःकुमारमुद्दिश्यययोचयोद्धुं॥९३॥ जग्राहशक्तिंपरमाद्भुतांसचेत्तारकोवा
क्यमिदंबभाषे॥ कुमारोभगतश्चाद्यभवद्भिश्चकथंकृतः॥९४॥ यूयंगतत्रपादेवाःयेषांराजापुरं
दरः॥ पुरायेनकृतंकर्मविरुद्धंसर्वमेवहि॥९५॥ कृत्तायाश्चदितेर्गर्भभवधीत्सापघ्नरूपः॥ कश्य
पस्यात्मजेनात्रबटुरूपेणयत्कृतं॥९६॥ अनेनैवमहेंद्रेणतथान्यद्यमहत्कृतं॥ गौतमस्यपुराभा
र्याधर्षितानेनपापिना॥९७॥ विश्वरूपोहतोनेनवृत्रश्चैवतथाहतः॥ कुमारंहंतुकामोद्यचेंद्रो
बालकघातकः॥९८॥ कुमारोद्यमयादेवाःघातितोनात्रसंशयः॥ पुराहतास्त्वयाविप्रादक्षयज्ञेमहाप्रभाः
॥९९॥ तत्कर्मणःफलंचाद्यवीरभद्रमहामते॥ दर्शयिष्यामितेभद्ररणेरणविशारद॥१००॥ इत्येवमुक्त्वा
तिपरमपुरुषपराभिभूतोदितितनयःपराद्रतःस्करेंद्रैः॥ युधिमतिमकरोद्द्विषांनिहंतासमरविज
र्यीसतारकोबलीयान्॥१०२॥ इतिश्रीस्कंदपुराणे॰ अष्टाविंशतितमोध्यायः॥२८॥ लोमशउवाच अ.२८ समा
तंवल्गमानमायांतंतारकासुरमोजसा॥ आजघानतुवज्रेणइंद्रोमतिमतांवरः॥१॥ तेनवज्रप्रहारेणता
रकोविह्वलीकृतः॥ पतितोपिसमुत्थायशक्त्यातंप्राहरद्रुषा॥२॥ पुरंदरंगजस्थंवैपातयामासभूत

इंद्राद्याश्चऋषिभिः सह ॥ ५० ॥ पुष्पवर्षेण महता ववर्षुरमितद्युतिं ॥ कुमारमग्रतः कृत्वा नीराजनपरा भवन् ॥ ५१ ॥ गी
तवादित्रघोषेण ब्रह्मघोषेण भूयसा ॥ स्तूयमानोथ विविधैः सूक्तैर्वेदविदां वरैः ॥ ५२ ॥ कुमारविजयो ह्येतन्नचरितं प
रमाद्भुतं ॥ सर्वपापहरं दिव्यं सर्वकामप्रदं नृणां ॥ ५३ ॥ ये कीर्तयंति शृण्वंति याभिर्भावयुक्ताश्चानन्यरूपभजरा
युतमादधानाः ॥ कुमारलक्षणयुतं शिवधामतुल्यं ते यांति परमतुलं शिवलक्षणं च ॥ ५४ ॥ श्रोष्यंति ये च मुदया
परया निविष्टाः श्रद्धान्विताः शिवपराः शिवधर्मयुक्ताः ॥ कौमारविक्रममहत्त्वमुदारमाद्यं आनंददायकम
मोघकरं नृणां हि ॥ ५५ ॥ यः पठेच्छृणुयाद्वापि कुमारस्य महात्मनः ॥ चरितं तारकघ्नं च सर्वपापैः प्रमुच्यते ॥
५६ ॥ इति श्रीस्कंद० केदार० शैव० एकोनत्रिंशोध्यायः ॥ २९ ॥ शौनक उवाच ॥ हत्वा तं तारकं संख्ये कुमारेण
महात्मना ॥ किं कृतं स्कंदमहद्भिस्तत्सर्वं वक्तुमर्हसि ॥ १ ॥ कुमारो हि परः शंभुर्येन सर्वमिदं ततं ॥ तपसा तोषि
तः शंभुः येन सर्वमिदं ततं ॥ स तपसा तोषितः शंभुर्ददाति परमव्ययं ॥ २ ॥ कुमारो दर्शनात्सद्यः फलदो हि
सदा नृणां ॥ ये पापिनोत्यधर्मिष्ठाः श्वपचा अपि सर्वदा ॥ ३ ॥ दर्शनाद्गतपापास्ते भवंत्येव न संशयः ॥
शौनकस्य वचः श्रुत्वा प्रत्युवाच त्वरितं तदा ॥ ४ ॥ यथा कुमारमुद्दिश्य व्यासशिष्यो हि मालो[illegible]शः ॥ लो
मश उवाच ॥ जघान तारकं युद्धे देवानामपि दुर्जयं ॥ ५ ॥ अवध्यश्च तदा विप्र कुमारेण विना हि सः ॥
महिमा हि कुमारस्य सर्वशास्त्रेषु गीयते ॥ ६ ॥ वेदैः सांगैः सागमैश्चोपनिषद्भिः सदा द्विज ॥ अष्टादश

अ० २९ समा

अ० ३० आरंभ

स्कान्दीयः केदारखण्डः